चन्द्रापीडो यदा सैन्यस्य वैशम्पायनस्य च परावृत्तिं प्रतीक्षमाणोऽवतस्थे तदा ससैन्ये सेनापतौ समागते किमिति वैशम्पायनो नायात इति चन्द्रापीडेन पृष्टः सेनापतिराह । वैशम्पायनोऽच्छोदसरो निवासप्रीतिमुज्झित्वा ततः प्रत्यागंतुं नेहते । इदमाकर्ण्य राज्ञा तारापीडेनाज्ञप्तश्चन्द्रापीडः पुनरच्छोदं नाम सरो जगाम । तत्रगत्वा च पूर्वतोऽधिकेन शोकेन विह्वलां महाश्वेतां विलोक्य किन्तेऽस्य शोकभारस्य कारणमामिति तामपृच्छत् । सा च भवत्सहचरो वैशम्पायनो बलान्मे कौमारं खण्डितुमियेष तत्तस्त्वं शुको भवेति मयाऽभिशप्तो गतप्राणो बभूव । एतच्छ्रुत्वा गुरुणा शोकेन परितप्तश्चन्द्रापीडोऽपि तत्रैव परागतासुरासीत् । ततो महाश्वेताऽपि स्वप्राणत्यागे मतिमबध्नात् । अनेनोदन्तेन खिन्ना कादम्बरी पत्रलेखां सहकृत्वाऽच्छोदं सरः प्राप । एतस्मिन्नेव सरे "महाश्वेता पुण्डरीकेण सङ्गता भविष्यति कादम्बर्या तु चन्द्रापीडशवस्य रक्षायै कर्त्तव्यो यत्नः इत्यशरीरिणी वागुदचरत् । दैव्या वाचोऽनन्तरमिन्द्रायुधमारुह्याच्छोदे प्रविष्टा पत्रलेखा, पुण्डरीकसहचरं कपिञ्जलं नामर्षिकुमारं सरस्तो बहिरायान्तमपश्यत् । ततः कपिञ्जलः स्वस्याश्वत्वप्राप्तिरूपां वार्तामवर्णयत् ।

एतदन्तस्य वृत्तस्य श्रवणेन शुकोऽवेदयत्—सत्यमहं वैशम्पायन इति । अथ स आश्रमादुड्डीनमात्र एव चाण्डालकन्यया गृहीत्वा राज्ञः शूद्रकस्याभिमुखमानीतः । इहावसिता शुककथा । इतश्चाण्डालकन्या स्वात्मानं शुकमातरं वर्ण-

यित्वा लक्ष्मीरूपेण प्रादुर्बभूव । ततः सा राजानं जगाद जहीहि स्वप्राणानित्युक्त-वत्यां तस्यां चन्द्रापीडो लब्धजीवितोऽभूत्पुण्डरीकश्च विहायसोऽवततार । एवं ते सर्वे संजग्मुः । चन्द्रापीडश्च पुण्डरीकाय राज्यमुत्सृज्य स्वयं पित्रोः शुश्रूषायां निरतो बभूव ।

वासवदत्ताख्यायिका भारतीयगद्यकाव्येभ्यः सर्वेभ्यः प्राचीनतमा प्रतिभाति । अत्र एव कथासरित्सागरे, पैशाचीनामके प्राकृते गुणाढ्येन विरचिताया बृहत्कथा-याः सारभूते बृहत्कथाश्लोकसंग्रहे, भासकृतस्वप्नवासवदत्तादिषु च भारतीयकाव्या-दिग्रन्थेषु बहुत्र अस्या नाम्नः समुल्लेखो विद्यते ।

श्रीहर्षकृतायां रत्नावल्यां यस्या नामोल्लेखः । नाम्नोरभेदेऽपि सा वासवदत्ता सुबन्धुविरचितवासवदत्तातो भिन्नैव ।

सुबन्धुकृतायां वासवदत्तायां कथाविभाजका उच्छ्वासादयो न सन्ति ।

प्रकृतपुस्तके वासवदत्ताया अन्तिमभागात् स एव कथांशः संगृहीतो यस्मिन् पितृवेश्मतः प्रपलाय्य विन्ध्यारण्यं प्रविष्टा वासवदत्तेत्यत आरम्भः ।

कथासारः—आसीत् चिन्तामणिनामधेयस्य राज्ञः सुतः कन्दर्पकेतुर्नाम । स चैकदा स्वप्नेऽभिरूपां काञ्चिद्रमणीमणिमपश्यत् । तदीयरूपसम्पदा विमुग्धः समुद्दीपितमन्मथश्च स्वसुहृदं मकरन्दं सहादाय तामन्वेष्टुं गृहान्निर्ययौ । मार्गे च कस्यचिच्छाखिनोऽधस्तान्निर्निद्रोऽवस्थितः कस्यचित्पतत्रिमिथुनस्य संलापे दत्तावधानो बभूव । तत्र पुंसा पतत्रिणा पाटलिपुत्रस्य राज्ञः शृङ्गारशेखरस्य वर्णन-मनया दिशोपक्रान्तम्—यथा पाटलिपुत्रस्य राज्ञः शृङ्गारशेखरस्य पुत्री परमरमणीया वासवदत्ता स्वप्ने कन्दर्पकेतुं वीक्ष्य लोकातिशायिना तदीयरूपेण लावण्येन च विमुग्धा तमालिकया स्वसहचर्या तस्मै स्वसन्देशं प्रेषयामास । एतच्छ्रुत्वा सान्द्रानन्देन जुष्टः सत्वरं पाटलिपुत्रमुपेत्य वासवमन्व-विन्दत । तत्र शृङ्गारशेखरः स्वसुतां वासवदत्तां विद्याधरकुमाराय पुष्पकेतवे दित्स-तीति विज्ञाय तस्य हर्षातिरेकः शोके पर्यणंसीत् । ततो वासवदत्तया सह पाटलि-पुत्रात्पलायित्वा कन्दर्पकेतुर्विन्ध्याविपिनमशिश्रियत् । अध्वपरिश्रमेण श्रान्तौ तौ मध्येऽरण्यं सुषुपतुः । सुप्तोत्थिश्च कन्दर्पकेतुर्वासवदत्तामपश्यञ्छोकदावदग्धहृदयो विललाप, आत्महनने च मतिं बबन्ध । वासवदत्तामचिरेण विन्दसे, इत्युक्त्वा दैव्या गिरा तस्य मरणमतिर्निरस्ता । अथैकदा तेन स्पृष्टा काचित् पाषाणप्रतिमा सद्यो वासवदत्तारूपं बभार । ततोऽब्रवीद् वासवदत्ता यदहं भवदर्थं फलमूलादि-कमानेतुं यावत्किमपि तपोवनं गता तावज्जातरोषेण केनापि तापसेन 'इह पाषाण प्रतिमा भवे' ति शप्ता । शापश्चायं तव भर्तृस्पर्शावसानः । एवमुभौ तौ मिथः सङ्गतौ स्वावासमुपेत्य सानन्दं विजहतुः ।

सुबन्धोः समयः—दण्डिन इव सुबन्धोरपि समयो न तत्वेनावगम्यते । सर्वेभ्यः पूर्वं बाणेन स्वग्रन्थे सुबन्धुविरचिताया वासवदत्ताया नामोल्लेखः कृतः—

कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥

(हर्षचरित्रे)

कादम्बरीटीकाकारेणापि "अतिद्वयीकथा" अस्मिन् पद्यांशे वासवदत्ताया नामनिर्देशोऽकारि । वैक्रमाष्टमशताब्दया आसन्ने काले वर्तमानः प्राकृतकाव्यस्य गउडवहस्य कर्ता वाक्पतिराजोऽपि सुबन्धुकवेः कृतिं स्मरति । विक्रमस्य द्वादश शताब्दयाः समीपतरेऽनेहसि जातजन्मना येन कविराजेन राघवपाण्डवीयं नाम काव्यं कृतं सोऽपि मुक्तकण्ठं श्लाघते सुबन्धुम् । अन्ये सर्वेऽपि लेखा एभ्योऽर्वाञ्चः ।

श्रीहर्षचरितस्य रचनाकालः सप्तमवैक्रमशताब्दयाः सन्निहितः । एतस्मात्परो-नास्ति नूनं वासदत्तानिर्माणकालः ।

सुबन्धुनापि केषांचित्कवीनां नामानि स्वग्रन्थे समादृतानि तेषु "न्यायस्थिति-मिवोद्योतकरस्वरूपामित्यत्रोद्योतकरस्य नाम सुबन्धुसमयनिर्णये नितरामुपयुक्त-तरम् । नैयायिक बौद्धदिङ्नागाचार्यस्य मतखण्डनाय न्यायवार्त्तिकं येन विरचितं स एवोद्योतकरः । दिङ्नागस्य समयश्च पञ्चसप्तत्यधिक पञ्चशततम वैक्रमाब्दात् पञ्चाशदुत्तरवैक्रमषड्शतवर्षान्तस्य कालस्य मध्ये क्वापि कल्पयितुं शक्यः । उद्योत-करेण न्यायवार्त्तिकं ६५० वैक्रमवर्षस्य समीपवर्त्तिनि काले विरचितम् तस्माद् वासवदत्ताया रचनाकालः ६५० विक्रमाब्दात् पुरो नेतुं न शक्यः एभिर्हेतुभिर्वासवद-त्ताया रचनाकालः वैक्रमसार्धषट्शताब्दीतः सप्तशतवर्षान्तस्य कालस्य मध्यवर्त्ती ।

शैली—दण्डिना दशकुमारचरितं वैदर्भमार्गमाश्रित्य विरचितं सुबन्धुना च गौडमार्गेण वासवदत्ता निरमायि । अस्य मार्गस्य लक्षणं साहित्यदर्पणे—ओजः प्रकाशकैर्वर्णैरित्यादिना निरूपितम् । अस्यामाख्यायिकायामन्यालङ्कारेभ्योऽधिकतरः श्लेषालंकारस्यादरः । युक्तञ्चैतत् यतः सुबन्धुः स्वात्मानं प्रत्यक्षरश्लेषमय-प्रबन्धवैदग्ध्यनिधित्वेन वर्णयति ।

बनारसीदास जैन एम. ए.

CONTENTS.

		Pages.
	Introduction	i-xx
	उपोद्घात	१–९
१	दशकुमारचरितम्	१
२	हर्षचरितम्	३६
३	कादम्बरी	६४
४	वासवदत्ता	१५०

दशकुमारचरितम् ।

पूर्वपीठिका ।

अस्ति समस्तनगरीनिकषायमाणा मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी। तत्र शरदिन्दुकुन्दघनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्या रचितदिगन्तरालपूर्त्या कीर्त्याऽभितः सुरभितः, स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलायितधरणीरमणीसौभाग्यभोगभाग्यवान्, अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासुरभूसुरनिकरः,विरचितारातिसंतापेन प्रतापेन सततत्तुलितवियन्मध्यहंसः, राजहंसो नाम घनदर्पकंदर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव । तस्य वसुमती नाम सुमती लीलावतीकुलशेखरमणी रमणी बभूव । विजितामरपुरे पुष्पपुरे निवसता सानन्तभोगलालिता वसुमती वसुमतीव मगधराजेन यथासुखमन्वभावि ।

अस्तीति । निकषवदाचरति निकषायते । निकषायतेऽसौ निकषायमाणा । 'शाणस्तु निकषः कषः' इत्यमरः । पण्यानि विक्रेयवस्तूनि । 'विक्रेयं पणितव्यं च पण्यम्' इत्यमरः । रत्नाकर उदधिः । शेखरीभूता भूषणभूता । **शरदिन्द्विति** । शरदिन्दुश्च कुन्दं चेत्यादि काशान्तो द्वन्द्वः । तैर्नीकाशा निभा । सदृशेति यावत् । मूर्तिर्यस्याः । 'निभसंकाशनीकाशप्रतीकाशोपमादयः' इत्यमरः । दिशामन्तरालं दिगन्तरालं तस्य पूर्तिः । रचिता कृता दिगन्तरालपूर्तिर्यया । सुरभितो मनोज्ञः । **स्वर्लोकेति** । स्वर्लोकः सुरालयो मेरुस्तस्य शिखरं तद्वत्तत्सम्बन्धीनि वा उरूणि स्थूलानि रुचिराणि सुन्दराणि च यानि रत्नानि तेषां तद्युक्तो वा यो रत्नाकरस्तस्य वेला जलवृद्धेर्मर्यादा तया मेखलायिता या धरणी सैव रमणी मेखला काञ्ची । 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः । अनवरता नित्याः यागा यज्ञाः । विद्यायाः संभारस्तेन भासुरा देदीप्यमानाः । भूसुरा ब्राह्मणः । भुवि सुरा भूसुराः । तेषां निकरो वृन्दम् । विरचितोऽरातिसंतापो येन । रिपुदत्तसंताप इत्यर्थः । 'अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः' इत्यमरः । वियत आकाशस्य मध्ये हंसः सूर्यः । दर्पोऽवलेपः । कन्दर्पो मन्मथः । सोदर्यो बन्धुः समानोदर्यः । अत्र तु सोदर्यं सादृश्यम् । हृद्यं मनोहरम् । निरवद्यं निर्दोषम् । लीलावत्यो योषितस्तासां कुलं तस्य शेखरमणिर्भूषणमवतंसः । **विजितेति** । विजितं स्ववैभवेन तिरस्कृतममरपुरमिन्द्रनगरी येन तस्मिन् । अन्वभावि । अन्वित्युपसर्गपूर्वक 'भू सत्तायाम्'

तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसितवर्मनामधेया धीरधिषणावधीरितविबुधाचार्यविचार्यकार्यसाहित्याः कुलामात्यास्त्रयोऽभूवन्। तेषां सितवर्मणः सुमतिसत्यवर्माणौ, धर्मपालस्य सुमन्त्रसुमित्रकामपालाः, पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन्। तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरमगमत्। विटनटवारनारीपरायणो दुर्विनीतः कामपालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मन्त्रिसूनवः पुरंदरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन्।

ततः कदाचिन्निशितसायको मगधनायको मालवेश्वरं प्रत्यग्रसङ्ग्रामघस्मरं समुत्कटमानसारं मानसारं प्रति सहेलं न्यक्कृतजलधिनिर्घोषाहङ्कारेण भेरीझाङ्कारेण चतुरङ्गबलेन संयुतः सङ्ग्रामाभिलाषेण रोषेण महताविष्टो निर्ययौ। मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम। तयोरथ रथतुरगखुरक्षुण्णक्षोणीसमुद्धूते करिघटाकटस्रवन्मदधाराधौतमूले वियत्तलव्याकुले धूलीपटले दिविषद्ध्वनि

इति धातोः कर्मणि यङ्। **तस्येति**। विधेया विनयग्राहिणः। 'विधेयो विनयग्राही' इत्यमरः। धिषणा बुद्धिः। 'बुद्धिर्मनीषा धिषणा' इत्यमरः। विबुधाचार्यः सुरगुरुस्तेनापि विचारणीयं यत्कार्यं तस्मिन्नपि साहाय्यकारिणः। अतीव पटुबुद्धय इति भावः। कुलामात्या वंशक्रमागताः धर्मशीलो धार्मिकः। असारतां फल्गुताम्। अध्रुवत्वमित्यर्थः। अन्यो देशो देशान्तरम्। अगमदिति। 'गम्लृ गतौ' इत्यस्य लुङि रूपम्। विटाः षिङ्गाः। 'विटोऽद्रौ लवणे षिङ्गे मूषिके खदिरेऽपि च' इति मेदिनी। नटाः शैलूषाः। 'भरता इत्यपि नटाः' इत्यमरः। वारनार्यो गणिकाः। परायणस्तत्परः। दुर्विनीतोऽविनीतः। जनकश्चाग्रजन्मा च जनकाग्रजन्मानौ तयोः। पितुर्ज्येष्ठभ्रातुश्चेत्यर्थः। शासनं निदेशम्। बभ्रामेति 'भ्रमु अनवस्थाने' इत्यस्य लिटि रूपम्। वाणिज्यं वणिक्कर्म। भाण्डस्य द्वीपान्तरे नयनं द्वीपान्तरादानयनमित्यादि च। पारावारः समुद्रः। 'पारावारः सरित्पतिः' इत्यमरः। पुरंदर इन्द्रस्तस्य पुरं नगरं तदतिथयो गृहागताः। 'दूराच्चोपनतं श्रान्तं वैश्वदेव उपस्थितम्। अतिथिं तं विजानीयात्' इति व्यासः। प्रेत्य महेन्द्रनगरं गतेषु। मृतेष्विति तात्पर्यार्थः। पूर्वमनतिक्रम्य वर्तत इति यथापूर्वम्। अनुपूर्वः ष्ठाधातुः करणार्थे वर्तते। 'ष्ठा गतिनिवृत्तौ' इत्यस्य लङि रूपम्। अकुर्वन्नित्यर्थः। **तत इति**। निशितास्तीक्ष्णाः सायका बाणा येनैतादृशः। 'युद्धमायोधनं जन्यम्' इति 'मूर्धाभिषिक्तो राजन्यः' इति चामरः। 'मौलिः किरीटे धम्मिल्ले चूडायामानपुंसकम्' इति मेदिनी। 'पालिः

धिक्कृतान्यध्वनिपटहध्वानबधिरिताशेषदिगन्तरालं शस्त्राशस्त्रि हस्ताहस्ति परस्पराभिहतसैन्यं जन्यमजनि। तत्र मगधराजः प्रक्षीणसकलसैन्यमण्डलं मालवराजं जीवग्राहमभिगृह्य कृपालुतया पुनरपि स्वराज्ये प्रतिष्ठापयामास। ततः स रत्नाकरमेखलामिलामनन्यशासनां शासदनपत्यतया नारायणं सकललोकैककारणं निरन्तरमर्चयामास। अथ कदाचित्तदग्रमहिषी 'देवि, देवेन कल्पवल्लीफलमाप्नुहि' इति प्रभातसमये सुस्वप्नमवलोकितवती। सा तदा दयितमनोरथपुष्पभूतं गर्भमधत्त। राजापि संपन्न्यक्कृताखण्डलः सुहृन्नृपमण्डलं समाहूय निजसंपन्मनोरथानुरूपं देव्याः सीमन्तोत्सवं व्यधत्त।

कर्णलतायां स्यात्प्रदेशे पंक्तिचिह्नयोः' इत्यजयः। 'निशितक्षणुतशातानि तेजिते' इत्यमरः। प्रत्यग्रो नवीनः। संग्रामो युद्धम्। घस्मरो भक्षकः। शत्रुनाशक इत्यर्थः। 'सृघस्यदः क्मरच्' इति क्मरच्। समुत्कटोऽतिरिक्तो मान एव सारो यस्य तम्। मानसार इति नृपनाम। सहेलं लीलया न्यक्कृतोऽवधूतस्तिरस्कृतो जलधेः सागरस्य निर्घोषविषयेऽहङ्कारोऽभिमानो येन। भेरीझाङ्कारेणेत्यस्य विशेषणम्। भेर्या दुन्दुभेर्झाङ्कारो महाशब्दः। चतुरङ्गबलेन हस्त्यश्वरथपादातेन सेनाङ्गेन। आविष्टो व्याप्ताकारः। अनेके येऽनेकपा द्विपाः। हस्तिन इति यावत्। तेषां यूथं वृन्दं तेन सनाथो युक्तः। विग्रहः संग्रामः। सविग्रहो मूर्तिमान्। 'युद्धे देहे च विग्रहः' इति कोशः। साग्रह आग्रहेण सहितः। 'तयोः अथ' इति छेदः। रथैरर्थाद्रथचक्रनेमिभिः। तुरगाणामश्वानां खुरैः शफैः क्षुण्णायाश्चूर्णितायाः क्षोण्याः पृथ्व्याः समुद्भूत उत्पन्ने। करिणां हस्तिनां घटाः 'बहूनां घटना घटा' इति हलायुधः। तासां कटा गण्डाः। 'करटः स्यात्कटो गण्डः' इति हलायुधः। तेभ्यः स्रवन्त्यो या मदधारा दानसलिलासारास्ताभिर्धौतं निर्मलीकृतं मूलं यस्य। वियत आकाशस्य तले व्याकुलं संभृतम्। धूल्याः पांसोः पटलं चयस्तस्मिन्। दिविषदां सुराणाम्। अध्वनि मार्गे। दिवि सीदन्ति ते दिविषदः। देवा इत्यर्थः। धिक्कृता अन्यध्वनयो येनैतादृशो यः पटहध्वानो ढक्काध्वनिस्तेन बधिरितमशेषदिगन्तरालं यस्मिन्। 'स्याद्यशः पटहो ढक्का' इत्यमरः। शस्त्राशस्त्रि। शस्त्रैः शस्त्रैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति। 'तत्र तेनेदम्—' इति बहुव्रीहिः। 'इच्कर्मव्यतिहारे' इतीच्समासान्तः। परस्परस्याभिहतं सैन्यं यस्मिन्। जन्यं युद्धम्। अजनीति 'जनी प्रादुर्भावे' इत्यस्य लुङि रूपम् 'जनिवध्योश्च' इति न वृद्धिः। 'दीपजनबुध—' इति वा चिण्। प्रक्षीणं हतविध्वस्तम्। 'निष्ठायामन्यदर्थे' इति दीर्घः। 'क्षियो दीर्घात्' इति नः। जीवग्राहम्। जीवन्तमित्यर्थः। 'समूलाकृतजीवेषु–' इति णमुल्। **तत इति**। रत्नाकरः सागरो मेखला कटिसूत्रं यस्याः। इलां पृथ्वीम्। 'गौरिला कुम्भिनी

एकदा हितैः सुहृन्मन्त्रिपुरोहितैः सभायां सिंहासनासीनो गुणैरहीनो ललाटतटन्यस्ताञ्जलिना द्वारपालेन व्यज्ञापि—'देव, देवसंदर्शनलालसमानसः कोऽपि देवेन विरच्यार्चनार्हो यतिर्द्वारदेशमध्यास्ते' इति। तदनुज्ञातेन तेन स संयमी नृपसमीपमनायि। भूपतिरायान्तं तं विलोक्य सम्यग्ज्ञाततदीयगूढचारभावो निखिलमनुचरनिकरं विसृज्य मन्त्रिजनसमेतः प्रणतमेनं मन्दहासमभाषत—'ननु तापस, देशं सापदेशं भ्रमन्भवांस्तत्र तत्र भवदभिज्ञातं कथयतु' इति। तेनाभाषि भूभ्रमणबलिना प्राञ्जलिना—'देव, शिरसि देवस्याज्ञामादायैनं निर्दोषं वेषं स्वीकृत्य मालवेन्द्रनगरं प्रविश्य तत्र गूढतरं वर्तमानस्तस्य राज्ञः समस्तमुदन्तजातं विदित्वा प्रत्यागमम्। मानी मानसारः स्वसैनिकायुष्मत्तान्तराये संपराये भवतः पराजयमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदयो महाकालनिवासिनं काली-

---

क्षमा इत्यमरः। नास्त्यन्यशासनं यस्याम्। शासत्। अभ्यस्तत्वान्नुमभावः। सकललोकस्यैककारणमादिहेतुः। प्रभातसमये प्रातःकाले। दयितमनोरथफलस्य पुष्पमिव भूतम्। अधत्तेति 'डुधाञ् धारणपोषणयोः' इत्यस्य लङ्यात्मनेपदरूपम्। सम्पदा न्यक्कृत आखण्डल इन्द्रो येन। 'आखण्डलस्तुराषाट्' इति हलायुधः। सुहृदश्च ये नृपास्तेषां मण्डलम्। सुहृदश्च नृपाश्चेति वा। **समाहूयेति**। 'सम् आ' इत्येतत्पूर्वस्य ह्वेधातोर्ल्यपि रूपम्। 'ह्वः संप्रसारणम्'। निजसंपन्मनोरथयोरनुरूपं सदृशम्। सीमन्तोत्सवं सीमन्तोन्नयनसंज्ञः संस्कारस्तदानुषङ्गिकमुत्सवम्। तथा चाश्वलायनः—'चतुर्थे गर्भमासे सीमन्तोन्नयनम्। इति। सीमन्तः केशवेशो यस्मिन्कर्मण्युन्नीयते तत्सीमन्तोन्नयनम्। **एकदेति**। हितैः पथ्यैः। सिंहासनं भद्रासनं तत्र समासीनः। 'ईदासः' इति आनस्य ईत्। अहीनोऽन्यूनः। ललाटतटेत्युपचार एतत्। व्यज्ञापीति 'ज्ञा अवबोधने' इत्यस्य णिजन्तात्कर्मणि लुङ्। लालसमभिलाषयुक्तम्। विरच्या कर्तव्या यार्चना तामर्हतीति यतिर्भिक्षुः। **द्वारदेशमिति**। 'अधिशीङ्स्थासाम्–' इति कर्मत्वम्। द्वारि तिष्ठतीत्यर्थः। तेनानुज्ञातस्तदनुज्ञातः। संयमी यतिः। अनायीति 'णीञ् प्रापणे' इत्यस्य कर्मणि लुङो रूपम्। आयान्तमागच्छन्तम्। विलोक्य। 'लोकृ दर्शने'। सम्यक्सुष्ठु ज्ञातोऽवगतः। तस्यायं तदीयः। 'प्रत्ययोत्तरपदयोश्च' इत्यनेन त्वादेशः। गूढः प्रच्छन्नश्चारभावो येन सः। निखिलं सर्वम्। अनुचरनिकरमनुयायिवर्गम्। विसृज्य। 'सृज विसर्गे' **मन्त्रिजनेति**। सचिवयुक्तः। प्रणतं प्रह्वम्। मन्दहासमिति क्रियाविशेषणम्। सापदेशं सव्याजम्। तत्र तत्र तेषु स्थानेषु। भवताभिज्ञातं भवदभिज्ञातम्। कथयत्वित्यत्र भवच्छब्दस्य कर्तृत्वेन प्रयोगात्प्रथमपुरुषः। अभाषि। 'भाष व्यक्तायां वाचि'। कर्मणि लुङ्। भूभ्रमणे भ्रमणविषये बली समर्थस्तेन। प्रबद्धोऽञ्जलिर्येन स प्राञ्जलिस्तेन। देव राजन्। **शिरसीति**। अङ्गीकृत्येत्यर्थः। आदायेति आङ्पूर्वक 'डुदाञ् दाने' इत्यस्य रूपम्। निर्दोषं दोष-

विलासिनमनश्वरं महेश्वरं समाराध्य तपःप्रभावसंतुष्टादस्मादेकवीरारातिघ्नीं भयदां गदां लब्ध्वात्मानमप्रतिभटं मन्यमानो महाभिमानो भवन्तमभियोक्तुमुद्युङ्क्ते। ततः परं देव एव प्रमाणम्' इति। तदालोच्य निश्चिततत्कृत्यैरमात्यै राजा विज्ञापितोऽभूत्—'देव, निरुपायेन देवसहायेन योद्धुमरातिरायाति। तस्मादस्माकं युद्धं सांप्रतमसांप्रतम्। सहसा दुर्गसंश्रयः कार्यः' इति तैर्बहुधा विज्ञापितोऽप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमना बभूव। शितिकण्ठदत्तशक्तिसारो मानसारो योद्धुमनसामग्रीभूय सामग्रीसमेतोऽक्लेशं मगधदेशं प्राविवेश। तदा तदाकर्ण्य मन्त्रिणो भूमहेन्द्रं मगधेन्द्रं कथंचिदनुनीय रिपुभिरसाध्ये विन्ध्याटवीमध्येऽवरोधान्मूलबलरक्षितान्निवेशयामासुः। राजहंसस्तु प्रशस्तवीतदैन्यसैन्यसमेतस्तीव्रगत्या निर्गत्याधिकरुषं द्विषं रुरोध। परस्परबद्धवैरयोरेतयोः शूरयोस्तदा तदालोकनकुतू-

द्वितीया बहु०

विवर्जितम्। मालवेन्द्रो मानसारः। गूढतरम्। अतिशयेन गूढमित्यर्थः। 'द्विवचन–' इति तरप्। वर्तमानः। 'वृतु वर्तने'। कर्तरि शानच्। उदन्तो वार्ता। 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः। उदन्तजातमखिलां प्रवृत्तिम्। विदित्वा ज्ञात्वा। **मानीति**। ताच्छील्ये णिनिः। स्वसैनिका निजभटास्तेषामायुष्मत्ता जीवितमर्यादा तस्या अन्तरायो विघ्नस्तस्मिन्। संपराये युद्धे। 'संपरायः समीकं सांपरायिकम्' इति हैमः। भवतो देवात्। वैलक्ष्येण दैन्येन लक्ष्यमाक्रान्तं हृदयं यस्य सः। वीता नष्टा दया यस्य। महाकाले निवासोऽस्त्यस्य तस्य। कालीविलासिनं कालीपतिम्। अनश्वरं नाशरहितम्। महांश्चासावीश्वरश्च महेश्वरस्तम्। समाराध्य सम्यगाराध्य। तपसस्तदाचरितस्य प्रभावः सामर्थ्यं तेन संतुष्टात्प्रीतात्। अस्मान्महेश्वरात्। एकवीरश्चासावरातिश्च तं हन्तीति। भयदां भयदात्रीम्। गदामायुधविशेषम्। अप्रतिभटं न विद्यते प्रतिभटो यस्य तम्। महानभिमानो यस्येति बहुव्रीहिः। अभियोक्तुमभिषेणयितुम्। उद्युङ्क्ते उद्युक्तो भवति। 'युजिर् योगे'। देव एव प्रमाणम्। किंकर्तव्यतानिर्णीतेत्यर्थः। निश्चितं निर्णीतं तत्कृत्यमरातिकृत्यं यैस्तैः। अमात्यैर्मन्त्रिभिः। निरुपायेन नास्त्युपायः प्रतीकारो यस्य तेन। देवसहायेन। दैवसामग्र्येति यावत्। अरातिः परः। 'परारातिप्रत्यर्थि–' इत्यमरः। सांप्रतमधुना। असांप्रतमयुक्तम्। 'युक्ते द्वे सांप्रतं स्थाने' इत्यमरः। अखर्वो बहुः। न खर्वोऽखर्वः। 'खर्वो ह्रस्वश्च वामनः', 'न्यङ्नीचखर्वह्रस्वाः स्युः' इति चामरः। विराजमानः शोभमानः। 'राजृ दीप्तौ'। अकृत्यं कर्तुमनुचितमिति। अनादृत्यानादरं कृत्वा। शितिकण्ठः शिवस्तेन दत्ता या शक्तिः प्रहरणविशेषः स एव सारो बलं यस्य सः। योद्धुमनसां युद्धकामानामग्रीभूय पुरो भूत्वा। 'तुं काममनसोरपि'

हलागतगगनचराश्चर्यकारणे रणे वर्तमाने जयाकांक्षी मालवदेश-रक्षी विविधायुधस्थैर्यचर्याञ्चितसमरतुलितामरेश्वरस्य मगधेश्वरस्य तस्योपरि पुरा पुरारातिदत्तां गदां प्राहिणोत्। निशितशरनिकर-शकलीकृतापि सा पशुपतिशासनस्यावन्ध्यतया सूतं निहत्य रथस्थं राजानं मूर्च्छितमकार्षीत्। ततो वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाय दैवगत्यान्तःपुरशरण्यं महारण्यं प्राविशन्। मालवनाथो जयलक्ष्मीसनाथो मगधराज्यं प्राज्यं समाक्रम्य पुष्पपुरमध्यतिष्ठत्।

तत्र हेतिततिहतिश्रान्ता अमात्या दैवगत्यानुत्क्रान्तजीविता निशान्तवातलब्धसंज्ञाः कथंचिदाश्वस्य राजानं समन्तादन्वीक्ष्यानवलो-

---

इत्यनुस्वारलोपः। सामग्र्या समेतो युक्तः अक्लेशमिति क्रियाविशेषणम्। 'तत् आकर्ण्य' इति छेदः। भुवि पृथिव्यां महेन्द्रस्तम्। कथंचिद्यत्नेन। अनुनीय प्रार्थ्य। असाध्ये दुर्गाः हनीये। अवरोधान्राजस्त्रियः। मूलबलेन प्रधानसैन्येन रक्षिताम्। निवेशयामासुस्थापितवन्तः। **प्रशस्तेति**। वीतं गतं दैन्यं यस्मात्तद्वीतदैन्यम्। प्रशस्तं च तद्वीतदैन्यं च तादृशं सैन्यं तेन समेतः। तीव्रा चासौ गतिश्च तया। **निर्गत्येति**। 'गम्लृ गतौ'। अधिका रुज्यस्य तम्। द्विषमरिम्। रुरोध। 'रुधिर् आवरणे' लिट्। **परस्परेति**। परस्परेण बद्धं वैरं याभ्यां तयोः। **तदालोकनेति**। तस्यालोकने यत्कुतूहलं तदर्थमागता ये गगनचरास्तेषामाश्चर्यस्य कारणं तस्मिन्। आलोकनं दर्शनम्। कुतूहलं कौतुकम्। गगनचरा देवाः। वर्तमाने प्रवृत्ते। जयमाकाङ्क्षते सः। मालवदेशस्य रक्षी रक्षिता। **विविधेति**। विविधानि यान्यायुधानि तेषां स्थैर्येण चर्या तयाञ्चितं यत्समरं तस्मिंस्तुलितोऽमरेश्वरो येन तस्य विविधानि नैकप्रकाराणि। आयुधानि प्रहरणानि। चर्या चालनमुपयोगः प्रयोगो वा। अञ्चितं युक्तम्। समरं युद्धम्। अमरेश्वर इन्द्रः। **पुरारातीति**। पुरारातिः शंकरस्तेन दत्ताम् प्राहिणोत्। 'हि गतौ' इति धातुः। लुङ्। निशितास्तीक्ष्णाश्च ते शराश्चेषवस्तेषां निकरः समुदायस्तेन शकलीकृता खण्डशः कृता। 'चित्रपुङ्खः सरः शरः' इति त्रिकाण्डशेषः। **पशुपतीति**। पशुपतिः शिवस्तस्य शासनस्याज्ञाया अवन्ध्यतया सफलतया। सूतं सारथिम्। 'सूतः क्षत्ता च सारथिः' इत्यमरः। निहत्य। 'हन हिंसागत्योः'। रथस्थं रथे तिष्ठतीति। अकार्षीत्। 'डुकृञ् करणे' लुङ्। वीतप्रग्रहा मुक्तरश्मयः। अक्षतो विग्रहः शरीरं येषाम्। वाहा अश्वाः। 'वाजिवाहावगन्धर्व—' इत्यमरः। दैवगत्या यदृच्छया। अन्तःपुरस्य राजस्त्रीणां शरणे साधु। महच्च तदरण्यं च महारण्यम्। **जयलक्ष्मीति**। जयलक्ष्म्या सनाथो युक्तः प्राज्यं पुष्कलम्। समाक्रम्य पुष्पपुरमिति। अधिशीङ्—' इति कर्मत्वम्। **तत्रेति**। हेतीनामायुधानां ततयः समुदायास्तैर्हतिस्ताडनं प्रहारस्तेन श्रान्ताः। 'रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः' इत्यमरः। **अनुत्का-**

कितवन्तो दैन्यवन्तो देवीमवापुः । वसुमती तु तेभ्यो निखिलसैन्यक्षतिं राज्ञोऽदृश्यत्वं चाकर्ण्योद्विग्ना शोकसागरमग्ना रमणानुगमने मतिं व्यधत्त । 'कल्याणि, भूरमणमरणमनिश्चितम् । किं च दैवज्ञकथितो मथितोद्धतारातिः सार्वभौमोऽभिरामो भविता सुकुमारः कुमारस्त्वदुदरे वसति । तस्मादद्य तव मरणमनुचितम्' इति भूषितभाषितैरमात्यपुरोहितैरनुनीयमानया तया क्षणं क्षणहीनया तूष्णीमस्थायि । अथार्धरात्रे निद्रानिलीननेत्रे परिजने विजने शोकपारावारमपारमुत्तर्तुमशक्नुवती सेनानिवेशदेशं निःशब्दलेशं शनैरतिक्रम्य यस्मिन्रथस्य संसक्ततया तदानयनपलायनश्रान्ता गन्तुमक्षमाः

न्तेति । नोत्क्रान्तं जीवितं प्राणा येषां ते । निशाया अन्तोऽवसानं तत्संबन्धिवातेनार्थाच्छीतलेन लब्धा प्राप्ता संज्ञा यैस्ते । कथंचिन्महतायासेन । आश्वस्य धैर्यावष्टम्भं कृत्वा । समन्तादितस्ततः । अन्वीक्ष्य । 'ईक्ष दर्शने' । दैन्यवन्तो दैन्यं खेदस्तद्वन्तः । अवापुः । 'आप्लृ व्याप्तौ' । लिट् । **निखिलेति** । निखिलस्य सर्वस्य सैन्यस्य क्षतिर्नाशस्तम् । 'क्षणु हिंसायाम्' । उद्विग्ना दैन्यपरीता । 'ओविजी भयचलनयोः' । **शोकेति** शोक एव सागरस्तस्मिन्मग्ना । 'टुमस्जो शुद्धौ' । रमणानुगमने पतिमनुमरणे । मतिं व्यधत्त निश्चयं चकार । कल्याणि । कल्याणलक्षणोपेते इति यावत् । **भूरमणेति** । भुवो रमणो वल्लभः । पतिरित्यर्थः । देवस्येति तात्पर्यम् । अनिश्चितं न निर्णीतम् । **किं चेति** । किं चापि चान्यच्च । दैवज्ञेन कार्तान्तिकेन । ज्यौतिषिकेणेत्यर्थः । 'सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि' । तेन कथितः । **मथितेति** । मथिता मथिष्यमाणा उद्धता धृष्टा अरातयो येन सः । सार्वभौमश्चक्रवर्ती । अभिरामो मनोज्ञः । भविता भावी । सुकुमारः पेशलः । **त्वदिति** । तवोदर इत्यर्थः । अनुचितमयुक्तम् । **भूषितेति** । भूषितं भूषणैराढ्यं भाषितं भाषणं येषां तैः । भावे क्तः । 'तारकादिभ्यः—' इतीतच् । **अमात्येति** । अमात्याश्च पुरोहिताश्च तैः । पुरोहिताः पुरोधसः । 'पुरोधास्तु पुरोहितः' इत्यमरः । अनुनीयत इत्यनुनीयमाना तया । क्षणं क्षणपर्यन्तम् । 'कालाध्वनोः—' इति द्वितीया । क्षण उत्सवस्तेन हीना । क्षण उद्धर्षो मह उद्धव उत्सवः' इत्यमरः । तूष्णीं जोषम् । 'मौने तु तूष्णीम्' इत्यमरः । **अस्थायीति** । 'ष्ठा गतिनिवृत्तौ' इत्यस्य कर्मणि लुङो रूपम् । अथानन्तरम् । 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इत्यमरः । अर्धरात्रे निशीथे । 'अर्धरात्रनिशीथौ द्वौ' इत्यमरः । निद्रया निलीने नेत्रे यस्य स तस्मिन् । परिजनेऽनुचरवर्गे । विजने विविक्ते । शोकपारावारं शोकसमुद्रम् । 'समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः' इत्यमरः । अपारं पारयितुमशक्यम् । सेनाया निवेशः शिबिरम् । एवमेवामरः । वासस्थानमिति यावत् । तस्य देशः प्रदेशः । निर्गतः शब्दलेशो यस्मा-

क्षमापतिरथ्याः पथ्याकुलाः पूर्वमतिष्ठंस्तस्य निकटवटतरोः शाखायां मृतिरेखायामिव क्वचिदुत्तरीयार्धेन बन्धनं मृतिसाधनं विरच्य मर्तुकामाभिरामा वाङ्माधुरीविरसीकृतकलकण्ठा साश्रुकण्ठा व्यलपत् 'लावण्योपमितपुष्पसायक भूनायक, भवानेव भाविन्यपि जन्मनि वल्लभो भवतु' इति । तदाकर्ण्य नीहारकराकिरणनिकरसंपर्कलब्धावबोधो मागधोऽगाधरुधिरविक्षरणनष्टचेष्टो देवीवाक्यमेव निश्चिन्वानस्तन्वानः प्रियवचनानि शनैस्तामाह्वयत् । सा ससंभ्रममागत्यामन्दहृदयानन्दसंफुल्लवदनारविन्दा तमुपोषिताभ्यामिवानिमिषिताभ्यां लोचनाभ्यां पिबन्ती विकस्वरेण स्वरेण पुरोहितामात्यजनमुच्चैराहूय तेभ्यस्तमदर्शयत् । राजा निटिलतटचुम्बितनिजचरणा-

---

क्षम् । संसक्तस्य भावस्तया । तस्यानयनं तदानयनं तस्मिन्यत्पलायनं तेन श्रान्तः । अक्षमा असमर्थाः । क्षमायाः पृथ्व्याः । 'गौरिला कुम्भिनी क्षमा' इत्यमरः । पतिः स्वामी भर्ता वा तस्य रथ्या वाहाः । 'तद्वहति रथयुग—' इति यः । 'पथि आकुला' इति च्छेदः । मृतेर्मरणस्य रेखा तस्याम् । उत्तरीयस्य संव्यानस्य । 'संव्यानमुत्तरीयं च' इत्यमरः । विरच्य कृत्वा । मर्तुं कामो यस्याः सा । 'तुं काममनसोरपि' इत्यनुस्वारलोपः । वाचो माधुरी माधुर्यं तया विरसीकृतोऽधरीकृतः कलकण्ठः कोकिलो यया सा । व्यलपत् । रुरोदेत्यर्थः । लावण्येनोपमितः पुष्पसायको मदनो येन तत्संबुद्धौ । भूनायक धराङ्गनाभर्तः । भाविन्यागामिनि । वल्लभो रमणः । नीहारकरश्चन्द्रस्तस्य किरणानां मयूखानां निकरस्य समुदायस्य संपर्केण लब्धः प्राप्तोऽवबोधो येन सः । प्रकृतिमापन्न इत्यर्थः । मागधो मगधाधिपो राजहंसः । अगाधस्यादभ्रस्य रुधिरस्यासृजो विक्षरणं विशेषेण संचलनं तेन नष्टा चेष्टा यस्य सः निश्चिन्वानो निश्चयं कुर्वन् । ससंभ्रमं सादरम् । न मन्दोऽमन्दः । हृदयस्यानन्दो हृदयानन्दः । अमन्दश्चासौ हृदयानन्दश्चामन्दहृदयानन्दः तेन संफुल्लं सम्यग्विकसितं प्रसन्नं वदनारविन्दं मुखकमलं यस्याः सा । उपोषिताभ्याम् । जातोत्कण्ठाभ्यामित्यर्थः । अनिमिषिताभ्यां निमेषरहिताभ्याम् । विकस्वरेण समुन्मीलितेन । 'पिकस्वरेण' इति पाठे पिकस्य कोकिलस्य स्वर इव स्वरो यस्य तेन । उच्चैरिति क्रियाविशेषणम् । निटिलतटेन भालस्थलेन चुम्बितं निजचरणाम्बुजं यैस्तैः । 'गोधिर्ललाटमलिकं निटिलं भालमर्धकम्' इति पञ्चतत्त्वप्रकाशः । प्रशंसितं दैवमाहात्म्यं महिमा यैस्तैः । अभाणि । 'भण शब्दार्थः' इति धातोः कर्मणि लुङ् । रथ्यचयोऽश्वसमुदायः । सारथेरपगमो नाशस्तस्मिन् । रभसोद्वेगेन । निहतो निःशेषं हतः सैनिकग्रामो योधसमूहो यस्मिंस्तथाभूते संग्रामे युद्धे । आराधितः संतोषितः पुरारातिः शिवो येन तेन प्रहितया प्रेरितया दयया हीनस्तेन निशान्तः प्रभातं तत्संबन्धिना पवनेन वायुना । 'निशीत—' इति पाठे नितरां

म्बुजैः प्रशंसितदैवमाहात्म्यैरमात्यैरभाणि—'देव, रथ्यचयः सारथ्यपगमे रथं रभसादरण्यमनयत्' इति । 'तत्र निहतसैनिकग्रामे संग्रामे मालवपतिनाराधितपुरारातिना प्रहितया गदया दयाहीनेन ताडितो मूर्च्छामागत्यात्र वने निशान्तपवनेन बोधितोऽभवम्' इति महीपतिरकथयत् । ततो विरचितमहेन मन्त्रिनिवहेन विरचितदैवानुकूल्येन कालेन शिबिरमानीयापनीताशेषशल्यो विकसितनिजाननारविन्दो राजा सहसा विरोपितव्रणोऽकारि । विरोधिदैवधिक्कृतपुरुषकारो दैन्यव्याप्ताकारो मगधाधिपतिरधिकाधिकाधिरमात्यसंमत्या मृदुभाषितया वसुमत्या मत्या कलितया च समबोधि—'देव, सकलस्य भूपालकुलस्य मध्ये तेजोवरिष्ठो गरिष्ठो भवानद्य विन्ध्यवनमध्यं निवसतीति जलबुद्बुदसमाना विराजमाना संपत्तडिल्लतेव सहसैवोदेति नश्यति च । तन्निखिलं दैवायत्तमेवावधार्यं कार्यम् । किंच पुरा हरिश्चन्द्रामचन्द्रमुख्या असंख्या महीन्द्रा ऐश्वर्योपमितमहेन्द्रा दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेककालं निजराज्यमकुर्वन् । तद्वदेव भवान्भविष्यति । कंचन कालं विरचितदैवसमाधिस्तिष्ठतु तावत्' इति ।

शीत इति पवनविशेषणम् । 'निशीथ–' इति पाठेऽपि निशीथोऽर्धरात्रस्तत्संबन्धिनेति । विरचितो महः पूजासत्कारो येनेति तथा । मन्त्रिणां निवहो वृन्दं तेन । विरचितं कृतं दैवानुकूल्यं येन तेन । शिबिरं सेनाया वासस्थानम् । 'तल' इति भाषायाम् । अपनीतान्युद्धृतान्यशेषानि शल्यानि सर्वाणि बाणाग्राणि शङ्कवो वा यस्य सः । शलति गच्छतीति शल्यम् । 'वा पुंसि शल्यं शंकुर्ना' इत्यमरः । विरोपिताश्चिकित्सिता व्रणा यस्य सः । अकारि । 'डुकृञ् करणे' इत्यस्य कर्मणि लुङ् । विरोधिनाननुकूलेन दैवेन भागधेयेन धिक्कृतः पुरुषकारो विक्रमः । पौरुषमिति यावत् + यस्य सः । दैन्येन खेदेन व्याप्त आकारो यस्य सः । अतिशयेनाधिक आधिर्मनोव्यथा यस्य तथा । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । अमात्यानां संमतिस्तया । मृदु भाषितं यस्यास्तया । कलितया युक्तया । समबोधि । कर्मणि लुङ् । तेजसा वरिष्ठः । अतिशयेन गुरुर्गरिष्ठः । 'प्रियस्थिर–' इत्यादिना 'वर् गर्' इत्यादेशाः । जलस्य बुद्बुदो विकारस्तत्समाना तत्सदृशा । तडिल्लता विद्युत् । सहसाकस्मात् । उदेत्युद्गच्छति दृक्पथमायाति । नश्यत्यदर्शनतामेति । निखिलं सर्वम् । दैवायत्तं दैवाधीनम् । अवधार्यं निर्णेतव्यम् । हरिश्चन्द्र रामचन्द्र इति प्रसिद्धराजनामानि, एतौ मुख्यौ येषां ते । ऐश्वर्येण विभवेनोपमितस्तुल्यीकृतो महेन्द्रो देवराजो यैस्ते । दैवतन्त्रं दैवचालितम् । दुःखयन्त्रं दुःखमेव यन्त्रं तत् ।

ततः सकलसैन्यसमन्वितो राजहंसस्तपोविभ्राजमानं वामदेवनामानं तपोधनं निजाभिलाषावाप्तिसाधनं जगाम । तं प्रणम्य तेन कृतातिथ्यस्तस्मै कथितकथ्यस्तदाश्रमे दूरीकृतश्रमे कंचन कालमुषित्वा निजराज्याभिलाषी मितभाषी सोमकुलावतंसो राजहंसो मुनिमभाषत—' भगवन्, मानसारः प्रबलेन दैवबलेन मां निर्जित्य मद्भोग्यं राज्यमनुभवति । तद्वदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन भवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्नवम् ' इति । ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत्—' सखे, शरीरकार्श्यकारिणा तपसालम् । वसुमतीगर्भस्थः सकलरिपुकुलमर्दनो राजनन्दनो नूनं संभविष्यति, कंचन कालं तूष्णीमास्स्व ' इति गगनचारिण्यापि वाण्या ' सत्यमेतत् ' इति तदैवावोचि । राजापि मुनिवाक्यमङ्गीकृत्यातिष्ठत् ।

ततः संपूर्णगर्भदिवसा वसुमती सुमुहूर्ते सकललक्षणलक्षितं सुतमसूत। ब्रह्मवर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालंकारेण च विराजमानं राजवाहननामानं

विरचिता दैवसमाधिर्येन तथा । गत आधिर्यस्य सः । **तत इति** । समन्वितो युक्तः । तपसा विशेषेण भ्राजतेऽसौ तम् । तप एव धनं यस्य तम् ॥ निजोऽभिलाषस्तस्यावाप्तिः प्राप्तिस्तस्य साधनं साधनभूतम् । जगाम । 'गम्लृ गतौ' इत्यस्य लिटि रूपम् । कृतमातिथ्यं यस्य सः । कथितं निवेदितं कथ्यं कथयितुं योग्यं सर्वं येनैतादृशः । **तस्याश्रम इति** । दूरीकृतः श्रमो यत्रैतादृशे । उषित्वा । 'वस निवासे' । क्त्वो रूपम् । 'ग्रहिज्या—' इति संप्रसारणम् । 'वसतिक्षुधोरिट्' इतीडागमः । 'शासिवसिघसीनां च' इति षत्वम् । सोमकुलस्य चन्द्रवंशस्यावतंसो भूषणं ललामभूतः । मानसार इति राजनाम । मया भोग्यं भोक्तव्यम् । 'भोज्यं भक्ष्ये' (भोग्यमन्यत्) इति जकारस्य गकारः । अरातिं शत्रुम् । 'अभिघातिपराराति—' इत्यमरः । उन्मूलयिष्याम्युन्मूलयितुमुद्यतोऽस्मि । लोकानां शरणे रक्षणे साधु तेन । नियमवन्तं व्रतिनम् । त्रिकालज्ञो भूतभविष्यद्वर्तमानकालगतं जानातीति तथा । सखे इति कोमलामन्त्रणम् । शरीरस्य देहस्य कार्श्यं कृशस्य भावस्तत्करोतीति तेन तपसालम् । तपो मानुतिष्ठेति भावः । नूनं निश्चितम् । तूष्णीं जोषम् । आस्स्व तिष्ठेत्यर्थः । गगनचारिण्याशरीरिण्या । **तत इति** । संपूर्णा गर्भदिवसा नव मासा नव दिवसाश्च यस्याः सा । सुमुहूर्ते उत्तममुहूर्ते काले । सकललक्षणैर्लक्षितं युक्तम् । ब्रह्मणो वर्चो ब्रह्मवर्चसम् । 'ब्रह्महस्तिभ्यां वर्चसः' इत्यच् । तुलितो वेधा ब्रह्मा येन तम् । 'स्रष्टा प्रजापतिर्वेधाः' इत्यमरः । पुरोधसमुपाध्यायम् । पुरस्कृत्याग्रे कृत्वा । कृत्यं वेत्तीति तथा ।

व्यधत्त । तस्मिन्नेव काले सुमतिसुमित्रसुमन्त्रसुश्रुतानां मन्त्रिणां प्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुताख्या महदभिख्या सूनवो नवोद्यदिन्दुरुचश्चिरायुषः समजायन्त । राजवाहनो मन्त्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्धत ।

अथ कदाचिदेकेन तापसेन रसेन राजलक्षणविराजितं कंचिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि—'भूवल्लभ' कुशसमिदानयनाय वनं गतेन मया काचिदशरण्या व्यक्तकार्पण्याश्रु मुञ्चन्ती वनिता विलोकिता । 'निर्जने वने किंनिमित्तं रुद्यते त्वया' इति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य सगद्गदं मामवोचत्—'मुने, लावण्यजितपुष्पसायके मिथिलानायके कीर्तिव्यापृतसुधर्मणि निजसुहृदो मगधराजस्य सीमन्तिनीसीमन्तमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कंचन कालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात् । तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन

जातसंस्कारेण जननकालेऽनुष्ठितसंस्कारेण बालार्हैरलंकारैश्च । विराजमानं विशेषेण शोभमानम् । व्यधत्त कृतवान् । सुमतीति मन्त्रिनामानि । प्रमतीति सुतनामानि । महत्यभिख्या शोभा येषां ते । 'महदभिख्याः' इति प्रयोगश्चिन्त्यः । नवः प्रातिपदिकः । उद्यन्नुद्गच्छन् । इन्दुश्चन्द्रः । 'उन्दी क्लेदने' इति धातुः । तस्य रुक्कान्तिर्येषां तैः । चिरायुषश्चिरंजीविनः । अथेति । तापसेन मुनिना । रसेन रागेण । 'रसो गन्धरसे जले । शृंगारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः' इति मेदिनी । अवोचि । कर्मणि लुङ् । कुशाश्च समिधश्च तेषामानयनं तस्मै । नास्ति शरण्यं रक्षिता यस्याः सा । 'शरणं गृहरक्षित्रोः' इत्यमरः । व्यक्तं कार्पण्यं दैन्यं यस्याः सा । मुञ्चन्तीत्यत्र तुदादित्वाद्वैकल्पिको नुम् । निर्जने जनसंचाररहिते । करावेव सरोरुहाणि तैः । करसरोरुहाभ्यामिति वक्तव्यम् । प्रमृज्य । 'मृजू शुद्धौ' इति धातुः । ल्यबन्तम् । सगद्गदं सगद्गदस्वरेण । लावण्ये सौन्दर्ये जितः पुष्पसायको मदनो येन तस्मिन् । कीर्त्या व्यापृता सुधर्मा देवसभा येन तथा । 'धर्मादनिच्केवलात्' इति धर्मशब्दस्य धर्मन् । निजसुहृदः स्वमित्रस्य सीमन्तिनी वधूस्तस्यासीमन्तमहोत्सवो गर्भिण्यवस्थायामनुष्ठातव्यस्य सीमन्तोन्नयनाख्यसंस्कारस्योत्सवस्तदर्थे । 'चतुर्थे गर्भमासे सीमन्तोन्नयनम्' इति सूत्रम् । सीमन्तो यस्मिन्कर्मण्युन्नीयते तत्सीमन्तोन्नयनम्' । पुत्रश्च दाराश्च पुत्रदारास्तैः समन्विते युक्ते । 'उपान्वध्याङ्वसः' इत्यनेन कालस्य कर्मत्वम् । समाराधितः सम्यक्पूजितः संतोषितो वा गिरीशः शिवो येन सः । अभ्यगात् । 'इण् गतौ' इति धातुः । संख्ये युद्धे ।

विसृष्टो हातावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत् । ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो मूलबलाभिरक्षितावरोधः स महानिरोधः पलायिष्ट । तदीयार्भकयोर्यमयोर्धात्रीभावेन परिकल्पिताहं मद्दुहितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमे अभूव । तत्र विवृतवदनः कोऽपि रूपी कोप इव व्याघ्रः शीघ्रं मामाघ्रातुमागतवान् । भीताहमुदग्रग्राव्णि स्खलन्ती पर्यपतम् । मदीयपाणिभ्रष्टो बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत । तच्छ्रवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान्बाणो बाणासनयन्त्रमुक्तोऽपाहरत । विलोलालको बालकोऽपि शबरैरादाय कुत्रचिदुपानीयत । कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गता न जाने । साहं मोहं गता केनापि कृपालुना वृष्णिपालेन स्वकुटीरमावेश्य विरोपितव्रणाभवम् । ततः स्वस्थीभूय भूयः क्ष्माभर्तुरन्तिकमुपतिष्ठासुरसहायतया दुहितुरनभिज्ञाततया च व्याकुलीभवामि ' इत्यभिदधाना ' एकाकिन्यपि

'मृधमास्कन्दनं संख्यम्' इत्यमरः । सुहृदः साहाय्यकम् । साहाय्यमेव साहाय्यकम् । स्वार्थे कप् । निजबले आत्मसैन्ये । विदेहे । मृत इत्यर्थः । ' असति विधेये ' इति पाठे ' विधेयो विनयग्राही ' इति कोशाद्विनयातिक्रमणशील इति भावः । विदेहानामीश्वरः प्रभुः । शून्येन रिक्तेन । ' शुनः संप्रसारणम् वा च दीर्घत्वम् ' इति यत् । दुःखेन गन्तुं शक्यो दुर्गस्तेन । अधिकं बलं यस्य तेन । शबराणां बलं सैन्यं तेन । रभसोद्वेगेन । अभिहन्यमानः । कर्मणि शानच् । मूलबलं प्रधानसैन्यं तेनाभिरक्षितोऽवरोधः शुद्धान्तो येन सः । महान्निरोधो यस्य तथा । पलायिष्ट । ' अय गतौ ' इति धातुः । परेत्युपसर्गस्थरस्य स्थाने 'उपसर्गस्यायतौ' इति लादेशः । लुङ् । तस्येमौ तदीयौ च तावर्भकौ तयोः । यमयोः सहजातयोः । धात्र्या उपमातुर्भावस्तेन । तीव्रा गतिर्यस्य तम् । अक्षमे अभूव । प्रगृह्यत्वान्न संधिः । विवृतं व्यात्तं वदनं येन सः । रूपी मूर्तः । आघ्रातुं नाशयितुम् । उद्गतान्यग्राणि यस्यैतादृशो यो ग्रावा तस्मिन् । ' उदग्रपाणिः ' इति पाठ उदग्रः पाणिर्यस्याः सेत्यहमित्यस्य विशेषणं द्रष्टव्यम् । भ्रष्टश्च्युतः । कपिलाया गोः शवः कुणपस्तस्य । क्रोडमंकदेशम् । अभ्यलीयत प्रच्छन्नोऽभूत् । बाणासनं धनुस्तदेव यन्त्रं तस्मान्मुक्तः । अपाहरज्जहार । विलोलाश्चञ्चला अलकाश्चूर्णकुन्तला यस्य सः । शबरैर्वनवासिभिः । आदाय गृहीत्वा । कुत्रचिदनिर्दिष्टे । अज्ञात इति यावत् । उद्वहन्ती धारयन्ती । सेति पूर्वनिर्दिष्टा मोहं गता विगतसंज्ञा । वृष्णिपालेन मेषपालेन । स्वकुटीरं स्ववासगृहम् । आवेश्य । णिजन्ताल्लयप् । भूयः पुनः । क्ष्माभर्तुर्नरेन्द्रस्य । उपतिष्ठासुरुपस्थातुमिच्छुः । असहायतया सहायाभावेन । अभिदधानाभिधत्तेऽसौ । एकाकिन्यसहाया । तदैव तस्मिन्नेव क्षणे विषादं खेदम् । तस्यान्वयो

स्वामिनं गमिष्यामि ' इति सा तदैव निरगात् + अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवंस्तदन्वयांकुरं कुमारमन्विष्यंस्तदैकं चण्डिकामन्दिरं सुन्दरं प्रागाम् । तत्र संततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः ' महीरुहशाखावलम्बितमेनमसिलतया वा, सैकततले खननिक्षिप्तचरणं लक्षीकृत्य शितशरनिकरेण वा, अनेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंशयित्वा संहनिष्यामः ' इति भाषमाणा मया समभ्यभाष्यन्त—' ननु किरातोत्तमाः, घोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचिदन्तरमगच्छम् । स कुत्र गतः, केन वा गृहीतः परीक्ष्यापि न वीक्ष्यते । तन्मुखावलोकनेन विनानेकान्यहान्यतीतानि । किं करोमि क्व यामि, भवद्भिर्न किमदर्शि' इति । 'द्विजोत्तम, कश्चिदत्र तिष्ठति । किमेष तव नन्दनः सत्यमेव । तदेनं गृहाण' इत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन् । तेभ्यो दत्ताशीरहं बालकमङ्कीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि । एवमायुष्मन्तं पितृरूपो भवानभिरक्षतात्' इति । राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किंचिदधरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष ।

वंशस्तस्यांकुरः प्ररोहः । चण्डिकाया मन्दिरमायतनम् । एवं विधा प्रकारो यस्य तादृशो यो विजयस्तस्य सिद्धिस्तस्यै देवताया उपाहारस्तम् । महीरुहो वृक्षस्तस्य शाखायामवलम्बितम् । असिलता खड्गः । इदं केचित्किराता आहुः । सिकताप्रचुरं सैकतम् । सैकतं च तत्तलं च । खननेन विक्षिप्तौ भूमौ कीलितौ चरणौ यस्य तम् । शितास्तीक्ष्णाश्च ते शराश्च तेषां निकरेण । इदमन्ये । अनेकचरणैरिति कुक्कुरबालकैरित्यस्य विशेषणम् । पलायमानमेनं बालकम् । दंशयित्वा दंशं कारयित्वा । 'ददंशयित्वा' इति पाठे यङन्तप्रयोगः । इदमप्यपरे किरातोत्तमाः । प्रार्थनानुकूलमेतत्सम्बोधनम् । घोरः प्रचारः संचारो यस्मिंस्तथा । कान्तारे दुर्गमे वर्त्मनि स्खलितः पन्था यस्य सः । ' ऋक्पूरब्धूःपथामानक्षे ' । पथिन् इत्यस्य पथः । स्थविरो वृद्धः । भूसुरो भुवि पृथ्व्यां सुरो द्विजः । निक्षिप्य संस्थाप्य । मार्गस्यान्वेषणं गवेषणम् । मुखालोकनेन विना । ' पृथग्विना— ' इति तृतीया । अतीतानि गतानि । अदर्शि । ' दृशिर् प्रेक्षणे ' । कर्मणि लुङ् । गृहाण । ' ग्रह उपादाने ' । लोटो रूपम् । दैवस्यानुकूल्यं तेन । व्यतरन्नददुः । दत्ताशीर्येन सः शिशिरं शीतम् । निःशंकामिति क्रियाविशेषणम् । भवदंकं भवन्निकटम् । अभिरक्षतात् । 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति तातङ् । अधरीकृत्य दूरीकृत्य तनुकृत्य

2 जनपतिरेकस्मिन्पुण्यदिवसे तीर्थस्नानाय पङ्कणनिकटमार्गेण गच्छन्नबलया कयाचिदुपलालितमनुपमशरीरं कुमारं कंचिदवलोक्य कुतूहलाकुलस्तामपृच्छत्—'भामिनि, रुचिरमूर्तिः स राजगुणसंपूर्तिरसावर्भको भवदन्वयसंभवो न भवति, कस्य नयनानन्दनः, निमित्तेन केन भवदधीनो जातः कथ्यतां याथातथ्येन त्वया' इति। प्रणतया तया शबर्या सलीलमलापि—'राजन्, आत्मपल्लीसमीपे पदव्यां वर्तमानस्य शक्रसमानस्य मिथिलेश्वरस्य सर्वस्वमपहरति शबरसैन्ये मद्दयितेनापहृत्य कुमार एष मह्यमर्पितो व्यवर्धत' इति। तदवधार्य कार्यज्ञो राजा मुनिकथितं द्वितीयं राजकुमारमेव निश्चित्य सामदानाभ्यां तामनुनीयापहारवर्मेत्याख्याय देव्यै 'वर्धय' इति समर्पितवान्। ✗ ४-८-९१

3 कदाचिद्ग्रामदेवशिष्यः सोमदेवशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत—'देव, रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि—'स्थविरे, का त्वम्। एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसि' इति। वृद्धयाप्यभाषि—

वा। पुपोष वृद्धिं नीतवान्। **जनपतिरिति**। पुण्यदिवसे पर्वणि। तीर्थे स्नानं तीर्थस्नानं तस्मै। पङ्कणः शबरालयः। एवमेव कोशः। अबलया स्त्रिया। उपलालितं प्रेमविधृतमनुपमं शरीरं यस्य तथा। कुतूहलेन कौतुकेनाकुलो व्याप्तः। भामिनि कोपने। अत्र तु केवलस्त्रीवाचकोऽयं शब्दः। कोपकारणाभावात्। रुचिरा सुन्दरा मूर्ती रूपं यस्येति तथा। राज्ञो गुणास्तेषां संपूर्तिस्तत्सहितः अन्वयो वंशः। नयने आनन्दयति तथा। कस्य सूनुरित्यर्थः। निमित्तेन कारणेन। भवदधीनस्त्वदायत्तः। याथातथ्येन तत्त्वतः। प्रकर्षेण नता तया। अलापि। गोपालग्राम 'लप व्यक्तायां वाचि'। कर्मणि लुङ्। पल्ली घोषः। पदव्यां मार्गे। 'पन्थानः पदवी सृतिः' इत्यमरः। शक्र इन्द्रः। मिथिलेश्वरस्य मिथिलाधिपस्य प्रहारवर्मणः। सर्वस्वं सर्वद्रव्यम्। 'स्वोऽस्त्रियां धने' इत्यमरः। अपहरति। शत्रन्तस्य सप्तमी। दयितेन वल्लभेन। भर्त्रेत्यर्थः। व्यवर्धत वृद्धिं प्राप्तः। अवधार्य। विमृश्येत्यर्थः। कार्यं जानातीति तथा। साम च दानं च ताभ्याम्। अनुनीय संतोष्य। आख्याय नाम कृत्वा। **कदाचिदिति**। रामतीर्थ एतन्नाम्नि क्षेत्रे। प्रत्यागच्छता प्रतिनिवर्तमानेन। काननावनावरण्यभुवि। वनितया योषिता। 'वनिता महिला तथा' इत्यमरः। उज्ज्वलो दीप्तिमान्। स्थविरे वृद्धे इति संबुद्धिः। 'प्रवयाः स्थविरो वृद्धः' इति कोशः। अटव्यरण्यम्। आयासेन कष्टेन। मुनिवर ऋषिश्रेष्ठ। धनाढ्यो धनसमृद्धः। वैश्यवरो वणिक्श्रेष्ठः। नन्दिनीं कन्याम्। नयनयोरानन्दं करोति तथा।

'मुनिवर, कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्माद्द्वीपादागतो मगधनाथमन्त्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसंपदा श्वशुरेण संमानितोऽभूत् । कालक्रमेण नताङ्गी गर्भिणी जाता । ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललोचनयानया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत् । गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यानायि' इति । तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं समीपलतागुल्मके प्रविश्य परीक्ष- सोमदेवशर्मा

मन्त्रिसंभवो मन्त्रिणः पुत्रः । रमणीयगुणानामालयो वसतिस्थानम् । भ्रान्तं भुवो वलयं चक्रं येनेति तथा । मनोहारी मनोज्ञः । अभिराम इत्यर्थः । व्यवहारी वाणिज्यकर्ता । उपयम्य विवाहं कृत्वा । सुवस्तुसंपदा शोभनवस्तुसमृद्धया । संमानितः पूजितः । सत्कृत इति यावत् । नतान्यवनम्राण्यङ्गान्यस्यास्तया । सोदरः समानोदर्यः । 'समानोदर्यसोदर्य–' इति कोशः । चपले लोचने यस्यास्तया । प्रवहणं नावम् । अभिप्रतस्थे । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । कल्लोला महातरङ्गाः । 'महत्सूल्लोलकल्लोलौ' इत्यमरः । तेषां मालिकाः परम्परास्ताभिरभिहतस्ताडितः । पोतो नौः । अमज्जत् । 'टुमस्जो शुद्धौ' इति धातोर्लङ् । गर्भस्य भरो भारस्तेनालसां जडाम् । ललना स्त्री । धात्रीभावेनोपमातृत्वेन परां काष्ठामतिशयम् । असूत । 'षूङ् प्राणिगर्भविमोचने' लङ् । प्रसवकाले या वेदना तया । विचेतना निःसंज्ञा । नष्टचेष्टेत्यर्थः । प्रच्छायेन शीतलेन । 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः । विजने निर्जने । जनपदः नीवृत् । देश इति यावत् । विवशा विह्वला । विकलेत्यर्थः । आनायि । 'णीञ् प्रापणे' इत्यस्य आङ्पूर्वस्य कर्मणि लुङ् । 'चिण् भावकर्मणोः' इति चिण् । वने भवो वन्यः । वारणो गजः । 'कुञ्जरो वारणः करी' इत्यमरः । अदृश्यत । कर्मणि लङ् । 'दृशिर् प्रेक्षणे' इति धातुः । निपात्य प्रच्याव्य । प्राद्रवदधावत् । द्रुतगत्यापासरादित्यर्थः । लता व्रततिः । गुल्मकेऽप्रकाण्डे । स्वार्थेऽल्पार्थे वा कः ।

माणोऽतिष्ठम् । निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेण न्यपतत् । भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत् । चिरायुष्मत्तया स चोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत् । सोऽपि मर्कटः क्वचिदगात् । बालकेन सत्त्वसंपन्नतया सकलक्लेशसहेनाभावि । केसरिणा करिणं निहत्य कुत्रचिदगामि । लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मि' इति । सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा 'रत्नोद्भवः कथमभवत्' इति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय, सुश्रुताय, विषादसंतोषावनुभवंस्तदनुजतनयं समर्पितवान् । ४-८-९१

४/ अन्येद्युः कंचन बालकमुरसि दधती वसुमती वल्लभमभिगता । तेन 'कुत्रत्योऽयम्' इति पृष्टा समभाषत—'राजन्, अतीतायां रात्रौ

परीक्षमाणः परित ईक्षमाणः । कवलं ग्रासम् । 'ग्रासस्तु कवलः पुमान्' इत्यमरः । कण्ठीरवः सिंहः । 'कण्ठीरवो मृगरिपुः' इत्यमरः । भीमो भयंकरो रवो यस्य स तथा । महाग्रहेण महतावेशेन । चिरायुष्मत्तया दीर्घायुषो भावस्तया । उन्नतस्योच्छ्रितस्य । 'आसन्नोन्नत–' इति पाठे आसन्नः समीपवर्ती । पक्वफलबुद्ध्या पक्वं फलं किमप्येतदिति भ्रान्त्या । फलादितरदिति दृष्ट्वा । विततं विस्तृते स्कन्धस्य प्रकाण्डस्य मूले । मर्कटो वानरः । सत्त्वेन संपन्नस्तस्य भावस्तया । सकलक्लेशसहेनाखिलक्लेशसहिष्णुना । अभावि । 'भू सत्तायाम्' कर्मणि लुङ् । केसरी मृगेन्द्रः । कुत्रचिदनिर्दिष्टे स्थले लतागृहात्कुञ्जात् । तेजसः पुञ्जं राशिम् । अवन्यां रोहतीत्यवनीरुहो वृक्षस्तस्मात् । अवतार्य । 'तॄ प्लवनतरणयोः' । णिजन्ताल्ल्यप् । अन्यद्वनं वनान्तरं तस्मिन् । एनम् । अन्वादेश इदं रूपम् । निदेशेनाज्ञया । एकदैवैकस्मिन्नेव काले । समभित्यर्थः । **अनुकूलेति** । दैवस्य प्रातिकूल्येनेत्यर्थः । 'महत् आश्चर्यम्' इति भिन्ने पदे । बिभ्राणः । 'डुभृञ् धारणपोषणयोः' । कर्तरि शानच् । **रत्नोद्भव इति** । रत्नोद्भवस्य का गतिः । किमभवदित्यर्थः । नामधेयं नाम । 'भागरूपनामभ्यो धेयः' इति धेयप्रत्ययः । विधाय कृत्वा उदन्तं वार्ताम् । 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः । व्याख्याय कथयित्वा, रत्नोद्भवस्य नाशाद्विषादः तन्नन्दनस्य च लाभात्संतोषः । अनु पश्चाज्जातोऽनुजः । **अन्येद्युरिति** । अन्येद्युरपरेद्युः । 'सद्यःपरुत्परार्यैषमः–' इति निपातः । उरसि दधती लालयन्ती । अभ्यस्तत्वान्नुमभावः । कुत्र भवः कुत्रत्यः । 'अद्ययात्त्यप्' इति

काचन दिव्यवनिता मत्पुरतः कुमारमेवं संस्थाप्य निद्रामुद्रितां तां विबोध्य विनीताब्रवीत्—'देवि, त्वन्मन्त्रिणो धर्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकान्ताहं तारावली नाम, नन्दिनी मणिभद्रस्य। यक्षेश्वरानुमत्या मदात्मजमेतं भवत्तनूजस्याम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य भाविनो विशुद्धयशोनिधे राजवाहनस्य परिचर्याकरणायानीतवत्यस्मि। त्वमेनं मनोजसंनिभमभिवर्धय' इति। विस्मयविकसितनयनया मया सविनयं सत्कृता स्वक्षी यक्षी साप्यदृश्यतामयासीत्' इति। कामपालस्य यक्षकन्यासंगमे विस्मयमानमानसो राजहंसो रञ्जितमित्रं सुमित्रं मन्त्रिणमाहूय तदीयभ्रातृपुत्रमर्थपालं विधाय तस्मै सर्वं वार्तादिकं व्याख्यायादात्।

ततः परस्मिन्दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्तिं निर्भर्त्सितमारमूर्तिं कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवादीत्—'देव, तीर्थयात्राप्रसङ्गेन कावेरीतीरमागतोऽहं विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदतीं स्थविरामेकां विलोक्यावोचम्—'स्थविरे, का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किम्' इति। सा करयुगेन बाष्पजलमुन्मृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत्—'द्विजात्मज, राजहंसमन्त्रिणः सि-

---

त्यप्। अतीतायां गतायाम्। दिवि भवा दिव्या सा चासौ वनिता। निद्रया मुद्रितां निमीलितनेत्राम्। विबोध्य प्रबोधं कृत्वा। विनीता नम्रा। यक्षेश्वरः कुबेरः। तनूजस्य सूनोः। 'तनुजस्तनूजः' इति द्विरूपकोशः। अम्भोनिधिः समुद्रः। स एव वलयः कटकस्तेन वेष्टितं क्षोणीमण्डलं धरामण्डलं तस्येश्वर ईशिता तस्य। भाविनो नाद्यापि भूतस्य। विशेषेण शुद्धो यशसो निधिर्यस्य तस्य। परिचर्या शुश्रूषा। मनोजः कामः। संनिभः सदृशः। विस्मयेनाश्चर्येण विकसिते नयने नेत्रे यस्यास्तया। सविनयमिति क्रियाविशेषणम्। 'सविनया' इति पाठे यक्षीविशेषणम्, सत्कृता। संमानिता स्वक्षी शोभननयना। अदृश्यतामयासीत्। गताभूदित्यर्थः। यक्षकन्या संगमस्तस्मिन्। विस्मयमानं मानसं यस्य तथा। रञ्जितानि मित्राणि येन तम्। आहूय। ह्वेञः संप्रसारणम्। आकार्य। आनाय्येत्यर्थः। तत इति। अन्तेवासी शिष्यः। 'छात्रान्तेवासिनौ शिष्ये' इत्यमरः। अन्ते वसतीति तथा। समाराधिता देवकीर्तिर्येन तम्। निर्भर्त्सिता स्वरूपेण मारस्य कंदर्पस्य मूर्तिर्येन तम्। कुसुममिव सुकुमारं पेलवम्। अवगमय्य प्रापय्य। यात्रा गमनम्। प्रसङ्गेन क्रमेण। कावेरी दक्षिणदेशस्था काचिन्नदी। विलोलाश्चञ्चला अलका यस्य

तवमर्णः कनीयानात्मजः सत्यवर्मा तीर्थयात्रामिषेण देशमेनमागच्छत् । स कस्मिंश्चिदग्रहारे कालीं नाम कस्यचिद्भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत । काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामितस्यामक्षिपत् । करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशि । मदवलम्बीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत् । गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते' इति । ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत् । दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यथामपनेतुमक्षमः । समीपकुञ्जेष्वौषधिविशेषमन्विष्य प्रत्यागतो व्युत्क्रान्तजीवितां तां व्यलोकयम् । तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बालमेनमगतिमादाय सत्यवर्मवृत्तान्तश्रवणवेलायां तन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयम्' इति । तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान् । सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष ।

तम् । उत्सङ्गोऽङ्कः । रुदतीमश्रु मुञ्चतीम् । स्थविरामिति गतार्थम् । 'कान्तारं वर्त्म दुर्गमम्' इत्यमरः । युगेन द्वन्द्वेन । बाष्पजलमश्रूणि । निजशोक एव शंकुः शल्यं तस्योत्पाटनं तत्क्षमं समर्थम् । कनीयान् । 'युवाल्पयोः कन्नन्यतरस्याम्' इति कनादेशः । आत्मजः पुत्रः । अग्रहारे नृपात्प्रतिग्रहेण लब्धभूमिप्रदेशे ग्रामादौ वा । भूसुरस्य द्विजस्य । विवाह्य परिणीय । सासूयमिति क्रियाविशेषणम् । धात्र्युपमाता । मिषेण व्याजेन । तटिन्यां नद्याम् । प्लवमाना तरन्ती । भोगी सर्पः । अदंशि । कर्मणि लुङ् । भूरुहो वृक्षः । गरलस्य विषस्य । उद्दीपनतया प्रबलतरतया । शरण्यो रक्षिता । विषमं दुर्धरम् । अविषह्यमित्यर्थः । विषज्वालाभिरवलीढा व्याप्ता अवयवा यस्याः सा । धरणी पृथ्वी । दययाविष्टं हृदयं यस्यैतादृशः । मन्त्रबलेन मन्त्रसामर्थ्येन । अपनेतुं दूरीकर्तुम् । कुञ्जेषु निकुञ्जेषु । 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः । व्युत्क्रान्तजीवितां मृताम् । तदनु ततः । पावकसंस्कारं विरच्याग्निसंस्कारं कृत्वा । चिताधिरोपणेन तस्याः शरीरमग्निसात्कृत्वेत्यर्थः । शोकेनाकुलं चेतो यस्य तथा । अगतिमशरण्यम् । अनाथमित्यर्थः । सोदरं भ्रातरम् ।

एवं मिलितेन कुमारमण्डलेन बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चौलोपनयनादिसंस्कारजातमलभत। ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यं षडङ्गसहितवेदसमुदायकोविदत्वं काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्मशब्दज्योतिस्तर्कमीमांसादिसमस्तशास्त्रनिकरचातुर्यं कौटिल्यकामन्दकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं संगीतसाहित्यहारित्वं मणिमन्त्रौषधादिमायाप्रपञ्चचञ्चुत्वं मातङ्गतुरङ्गादिवाहनारोहणपाटवं विविधायुधप्रयोगचणत्वं चौर्यदुरोदरादिकपटकलाप्रौढत्वं च तत्तदाचार्येभ्यः सम्यग्लब्ध्वा यौवनेन विलसन्तं कृत्येष्वनलसं तं कुमारनिकरं निरीक्ष्य महीवल्लभः सः 'अहं शत्रुजनदुर्लभः' इति परमानन्दममन्दमविन्दत।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते कुमारोत्पत्तिर्नाम प्रथम उच्छ्वासः।

एवमिति। मिलितेनैकत्र समावपतितेन। कुमारमण्डलेन कुमारसमुदायेन। केलीः क्रीडाः। अधिरूढान्यनेकवाहनानि येन सः। चौलं चोपनयनं च चौलोपनयने एते आदी यस्य तत्संस्कारजातम्। चौलमुपनयनमन्यसंस्कारांश्चेत्यर्थः। तत्र चौलं चूडाकर्म। 'तृतीये वर्षे चौलं यथाकुलधर्मं वा' इति सूत्रम्। जन्मप्रभृति तृतीये वर्षे कुलधर्ममादृत्यान्यस्मिन्वा केशसंनिवेशानां करणम्। उपनयनं प्रसिद्धम्। लिपिरक्षरसंस्थानं तस्य ज्ञानम्। षडङ्गसहितस्य वेदसमुदायस्य कोविदत्वं ज्ञातृत्वम्। 'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः। छन्दसां विचितिश्चैव षडङ्गो वेद उच्यते' इति। काव्यानि रघुवंशकिरातादीनि। नाटकानि शाकुन्तलरत्नावल्यादीनि। आख्यानकानि चूर्णकानि। आख्यायिकाः कादम्बरीवासवदत्तादयः। इतिहासः पुरावृत्तकथनम्। चित्रकथा रम्यकथाः। एतैः सर्वैः सहिते पुराणगणे ब्राह्माग्न्यादिपुराणसमुदाये नैपुण्यम्। धर्मशास्त्रं स्मृतयः। शब्दशास्त्रं व्याकरणम्। ज्योतिःशास्त्रं प्रसिद्धम्। तर्कशास्त्रं न्यायः। मीमांसा पूर्वोत्तरभेदेन प्रसिद्धं शास्त्रम्। निकरः समूहः कौटिल्यश्चाणक्यस्तत्प्रणीतं कामन्दकीयमिति प्रसिद्धम्। दाक्ष्यं दक्षता। साहित्यं शिल्पं नृत्यादिकलाः। हारित्वं मनोहारित्वम्। मायाप्रपञ्चः कपटप्रबन्धः। चञ्चुत्वं कुशलत्वम्। 'तेन वित्तश्चञ्चुप्चणपौ' इति चञ्चुप्। मातङ्गो गजः। तुरङ्गोऽश्वः। पाटवं पटोर्भावः। चणत्वं कौशलम्। 'तेन वित्तः—' इति चणप्। दुरोदरं द्यूतम्। तत्तदार्येभ्यस्तेषु तेषु शास्त्रेषु निष्णातेभ्य आचार्येभ्य इत्यर्थः। विलसन्तं शोभमानम्। अनलसमुद्यमशीलम्। महीवल्लभो राजा राजहंसः॥ **इति श्रीदशकुमारचरितपूर्वपीठिकायां पददीपिकाभिधायां प्रथम उच्छ्वासः॥**

द्वितीयोच्छ्वासः ।

अथैकदा वामदेवः सकलकलाकुशलेन कुसुमसायकसंशयितसौन्दर्येण कल्पितसोदर्येण साहसापहसितकुमारेण सुकुमारेण जयध्वजातपवारणकुलिशाङ्कितकरेण कुमारनिकरेण परिवेष्टितं राजानमानतशिरसं समभिगम्य तेन तां कृतां परिचर्यामङ्गीकृत्य निजचरणकमलयुगलमिलन्मधुकरायमाणकाकपक्षं विदलिष्यमाणविपक्षं कुमारचयं गाढमालिङ्ग्य मितसत्यवाक्येन विहिताशीरभ्यभाषत—'भूवल्लभ, भवदीयमनोरथफलमिव समृद्धलावण्यं तारुण्यं नुतमित्रो भवत्पुत्रोऽनुभवति । सहचरसमेतस्य नूनमेतस्य दिग्विजयारम्भसमय एषः । तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयप्रयाणं क्रियताम्' इति । कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः । तत्साचिव्यमितरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते सपरिवारं कुमारं विजयाय विससर्ज ।

अथेति । सकलकलासु कुशलस्तेन । कुसुमसायकः कामः । संशयितं संशयाकुलम् । कल्पितं रचितं सोदर्यं बन्धुता । सादृश्यमिति यावत् । येन तथा । साहसेनापहसितो धिक्कृतः कुमारो गुहो येन सः । जयध्वजः पताका । आतपवारणं छत्रम् । कुलिशं वज्रम् । एतैः रेखामात्रैरंकितौ करौ यस्य तेन । परिवेष्टितं परिवृतम् । आनतं शिरो यस्य तम् । अङ्गीकृत्य प्रतिपद्य । निजौ । (अर्थाद्वामदेवस्य) चरणौ तावेव कमले तयोर्युगलं तस्मिन्मिलन्तः संयुक्ता ये मधुकरा इवाचरन्तः काकपक्षाः शिखण्डकाः (अर्थात्कुमाराणां) यस्य तम् । विदलिष्यमाणा उद्धरिष्यमाणविपक्षाः शत्रवो येन तम् । चयं समुदायम् । गाढं निर्भरम् । मितं च सत्यं च यद्वाक्यं तेन । 'सत्यं मृदु प्रियम्' इति सत्यशब्दप्रयोगः । विहिता आशीर्येन सः । भवदीयानां मनोरथानामिच्छानां फलम् । समृद्धं संबद्धं लावण्यं यस्मिन् । नुतानि मित्राणि येन सः । सहचराः सखायः । नूनं निश्चयेन । दिशां विजयस्तस्यारम्भस्तस्य समयः कालः । सकलक्लेशसहस्य सत्त्वशीलसंपन्नत्वात् । **दिग्विजयप्रयाणमिति** । दिग्विजयं कर्तुमयं प्रहीयतामित्यर्थः । मारः कंदर्प इवाभिरामाः सुन्दराः । रामो दाशरथिः स आद्यो येषां ते रामाद्यास्तेषां पौरुषमिव पराक्रम इव पौरुषं येषां ते । रुषा क्रोधेन भस्मीकृता नाशिता अरयः शत्रवो यैः । रयेण वेगेन । आवेशेनेति यावत् । उपहसितो न्यक्कृतः समीरणो वायुर्यैः । रणमभियातीत्येतादृशेन । यानेन गमनेन । अभ्युदयस्य वृद्धेराशंसा विद्यते यस्य तम् । साचिव्यं सचिवस्य भावस्तथा इतरेषां कुमाराणाम् । मुहूर्ते समये । परिवारेण सहितम् । विजयाय । ' तुमर्थाच्च

राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन्देशं कंचिदतिक्रम्य विन्ध्याटवीमध्यमविशत्। तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श। तेन विहितपूजनो राजवाहनोऽभाषत—'ननु मानव, जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति। भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति। हेतिहतिभिः किरातरीतिरनुमीयते। कथय किमेतत्' इति। 'तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवति' इति मत्वा स पुरुषस्तद्वयस्यमुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत्—'राजनन्दन, केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रातं परिहृत्य किल्बिषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणब्रुवा निवसन्ति, तेषु कस्यचित्पुत्रो निन्दापात्रचारित्रो मातङ्गो नामाहं सह किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीयाटव्यां बन्धने निधाय तेषां सकलधनमपहरन्नुद्धृत्य वीतदयो व्यचरम्। कदाचिदेकस्मिन्कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रुवम्—'ननु पापाः, न हन्तव्यो ब्राह्मणः' इति। ते रोषारुणनयना मां बहुधा निरभर्त्सयन्। तेषां

भाववचनात्' इति चतुर्थी। विजयं कर्तुमित्यर्थः। विससर्ज विसृष्टवान्। **राजवाहन इति**। मंगलं शुभोदर्कं सूचयति तथा। शुभशकुनं निमित्तम्। अतिक्रम्य गत्वा। हेतिभिः शस्त्रैर्या हतिः प्रहारस्तस्य किणाः व्रणजाचिह्नानि तेषामंका यस्मिन्। कालायसं लोहं तदिव कर्कशः कठिनः कायो देहो यस्य तथा। यज्ञोपवीतेनेति प्रसिद्धम्। अनुमातुं योग्यो विप्रभावो विप्रत्वं यस्येति तथा। व्यक्तः स्पष्टः किरातप्रभावो वनचरबलं यस्य। लोचनयोः परुषं कर्कशम्। दुर्दर्शनमिति यावत्। विहितं कृतं पूजनं सत्कारो यस्य सः। जनसंगेन रहिते विवर्जिते। मृगेभ्यो हितमनुकूलं तस्मिन्। घोरः प्रचारः संचारो यस्मिन्निति तथा। एकाक्येकः। 'एकादाकिनिच्चासहाये' इत्याकिनिच्प्रत्ययः। असौ भुजाशिरः। उपनीतं गतं प्राप्तम्। भूसुरभावं विप्रत्वम्। द्योतयति प्रकटयति। हेतिहतिभिः शस्त्रप्रहारचिह्नैः। किरातरीतिर्वनचरवृत्तिः। अनुमीयत ऊह्यते तर्क्यते। तेजोमयः स्तेजःप्रचुरः। 'तत्प्रकृतवचने मयट्' इति मयट्। मानुषमात्रं मानुषप्रमाणं पौरुषं पराक्रमो यस्येति तथा। 'प्रमाणे द्वयसज्दघ्नञ्' इति प्रमाणार्थे मात्रच्। वयस्या मित्राणि। नाम च जननं च ते विज्ञाय विशेषतो ज्ञात्वा। वेदादि। आदिश-

भाषणपारुष्यमसहिष्णुरहमवनिसुररक्षणाय चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम् । ततः प्रेतपुरीमुपेत्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दण्डप्रणाममकरवम् । सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजामात्यमाहूय तमवोचत्—सचिव, नैषोऽमुष्य मृत्युसमयः । निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत् । इतः प्रभृति विगलितकल्मषस्यास्य पुण्यकर्मकरणे रुचिरुदेष्यति । पापिष्ठैरनुभूयमानमत्र यातनाविशेषं विलोक्य पुनरपि पूर्वशरीरमनेन गम्यताम्' इति । चित्रगुप्तोऽपि तत्रतत्र संतप्तेष्वायसस्तम्भेषु बध्यमानान्, अत्युष्णीकृते विततशरावे तैले निक्षिप्यमाणान्, लगुडैर्जर्जरीकृतावयवान्, निशितटङ्कैः परितक्ष्यमाणानपि दर्शयित्वा पुण्यबुद्धिमुपदिश्य माममुञ्चत् । तदेव पूर्वशरीरमहं प्राप्तो महाटवीमध्ये शीतलोपचारं रचयता महीसुरेण परीक्ष्यमाणः शि-

---

ब्देन स्मृतिपुराणादीनि गृह्यन्ते । अपहाय त्यक्त्वा । निजकुलाचारं विप्रगृहीतधर्मान् । दूरीकृत्य पृष्ठतः कृत्वा । सत्यमवितथभाषित्वम् । शौचं शुचित्वम् । आदिशब्देन दयादमशान्तिक्षान्त्यादि गृह्यते । धर्मव्रातं कुलधर्मसमुदायम् । 'स्तोमौघनिकरव्रात ' इत्यमरः । परिहृत्य वर्जयित्वा । किल्बिषं पापम् । ' पापं किल्बिषकल्मषम् ' इत्यमरः । पुलिन्दा म्लेच्छजातिष्वेका जातिः । ते पुरोगमा नेतारो येषां ते । उपभुञ्जाना भक्षयन्तः । ब्राह्मणब्रुवा ब्राह्मणाधमाः । कुत्सनार्थेऽत्र ब्रुवपदम् । निन्दापात्रं गर्ह्यं चारित्रं यस्यैतादृशः । बलेन सैन्येन । जनपदं नीवृतम् । बन्धने निधाय कारागृहे क्षिप्त्वा । उद्धृत्य । वीता दया यस्य सः । जिघांस्यमानं हन्तुमिष्यमाणम् । रोषेणारुणानि रक्तवर्णानि नयनानि येषां ते । बहुधा बहुविधम् । निरभर्त्सयंस्तर्जितवन्तः । भाषणपारुष्यं कठोरवचांसि । असहिष्णुः सोढुमसमर्थः । ' अलंकृञ्निराकृञ्–' इतीष्णुच् । अवनिसुरो विप्रस्तस्य रक्षणाय तं रक्षितुम् । प्रयुध्य युद्धं कृत्वा । अभिहतस्ताडितः । गतजीवितोऽभवं म्रिये । प्रेतपुरीं यमनगरीम् । रत्नैः खचितं प्रत्युप्तं यत्सिंहासनं तत्रासीनम् । शमनं यमम् । 'शमनो यमराड्यमः' इत्यमरः । दण्डप्रणामं दण्डवद्भूमौ शयित्वा प्रणाममित्यर्थः अमात्यं मन्त्रिणम् । निन्दितं चरितं यस्येति तथा । इतः प्रभृतीत आरभ्य । विगलितं नष्टं कल्मषं पापं यस्य तस्य । 'पापं कील्बिषकल्मषम् ' इत्यमरः । पुण्यकर्मणः करणे । रुचिः प्रीतिः । उदेष्यत्युत्पत्स्यते । अतिशयेन पापाः पापिष्ठाः । ' अतिशायने तमबिष्ठनौ ' इतीष्ठन् । यातनाः कारणाः । तास्ता यातना इत्यर्थः । अयस इमे आयसाश्च ते स्तम्भास्तेषु । विततो विस्तीर्णो यः शरावः पात्रविशेषः । 'कढई' इति भाषायाम् । तद्वते तैले स्नेहमध्ये निक्षिप्यन्ते तादृशान् । लगुडैः

लायां शायितः क्षणमतिष्ठम्। तदनु विदितोदन्तो मदीयवंशबन्धुगणः सहसागत्य मन्दिरमानीय मामपक्रान्तव्रणमकरोत्। द्विजन्मा कृतज्ञो मह्यमक्षराशिक्षां विधाय विविधागमतन्त्रमाख्याय कल्मषक्षयकारणं सदाचारमुपदिश्य ज्ञानेक्षणगम्यमानस्य शशिखण्डशेखरस्य पूजाविधानमभिधाय पूजां मत्कृतामङ्गीकृत्य निरगात्। तदारभ्याहं किरातकृतसंसर्गं बन्धुकुलवर्गमुत्सृज्य सकललोकैकगुरुमिन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने दूरीकृतकलङ्को वसामि। देव, भवते विज्ञापनीयं रहस्यं किंचिदस्ति। आगम्यताम्' इति। स वयस्यगणादपनीय रहसि पुनरेनमभाषत—'राजन्, अतीते निशान्ते गौरीपतिः स्वप्नसंनिहितो निद्रामुद्रितलोचनं विबोध्य प्रसन्नवदनकान्तिः प्रश्रयानतं मामवोचत्—'मातङ्ग, दण्डकारण्यान्तरालगामिन्यास्तटिन्यास्तीरभूमौ सिद्धसाध्याराध्यमानस्य स्फटिकलिङ्गस्य पश्चाद्रतिपतिकन्यापदपङ्क्तिचिह्नितस्याश्मनः सविधे विधेराननमिव किमपि बिलं विद्यते। तत्प्रविश्य तत्र निक्षिप्तं

काष्ठदण्डैः जर्जरीकृताः। अर्थात्प्रहारैः। अवयवा येषां तान्। निशितास्तीक्ष्णास्तेजिताष्टङ्काः पाषाणदारणास्तैः परितक्ष्यमाणान्परितस्तक्षणेन तनूक्रियमाणान्। पुण्या चासौ बुद्धिश्च ताम्। शीतलश्वासावुपचारस्तम्। रचयता कुर्वता। महीसुरेण विप्रेण। तदनु तदनन्तरम्। विदित उदन्तो वार्ता येन तथा अपक्रान्ताश्चिकित्सिता व्रणाः प्रहारस्थानानि यस्य तादृशः। द्विजन्मा विप्रः। कृतं जानातीति कृतज्ञः। अक्षराणां शिक्षोपदेशः। विविधागमेषु शास्त्रेषु तन्त्रं प्रधानम्। आख्याय कथयित्वा। कल्मषस्य पापस्य यः क्षयस्तस्मिन्कारणं निमित्तभूतम्। सदाचारं साद्भिरुपदर्शितं मार्गम्। ज्ञानेक्षणेन न तु चर्मचक्षुषा गम्यमान आसाद्य प्राप्यस्तस्य। शशिनः खण्डः कला सा शेखरोऽवतंसो यस्य तस्य। धूर्जटेरित्यर्थः। विधानं विधिम्। अभिधाय कथयित्वा। तदारभ्य ततः प्रभृति किरातैः कृतः संसर्गो येन तथा। सकललोकानामेकं मुख्यं गुरुम्। इन्दुकलावतंसः शिरोभूषणं यस्य तम्। चेतसि स्मरन्ध्यायन्। काननेऽरण्ये। दूरीकृतकलंको निष्पापः। रहस्यं गुह्यम्। वयस्यगणान्मित्रमण्डलात्। अपनीय दूरं नीत्वा। रहस्येकान्ते। निशाया अन्ते। गौर्याः पतिः शिवः। स्वप्ने संवेशे। संनिहितः संनिकर्षं प्राप्तः। निद्रया मुद्रिते निमीलिते लोचने यस्य तम्। प्रसन्ना वदनकान्तिर्यस्य तथा। प्रश्रयेण विनयेनानतं प्रह्वम्। अन्तरालं मध्यम्। तटिन्या नद्याः। सिद्धाश्च साध्याश्च तैराराध्यमानस्य पूज्यमानस्य। 'पिशाचो गुह्यकः सिद्धः', 'महाराजिकसाध्याश्च' इत्युभयत्राप्यमरः। तत्र सिद्धा देवयोनिविशेषाः, साध्या गणदेवताः। स्फटिकलिंगस्य स्फटिकनिर्मितलिंगस्य विशिष्टाकृतेः शंकरशरीरस्य। अद्रिपतिर्हिमालय-

ताम्रशासनं शासनं विधातुरिव यमादाय विधिं तदुपदिष्टं दिष्टविजयमिव विधाय पाताललोकाधीश्वरेण भवता भवितव्यम् । भवत्साहाय्यकरो राजकुमारोऽद्य श्वोवा समागमिष्यति' इति । तदादेशानुगुणमेव भवदागमनमभूत् । साधनाभिलाषिणो मम तोषिणो रचय साहाय्यम्' इति । 'तथा' इति राजवाहनः साकं मातङ्गेन नमितोत्तमाङ्गेन विहायार्धरात्रे निद्रापरतन्त्रं मित्रगणं वनान्तरमवाप । तदनु तदनुचराः कल्ये साकल्येन राजकुमारमनवलोकयन्तो विषण्णहृदयास्तेषु तेषु वनेषु सम्यगन्विष्यान्वेक्षमाणा एतदन्वेषणमनीषया देशान्तरं चरिष्णवोऽतिसहिष्णवो निश्चितपुनःसंकेतस्थानाः परस्परं वियुज्य ययुः । X 4/6/91

लोकैकवीरेण कुमारेण रक्ष्यमाणः संतुष्टान्तरङ्गो मातङ्गोऽपि बिलं शशिशेखरकथिताभिज्ञानपरिज्ञातं निःशङ्कं प्रविश्य गृहीतताम्रशासनो रसातलं पथा तेनैवोपेत्य तत्र कस्यचित्पत्तनस्य

स्तत्कन्या पार्वती तस्याः पदपङ्क्त्या चिह्नितस्य अश्मनो ग्राव्णः । सविधे समीपे । विधेर्ब्रह्मणः । आननं मुखम् । निक्षिप्तं स्थापितम् । ताम्रशासनं ताम्रपट्टं शासनमाज्ञा । विधातुर्ब्रह्मणः । सामादाय गृहीत्वा । विधिं कल्पम् । तदुपदिष्टं तेन ताम्रशासनेनोपदिष्टम् । 'तदुपरिष्टम्' इति पाठे तदुपरि तिष्ठतीत्यसौ तम् । दिष्टमद्रष्टम् । पाताललोकोऽधोभुवनम् । अधीश्वरः । 'राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः' इत्यमरसिंहः । अनुगुणमनुरूपम् । साधनं सिद्धिमभिलषतीति तथा । तोषिण आनन्दयुक्तस्य । रचय । कुर्वित्यर्थः । साकमित्यव्ययं सहेत्यर्थे । नमितमुत्तमाङ्गं शीर्षं येन तेन । 'उत्तमाङ्गं शिरः शीर्षम्' इत्यमरः । विहाय त्यक्त्वा । अर्धरात्रे निशीथे । निद्रापरतन्त्रं निद्राधीनम् । अनुचराः सचिवा अनुगामिनः । कल्ये प्रातःकाले । 'प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि' इत्यमरः । साकल्येन समग्रतः । विषण्णं खिन्नं हृदयं येषां ते तेष्वखिलेषु । मनीषया बुद्धया । 'बुद्धिर्मनीषा धिषणा' इत्यमरः । चरिष्णवो गन्तुमनसः । 'अलंकृञ्–' इतीष्णुच् प्रत्ययः । पुनःसंगमः पुनः संगमस्तस्य संकेतस्थानम् । निश्चितं निर्णीतं पुनःसंगमसंकेतस्थानं यैस्ते । वियुज्य वियुक्ता भूत्वा । ययुः । 'या प्रापणे' इत्यस्य लिट् । **लोकैकेति** । लोकेष्वेकवीरः प्रधानयोधः । रक्ष्यमाणः । कर्मणि शानच् । संतुष्टान्तरङ्गो हृष्टमनाः । शशिशेखरो महादेवः । अभिज्ञानं चिह्नम् । निःशङ्कं शंकारहितम् । रसातलं पातालम् । 'अधोभुवनपातालं बलिसद्म रसातलम्' इत्यमरः । पथा । तृतीयेयम् । पत्तनं नगरम् । 'पत्तनं पुटभेदनम्' इत्यमरः । केलीकाननं क्रीडावनम् । कासारः सरः । 'कासारः सरसी सरः' इत्यमरः । विततता बहवः सारसाः पक्षिविशेषा यत्र । 'विगत–' इति पाठे नष्टा इत्यर्थः । नानाविधेनानेक-

निकटे केलीकाननकासारस्य विततसारसस्य समीपे नानाविधे-नेशशासनविधानोपपादितेन हविषा होमं विरच्य प्रत्यूहपरिहारिणि सविस्मयं विलोकयति राजवाहने समिदाज्यसमुज्ज्वलिते ज्वलने पुण्यगेहं देहं मन्त्रपूर्वकमाहुतीकृत्य तडित्समानकान्ति दिव्यां तनुमलभत । तदनु मणिमयमण्डनमण्डलमण्डिता सकललोकललनाकुलललामभूतकन्यका काचन विनीतानेकसखीजनानुगम्यमाना कलहंसगत्या शनैरागत्यावनिसुरोत्तमाय मणिमेकमुज्ज्वलाकारमुपायनीकृत्य तेन 'का त्वम्' इति पृष्टा सोत्कण्ठा कलकण्ठस्वनेन मन्दंमन्दमुदञ्जलिरभाषत-'भूसुरोत्तम, अहमसुरोत्तमनन्दिनी कालिन्दी नाम । मम पितास्य लोकस्य शासिता महानुभावो निज-पराक्रमासहिष्णुना विष्णुना दूरीकृतामरे समरे यमनगरातिथिरकारि । तद्वियोगशोकसागरमग्नां मामवेक्ष्य कोऽपि कारुणिकः सिद्धतापसोऽभाषत—'बाले, कश्चिद्दिव्यदेहधारी मानवो नवो वल्लभस्तव भूत्वा सकलं रसातलं पालयिष्यति' इति। तदादेशं निशम्य घनशब्दोन्मुखी चातकी वर्षागमनमिव तवालोकनकाङ्क्षिणी चिरमतिष्ठम् । मन्मनोरथफलायमानं भवदागमनमवगम्य मद्राज्यावलम्बभूतामात्यानुमत्या मदनकृतसारथ्येन मनसा भवन्तमागच्छम् । लोकस्यास्य

तस्यासुरस्य

प्रकारेण । ईशः शिवः । विधानं विधिः । उपपादितेन संपादितेन । हविषा हूयते तद्धविस्तेन आज्यादिद्रव्येण । विरच्य कृत्वा । प्रत्यूहो विघ्नः । 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः । विलोकयति सति । समिधश्चाज्यं च तैः समुज्ज्वलिते दीपिते । ज्वलनेऽग्नौ । पुण्यस्य गेहं वसतिस्थानम् । देहविशेषणम् । समन्त्रपूर्वकं समन्त्रम् । आहुतीकृत्याग्नौ क्षिप्त्वा । तडिद्विद्युत् । दिव्यां देवतार्हाम् । तनुं शरीरम् । मणिमयानि मणिप्रचुराणि । 'तत्प्रकृतवचने मयट्' इति मयट् । मण्डनानि भूषणानि । मण्डितोपशोभिता । ललामभूता भूषणभूता । विनीता नम्रा । कलहंसस्य गत्या । मन्थरगत्येत्यर्थः । अवनिसुरोत्तमाय द्विजश्रेष्ठाय । उज्ज्वलाकारं दीप्तम् । उपायनीकृत्य । उपायनं दत्त्वेत्यर्थः । उत्कण्ठया सहिता । कलकण्ठः कोकिलः । उदञ्जलिः प्रबद्धाञ्जलिः । शासिता पालकः । महानुभावः प्रभावो यस्यैतादृशः । असहिष्णुना सहनासमर्थेन । दूरीकृताः । पराजिता इति यावत् । अमरा देवा यस्मात् । यमनगरस्यातिथिः प्राघूर्णकोऽकारि कृतः । हत इत्यर्थः । तेन वियोगस्तस्मादुद्भूतो यः शोकः स एव सागरस्तस्मिन्मग्ना । कारुणिकोऽनुकम्पावान् । सिद्धतापसो हस्तधृतसिद्धिस्तपस्वी । वल्लभो रमणः । घनशब्दो मेघशब्दः । उन्नतं मुखं यस्या इति तथा । वर्षाणां प्रावृष आगमनम् । फलायमानं फलवदाचरति तथा । मम राज्यस्यावलम्बभूतानाममात्यानामनुमत्या । मदनेन कृतं सारथ्यं

राजलक्ष्मीमङ्गीकृत्य मां तत्सपत्नीं करोतु भवान्' इति। मातङ्गोऽपि राजवाहनानुमत्या तां तरुणीं परिणीय दिव्याङ्गनालाभेन हृष्टतरो रसातलराज्यमुररीकृत्य परमानन्दमाससाद। वयस्यगण

वञ्चयित्वा वयस्यगणं समागतो राजवाहनस्तदवलोकनकौतूहलेन भुवं गमिष्णुः कालिन्दीदत्तं क्षुत्पिपासादिक्लेशनाशनं मणिं साहाय्यकरणसंतुष्टान्मातङ्गाल्लब्ध्वा कंचनाध्वानमनुवर्तमानं तं विसृज्य विलपथेन तेन निर्ययौ। तत्र च मित्रगणमनवलोक्य भुवं बभ्राम। भ्रमंश्च विशालोपशल्ये कमप्याक्रीडमासाद्य तत्र विशिश्रमिषुरान्दोलिकारूढं रमणीसहितमाप्तजनपरिवृतमुद्याने समागतमेकं पुरुषमपश्यत्। सोऽपि परमानन्देन पल्लवितचेता विकसितवदनारविन्दः 'मम स्वामी सोमकुलावतंसो विशुद्धयशोनिधी राजवाहन एषः। महाभाग्यतयाकाण्ड एवास्य पादमूलं गतवानस्मि। संप्रति महान्नयनोत्सवो जातः' इति ससंभ्रममान्दोलिकाया अवतीर्य सरभसपदविन्यासविलासिहर्षोत्कर्षचरितस्त्रिचतुरपदान्युद्गतस्य चरणकमलयुगलं गलदुल्लसन्मल्लिकावलयेन मौलिना पस्पर्श। प्रमोदाश्रुपूर्णो राजा पुलकिताङ्गं तं गाढमालिङ्ग्य 'अये सौम्य सोमदत्त' इति व्याजहार। ततः कस्यापि पुंनागभूरुहस्य छायाशीतले तले संविष्टेन मनुजनाथेन सप्रणयमभाणि—'सखे, कालमेतावन्तं देशे कस्मिन्, प्रकारेण केनास्थायि भवता, संप्रति कुत्र गम्यते, तरुणी केयम्, एष

मातङ्गम्

यस्यैतादृशा। समानः पतिर्यस्याः सा सपत्नी। तस्या राजलक्ष्म्याः सपत्नीम्। परिणीय विवाह्य। अतिशयेन हृष्टो हृष्टतरः। उररीकृत्य स्वीकृत्य। परमतिशयवन्तम्। आससाद प्राप्तवान्। 'षद्लृ विशरणगत्यवसादनेषु' इति धातोर्लिट्। **वञ्चयित्वेति**। वञ्चयित्वा प्रतार्य। कौतूहलेन कौतुकेन। कालिन्दी रसातलगतमातङ्गपत्नी। नाशयतीति नाशनस्तम्। अध्वानं मार्गम्। अनुवर्तमानमागच्छन्तम्। विसृज्य विसर्जयित्वा। उपशल्ये ग्रामान्ते। 'ग्रामान्तमुपशल्यं स्यात्' इत्यमरः। आक्रीडमुद्यानम्। 'पुमानाक्रीड उद्यानम्' इत्यमरः। विशिश्रमिषुर्विरमितुमिच्छुः। आन्दोलिका दोला। रमणी स्त्री। पल्लवितं विकसितम्। प्रसन्नमिति यावत्। चेतोऽन्तःकरणं यस्य तथा। विकसितं प्रफुल्लम्। अरविन्दं कमलम्। सोमकुलस्य चन्द्रवंशस्य। अवतंसो भूषणम्। विशुद्धोऽतिशुद्धो यशोनिधिर्यस्य। 'निधिः राजवाहनः' इति च्छेदः। महाभाग्यतयानुकूलदैववत्तया। अकाण्डे सहसा। ससंभ्रमं सत्वरं सादरं च। रभसेन सहेति सरभसः, सरभसो यः पदविन्यासस्तस्य यो विलासस्तद्वान्। हर्षोत्कर्षो हर्षातिरेकश्चरिते यस्य सः, पश्चात्कर्मधारयः। त्रिचतुरपदानि त्रीणि वा चत्वारि वा। उद्गतस्योद्यातस्य। मल्लिका पुष्पविशेषः। मौ-

बेला इति भाषायाम्

परिजनः संपादितः कथम्, कथय' इति। सोऽपि मित्रसंदर्शनव्यतिकरापगतचिन्ताज्वरातिशयो मुकुलितकरकमलः सविनयमात्मीयप्रचारप्रकारमवोचत्—

इति श्रीदण्डिनः कृतौ दशकुमारचरिते द्विजोपकृतिर्नाम द्वितीय उच्छ्वासः ॥

तृतीयोच्छ्वासः ।

'देव, भवच्चरणकमलसेवाभिलाषीभूतोऽहं भ्रमन्नेकस्यां वनावनौ पिपासाकुलो लतापरिवृतं शीतलं नदसलिलं पिबन्नुज्ज्वलाकारं रत्नं तत्रैकमद्राक्षम्। तदादाय गत्वा कंचनाध्वानमम्बरमणेरत्युष्णतया गन्तुमक्षमो वनेऽस्मिन्नेव किमपि देवतायतनं प्रविष्टो दीनाननं बहुतनयसमेतं स्थविरमहीसुरमेकमवलोक्य कुशलमुदितदयोऽहमपृच्छम्। कार्पण्यविवर्णवदनो महदाशापूर्णमानसोऽवोचदग्रजन्मा—'महाभाग, सुतानेतान्मातृहीनाननेकैरुपायै रक्षन्निदानीमस्मिन्कुदेशे भैक्ष्यं संपाद्य ददद्देतेभ्यो वसामि शिवालयेऽस्मिन्' इति। 'भूदेव, एतत्कटकाधिपती राजा कस्य देशस्य, किंनामधेयः, किमत्रागमनकारणमस्य' इति पृष्टोऽभाषत महीसुरः—'सौम्य, मत्तकालो नाम लाटेश्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसमानलावण्यं श्रावंश्रावमवधूतदुहितृप्रार्थनस्य तस्य नग-

---

लिना शीर्षेण। प्रमोदाश्रुभिः पूर्णः।पुलकितं हृषिततनूरुहमङ्गं यस्य तम्। गाढं दृढम्। सौम्यो मित्रम्। व्याजहारोवाच। पुंनागः केसरः। भूरुहो वृक्षः। संविष्टेनोपविष्टेन। व्यतिकरो व्यापारः। 'व्यतिकरः समाख्यातो व्यसनव्यतिषङ्गयोः' इति विश्वः। मुकुलितकरकमलः संयोजितकरयुगलः। बद्धाञ्जलिरिति यावत्। प्रचारो यात्रा भूभ्रमणम्। इति श्रीदशकुमारचरितपूर्वपीठिकाटीकायां पददीपिकाभिधायां द्वितीय उच्छ्वासः।

देवेति। वनावनौ काननभूमौ। पातुमिच्छा पिपासा तयाकुलः। नदेत्यदन्तशब्दः। उज्ज्वल आकारो यस्य तम्। अद्राक्षम्। लुङ्। अम्बरमणिः सूर्यः। देवतायतनं मन्दिरम्। दीनं दैन्यव्याप्तमाननं यस्य। समेतं युक्तम्। स्थविरो वृद्धः। महीसुरो द्विजः। उदितोत्पन्ना दया यस्य सः। कार्पण्यं कृपणस्य भावः। दैन्यमित्यर्थः। विवर्णं विगतवर्णं पाण्डु। महदाशेति प्रयोगश्चिन्त्यः। महति कार्ये याशा। अग्रजन्मा ब्राह्मणः। भैक्ष्यं भिक्षावृत्त्या संपादितमन्नादि। ददद्दहम्। कटकस्य निवेशितसैन्यस्य। किं नामधेयं यस्येति बहुव्रीहिः। लाट इति देशनाम। तरुणीषु रत्नम्। 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इति। असमानमनुपमं

नागकेशर- इति भाषा०

रीमरौत्सीत् । वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तकालायादात् । तरुणीलाभहृष्टचेता लाटपतिः 'परिणेया निजपुर एव' इति निश्चित्य गच्छन्निजदेशं प्रति संप्रति मृगयादरेणात्र वने सैन्यवासमकारयत् । कन्यासारेण नियुक्तो मानपालो नाम वीरकेतुमन्त्री मानधनश्चतुरङ्गबलसमन्वितोऽन्यत्र रचितशिबिरस्तं निजनाथावमानखिन्नमानसोऽन्तर्बिभेद'इति । विप्रोऽसौ बहुतनयो विद्वान्निर्धनः स्थविरश्च दानयोग्य इति तस्मै करुणापूर्णमना रत्नमदाम् । परमाह्लादविकसिताननोऽभिहितानेकाशीः कुत्रचिदग्रजन्मा जगाम । अध्वश्रमखिन्नेन मया तत्र निरवेशि निद्रासुखम् । तदनु पश्चान्निगडितबाहुयुगलः स भूसुरः कशाघातचिह्नितगात्रोऽनेकनैस्त्रिंशिकानुयातोऽभ्येत्य माम् 'असौ दस्युः' इत्यदर्शयत् । परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नियम्य रज्जुभिरानीय कारागारम् 'एते तव सखायः' इति निगडितान्कांश्चिन्निर्दिष्टवन्तो मामपि निगडितचरणयुगलमकार्षुः । किंकर्तव्यतामूढेन निराशक्लेशानुभवेनावोचि मया—'ननु परुषा वीर्यपुरुषाः, निमित्तेन केन निर्विशथ कारावासदुःखं दुस्तरम् । यूयं वयस्या इति निर्दिष्टमेतैः, किमिदम्' इति । तथाविधं मामवेक्ष्य

राजभटैः

लावण्यं सौन्दर्यं यस्य तत् । श्रावंश्रावमिति णमुलन्तमेतत् । असकृच्छ्रुत्वेत्यर्थः । 'आभीक्ष्ण्ये णमुल् च' इति णमुल् । अवधूता तिरस्कृता दुहितुः प्रार्थना तत्कृताभ्यर्थना येन । अरौत्सीदभियुयोज । उपायनं प्राभृतम् । परिपूर्वकः 'णीञ् प्रापणे' इति धातुर्विवाहार्थे वर्तते । मृगयादरेण मृगयानुरोधेन । कन्यासारेण कन्येव सारो धनं तेन । 'सारो बले स्थिरांशे च मज्जि पुंसि जले धने' इति मेदिनीकारः । मान एव धनं यस्येति तथा । शिबिरं सैन्यावासस्थानम् । 'तल' इति ख्यातम् । नाथः स्वामी राजा । बिभेद भेदं चकार । करुणापूर्णमना अहम् । अदाम् । 'डुदाञ् दाने' । लुङ् । 'गातिस्थाघु–' इति सिचो लुक् । अभिहिता उच्चारिताः । दत्ता इति यावत् । अनेकाशिषो येन सः । निरवेश्युपभुक्तम् । अहं निद्रावशोऽभवम् । अस्वपमित्यर्थः । पश्चात्पृष्ठदेशे निगडितं बाहुयुगलं यस्येति तथा । दत्तपश्चाद्बन्ध इत्यर्थः । भूसुरो विप्रः । कशाया कशया वा घात आघातो वा ताडनम् । 'अश्वादेस्ताडनी कशा' इत्यमरः । नैस्त्रिंशिकाः खड्गधारिणः । दस्युश्चौरः । परित्यक्तो बन्धनान्मुक्तो भूसुरो यैस्ते । रत्नस्यावाप्तेः प्रकारम् । रज्जुभिर्दोरकैः । कारागारं बन्धनगृहम् । निगडितान्बद्धान् । किंकर्तव्यतायां तद्विषये मूढः । किं कर्तव्यमित्यजानतेत्यर्थः । वीर्येण पराक्रमेण । परुषाः कठिनाः । निमित्तेन कारणेन । निर्विशथानुभविष्यथ । व्याख्याय कथयित्वा । चौराश्च ते वीराश्च ।

भूसुरान्मया श्रुतं लाटपतिवृत्तान्तं व्याख्याय चोरवीराः पुनरवोचन्-'महाभाग, वीरकेतुमन्त्रिणो मानपालस्य किंकरा वयम्। तदाज्ञया लाटेश्वरमारणाय रात्रौ सुरुङ्गाद्वारेण तदगारं प्रविश्य तत्र राजाभावेन विषण्णा बहुधनमाहृत्य महाटवीं प्राविशाम। अपरेद्युश्च पदान्वेषिणो राजानुचरा बहवोऽभ्येत्य धृतधनचयानस्मान्परितः परिवृत्य दृढतरं बद्ध्वा निकटमानीय समस्तवस्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्वधाय माणिक्यादानायास्मान्किलाश्रृङ्खलयन्' इति। श्रुतरत्नरत्नावलोकनस्थानोऽहम् 'इदं तदेव माणिक्यम्' इति निश्चित्य भूदेवदाननिमित्तां दुरवस्थामात्मनो जन्म नामधेयं युष्मदन्वेषणपर्यटनप्रकारं चाभाष्य समयोचितैः संलापैर्मैत्रीमकार्षम्। ततोऽर्धरात्रे तेषां मम च श्रृङ्खलाबन्धनं निर्भिद्य तैरनुगम्यमानो निद्रितस्य द्वाःस्थगणस्यायुधजालमादाय पुररक्षान्पुरतोऽभिमुखागतान्पटुपराक्रमलीलयाभिद्राव्य मानपालशिबिरं प्राविशम्। मानपालो निजकिंकरेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनं विक्रमं च निशम्य मामार्चयत्। परेद्युर्मत्तकालेन प्रेषिताः केचन पुरुषा मानपालमुपेत्य 'मन्त्रिन्, मदीयराजमन्दिरे सुरुङ्गया बहुधनमपहृत्य चौरवीरा भवदीयं कटकं प्राविशन्। तानर्पय। नो चेन्महानर्थः संभविष्यति' इति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य रोषारुणितनेत्रो मन्त्री 'लाटपतिः कः, तेन मैत्री का, पुनरस्य वराकस्य सेवया किं लभ्यम्' इति तान्निरभर्त्सयत्। ते च मानपालेनोक्तं विप्रलापं मत्तकालाय तथैवाकथयन्। कुपितोऽपि लाटपतिर्दोर्वीर्यगर्वेणाल्पसैनिकसमेतो योद्धुमभ्यगात्। पूर्वमेव कृतरणनिश्चयो मानी मानपालः संनद्धयोधो युद्धकामो भूत्वा निःशङ्कं निरगात्। अहमपि

सुरुङ्गा बिलपथः। अगारं गृहम्। राज्ञोऽभावस्तेन। विषण्णाः खिन्नाः। अपरेद्युरन्यस्मिन्दिवसे। पदानि पादप्रतिमास्ता अन्विष्यन्तीति पदान्वेषिणः। धृतो धनचयो यैस्तान्। शोधनमन्वेषणम्। अनर्घ्यममूल्यम्। महामूल्यमित्यर्थः। वधो नाशः। माणिक्यस्यादानं यावत्। अश्रृङ्खलयञ्छृङ्खलाभिर्निगडितानकुर्वन्। श्रुतं रत्नस्य रत्नावलोकनस्य च स्थानं येन सः। **भूदेवेति**। विप्रदानोद्भूताम्। दुरवस्थां संकटम्। नामधेयं नाम। युष्मच्छब्देन राजवाहनग्रहणम्। द्वारि तिष्ठन्ति ते द्वाःस्थास्तेषां गणस्तस्य। आयुधजालं समूहम्। पुररक्षान्पुररक्षणनियुक्तपुरुषान्। अभिद्राव्य प्रपलाय्य। तत्काले भवं तत्कालीनम्। प्रेषिताः प्रहिताः। भवदीयं युष्माकम्। रोषेणारुणिते नेत्रे यस्य तथा। वराकस्य नीचस्य निरभर्त्सयद्धिक्चकार। विप्रलापं विरोधोक्तिम्। दोर्वीर्यं भुजबलम्। सैनिका योद्धारः। कृतरण-

सबहुमानं मन्त्रिदत्तानि, बहुलतुरंगमोपेतं चतुरसारथिं रथं च दृढतरं कवचं मदनुरूपं चापं च विविधबाणपूर्णं तूणीरद्वयं, रणसमुचितान्यायुधानि गृहीत्वा युद्धसंनद्धो, मदीयबलविश्वासेन रिपूद्धरणोद्युक्तं मन्त्रिणमन्वगाम्। परस्परमत्सरेण तुमुलसंगरकरमुभयसैन्यमतिक्रम्य समुल्लसद्भुजाटोपेन बाणवर्षं तदङ्गं विमुञ्चन्नरातीन्प्राहरम्। ततोऽतिरयतुरंगमं मद्रथं तन्निकटं नीत्वा शीघ्रलङ्घनोपेततदीयरथोऽहमरातेः शिरःकर्तनमकार्षम्। तस्मिन्पतिते तदवशिष्टसैनिकेषु पलायितेषु नानाविधहयगजादिवस्तुजातमादाय परमानन्दसंनतो मन्त्री ममानेकविधां संभावनामकार्षीत्। मानपालप्रेषितात्तदनुचरादेनमखिलमुदन्तजातमाकर्ण्य संतुष्टमना राजाभ्युद्गतो मदीयपराक्रमे विस्मयमानः समहोत्सवममात्यबान्धवानुमत्या शुभदिने निजतनयां मह्यमदात्। ततो यौवराज्याभिषिक्तोऽहमनुदिनमाराधितमहीपालचित्तो वामलोचनयानया सह नानाविधं सौख्यमनुभवन्भवद्विरहवेदनाशल्यसुलभवैकल्यहृदयः सिद्धादेशेन सुहृज्जनावलोकनफलं प्रदेशं महाकालनिवासिनः परमेश्वरस्याराधनायाद्य पत्नीसमेतः समागतोऽस्मि। भक्तवत्सलस्य गौरीपतेः कारुण्येन त्वत्पदारविन्दसंदर्शनानन्दसंदोहो मया लब्धः' इति।

तन्निशम्याभिनन्दितपराक्रमो राजवाहनस्तन्निरपराधदण्डे दैवमुपालभ्य तस्मै क्रमेणात्मचरितं कथयामास। तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससंभ्रमं निजनिटिलतटस्पृष्टचरणाङ्गुलिमुदञ्जलिममुं गाढमालिङ्ग्यानन्दबाष्पसंकुलसंफुल्ललोचनः 'सौम्य सोमदत्त, अयं स पुष्पोद्भवः' इति तस्मै तं दर्शयामास। तौ च चिरविरहदुःखं विसृज्यान्योन्यालिङ्गनसुखमन्वभूताम्। ततस्तस्यैव

तुमुलयुद्धं करोति तम्

निश्चयः कृतयुद्धव्यवसायः। संनद्धाः सज्जाः वर्मिता इति यावत्। योधा यस्य सः। चतुरसारथिमिति बहुव्रीहिः। कवचं वर्म। 'चिलखत' इति भाषायाम्। तूणीर इषुधिः। 'भाता' इति ख्यातः। उद्धरणमुच्छेदः। तुमुलः संकुलः। संगरो युद्धम् समुल्लसन्त्यौ भ्राजमाने। भुजौ बाहू। आटोपो गर्वः। बाणानां वर्षो वृष्टिः। अरात्रीञ्छत्रून्। अतिरया वेगवन्तस्तुरंगमा यस्य तम्। लङ्घनमाक्रमणम्। तद्रथं गत्वेत्यर्थः। अरातेः शत्रोः। शिरःकर्तनमिति। शिरोऽच्छिनदमित्यर्थः। संनतो युक्तः। संभावनां सत्कारम्। अभ्युद्गतः संमानार्थं प्रत्युद्यातः। युवा चासौ राजा चेति युवराजः तस्य भावः। आराधितं संतोषितम्। शल्यं शंकुम्। वैकल्यं विह्वलत्वम्। महाकालेत्याख्यस्थले निवसतीति तम्। संदोहोऽतिशयः। लब्धः प्राप्तः। तदिति। निशम्य श्रुत्वा। अभिनन्दितः स्तुतः पराक्रमो येन। दैवम-

महीरुहस्य च्छायायामुपविश्य राजा सादरहासमभाषत—'वयस्य, भूसुरकार्यं करिष्णुरहं मित्रगणो विदितार्थः सर्वथान्तरायं करिष्यतीति निद्रितान्भवतः परित्यज्य निरगाम्। तदनु प्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेषणाय कुत्र गतवान्। भवानेकाकी कुत्र गतः' इति। सोऽपि ललाटतटचुम्बदञ्जलिपुटः सविनयमलपत।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते सोमदत्तचरितं नाम तृतीय उच्छ्वासः।

चतुर्थोच्छ्वासः।

'देव, महीसुरोपकारायैव देवो गतवानिति निश्चित्यापि देवेन गन्तव्यं देशं निर्णेतुमशक्नुवानो मित्रगणः परस्परं वियुज्य दिक्षु देवमन्वेष्टुमगच्छत्। अहमपि देवस्यान्वेषणाय महीमटन्कदाचिदम्बरमध्यगतस्याम्बरमणेः किरणमसहिष्णुरेकस्य गिरितटमहीरुहस्य प्रच्छायशीतले तले क्षणमुपाविशम्। मम पुरोभागे दिनमध्यसंकुचितसर्वावयवां कूर्माकृतिं मानुषच्छायां निरीक्ष्योन्मुखो गगनतलान्महारयेण पतन्तं पुरुषं कंचिदन्तराल एव दयोपनतहृदयोऽहमवलम्ब्य शनैरवनितले निक्षिप्य दूरापातवीतसंज्ञं तं शिशिरोपचारेण विबोध्य शोकातिरेकेणोद्गतबाष्पलोचनं तं भृगुपतनकारणमपृच्छम्। सोऽपि कररुहैरश्रुकणानपनयन्नभाषत—'सौम्य, मगधाधिनाथामात्यस्य पद्मोद्भवस्यात्मसंभवो रत्नोद्भवो नामाहम्। वाणिज्यरूपेण कालयवनद्वीपमुपेत्य कामपि वणिक्कन्यकां परिणीय तया सह प्रत्यागच्छन्नम्बुधौ तीरस्यानतिदूर एव प्रवहणस्य भग्नतया सर्वेषु निमग्नेषु कथंकथमपि दैवानुकूल्येन तीरभूमिमभिगम्य निजाङ्गनावियोगदुःखार्णवे प्लवमानः

दृष्टम्। उपालभ्य गर्हित्वा। निटिलं ललाटम्। अन्तरायं विघ्नम्। अलपद्वभाषे॥

इति श्रीदशकुमारचरितपूर्वपीठिकाटीकायां पददीपिकाभिधायां तृतीय उच्छ्वासः॥

देवेति। अम्बरमध्य आकाशमध्यः। अम्बरमणेः सूर्यस्य। दिनस्य दिवसस्य। संकुचिताः सर्वेऽवयवा यस्याः सा। रयेण वेगेन वीतसंज्ञं नष्टचेष्टम्। विबोध्य प्रकृतिमापाद्य। अतिरेकोऽतिशयः। भृगोः पतनस्य कारणं हेतुम्। 'प्रपातस्त्वतटो भृगुः' इत्यमरः। कररुहैर्नखैः। आत्मसंभवः पुत्रः। अम्बुधौ सागरे। प्रवहणस्य पोतस्य। कथं कथमपि महतायासेन। अङ्गना भार्या। हाय-

कस्यापि सिद्धतापसस्यादेशादरेण षोडश हायनानि कथंचिन्नीत्वा-
वसरे किमपि नारीकूजितमश्रावि—'न खलु समुचितमिदं यत्सि-
द्धादिष्टे पतितनयमिलने विरहमसहिष्णुर्वैश्वानरं विशसि' इति।
तन्निशम्य मनोविदितजनकभावं तमवादिषम्—'तात, भवते
विज्ञापनीयानि बहूनि सन्ति । भवतु । पश्चादखिलमाख्यातव्यम्।
अधुना नारीकूजितमनुपेक्षणीयं मया । क्षणमात्रमत्र भवता
स्थीयताम्' इति। तदनु सोऽहं त्वरया किंचिदन्तरमगमम्। तत्र
पुरतो भयंकरज्वालाकुलहुतभुगवगाहनसाहसिकां मुकुलिताञ्जलि-
पुटां वनितां कांचिदवलोक्य ससंभ्रममनलादपनीय कूजन्त्या
वृद्धया सह मत्पितुरभ्यर्णमभिगमय्य स्थविरामवोचम् 'वृद्धे,
भवत्यौ कुत्रत्ये। कान्तारे निमित्तेन केन दुरवस्थानुभूयते । क-
थ्यताम्' इति। सा सगद्गदमवादीत्—'पुत्र, कालयवनद्वीपे काल-
गुप्तनाम्नो वणिजः कस्यचिदेषा सुता सुवृत्ता नाम रत्नोद्भवेन निज-
कान्तेनागच्छन्ती जलधौ मग्ने प्रवहणे निजधात्र्या मया सह फल-
कमेकमवलम्ब्य दैवयोगेन कूलमुपेतासन्नप्रसवसमया कस्यांचिदट-
व्यामात्मजमसूत। मम तु मन्दभाग्यतया बाले वनमातङ्गेन गृहीते
मद्द्वितीया परिभ्रमन्ती 'षोडशवर्षानन्तरं भर्तृपुत्रसंगमो भविष्यति'
इति सिद्धवाक्यविश्वासादेकस्मिन्पुण्याश्रमे तावन्तं समयं नीत्वा शोकम-
पारं सोढुमक्षमा समुज्ज्वलिते वैश्वानरे शरीरमाहुतिकर्तुमुद्युक्तासीत्'
इति। तदाकर्ण्य निजजननीं ज्ञात्वा तामहं दण्डवत्प्रणम्य तस्मै मदु-
दन्तमखिलमाख्याय धात्रीभाषणफुल्लवदनं विस्मयविकसिताक्षं जन-
कमदर्शयम्। पितरौ तौ साभिज्ञानमन्योन्यं ज्ञात्वा मुदितान्तरात्मा-
नौ विनीतं मामानन्दाश्रुवर्षेणाभिषिच्य गाढमाश्लिष्य शिरस्युपाघ्राय
कस्यांचिन्महीरुहच्छायायामुपाविशताम्। 'कथं निवसति महीवल्ल-
भो राजहंसः' इति जनकेन पृष्टोऽहं तस्य राज्यच्युतिं त्वदीयजननं

मया रत्नो
द्भवेन पुष्पो
द्भवस्यापि-
-त्रा इति

नानि वत्सरान्। 'हायनोऽस्त्री शरत्समाः' इत्यमरः । कूजितं शब्दः। अश्रावि।
'श्रु श्रवणे'। कर्मणि लुङ्। समुचितं युक्तम् । योग्यमित्यर्थः । सिद्धेनादिष्टे क-
थिते। वैश्वानरं वह्निम्। मनसा विदितो जनकभावो यस्य तम्। विज्ञापनीयानि
विज्ञापयितुं योग्यानि। अनुपेक्षणीयमुपेक्षितुं न योग्यम्। ज्वालाभिराकुलः । हु-
तभुगग्निः। अवगाहनं प्रवेशः। अवगाहनसाहस उद्यतामित्यर्थः । अनलाद्वह्नेः।
अभ्यर्णं समीपम्। अभिगमय्य प्रापय्य। णिजन्ताल्ल्यप् । कुत्रत्ये कुत आगते।
दुरवस्था सव्यसनिता। सगद्गदं गद्गदस्वरेण। प्रवहणे पोते। धात्र्युपमाता। दैव-
मदृष्टम्। कूलं तीरम्। आसन्नः प्राप्तः प्रसवस्य समयो यस्याः सा । आत्मजं

सकलकुमारावाप्तिं तव दिग्विजयारम्भं भवतो मातङ्गानुयानम-
स्माकं युष्मदन्वेषणकारणं सकलमभ्यधाम् । ततस्तौ कस्यचिदाश्रमे
मुनेरस्थापयम् । ततो देवस्यान्वेषणपरायणोऽहमाखिलकार्यनिमित्तं
वित्तं निश्चित्य भवदनुग्रहाल्लब्धस्य साधकत्वस्य साहाय्यकरणदत्तं
शिष्यगणं निष्पाद्य विन्ध्यवनमध्ये पुरातनपत्तनस्थानान्युपेत्य विवि-
धनिधिसूचकानां महीरुहाणामधोनिक्षिप्तान्वसुपूर्णान्कलशान्सिद्धा-
ञ्जनेन ज्ञात्वा रक्षिषु परितःस्थितेषु खननसाधनैरुत्पाद्य दीनारान-
संख्यान्राशीकृत्य तत्कालगतमनतिदूरे निवेशितवणिक्कटकं कंचिद-
भ्येत्य तत्र बलिनो बलीवर्दान्गोणीश्च क्रीत्वान्यद्रव्यमिषेण वसु
तद्गोणीसंचितं तैरुह्यमानं शनैः कटकमनयम् । तदधिकारिणा
चन्द्रपालेन केनचिद्वणिक्पुत्रेण विरचितसौहृदोऽहममुनैव साकमु-
ज्जयिनीमुपाविशम् । मत्पितरावपि तां पुरीमभिगमय्य सकलगुण-
निलयेन बन्धुपालनाम्ना चन्द्रपालजनकेन नीयमानो मालवनाथद-
र्शनं विधाय तदनुमत्या गूढवसतिमकरवम् । ततः काननभूमिषु
भवन्तमन्वेष्टुमुद्युक्तं मां परममित्रं बन्धुपालो निशम्यावदत्—'सकलं
धरणीतलमपारमन्वेष्टुमक्षमो भवान्मनोग्लानिं विहाय तूष्णीं तिष्ठतु ।
भवन्नायकालोकनकारणं शुभशकुनं निरीक्ष्य कथयिष्यामि' इति । तल्ल-
पितामृताश्वासितहृदयोऽहमनुदिनं तदुपकण्ठवर्ती कदाचिदिन्दुमुखीं
नवयौवनावलीढावयवां नयनचन्द्रिकां बालचन्द्रिकां नाम तरुणीरत्नं

तनयम् । वनमातंगेन वन्यकरिणा । अहं द्वितीया सहायभूता यस्याः सा । ताव-
न्तं समयं षोडशाब्दान् । अक्षमासमर्था । समुज्ज्वलिते समिद्धे । वैश्वानरे वह्नौ ।
दण्डः काष्ठदण्डः । साष्टांगप्रणिपातं कृत्वेत्यर्थः । उदन्तं वार्ताम् । साभिज्ञानम-
न्योन्यप्रत्यभिज्ञादर्शकचिह्नानि दृष्ट्वा पृष्ट्वा च । मुदितो हृष्टोऽन्तरात्मा ययोस्तौ ।
विनीतं प्रश्रयावनतम् । च्युतिर्भ्रंशः । परायणस्तत्परः । वित्तं द्रव्यम् । दक्षश्चतुरः ।
पुरातनानि पुराणानि । पत्तनानि नगराणि । निधिः शेवधिः । सिद्धाञ्जनेन सि-
द्धादिष्टेन दत्तेन वाञ्जनेन । रक्षिषु रक्षकेषु । खननसाधनैः खनित्रादिभिः । दी-
नारानेतत्संज्ञकनाणकान् । वणिक्कटकं वणिक्समाजम् । बलिनो बलवतः । बली-
वर्दान्वृषभान् । 'उक्षा भद्रो बलीवर्दः' इत्यमरः । गोणीर्धान्यावपनानि ।
'जानपदकुण्डगोण—' इति ङीष् आवपनार्थे । अन्यद्रव्यमिषेणान्यद्रव्यमिति क-
थयित्वा । वसु द्रव्यम् । 'रिक्थमृक्थं धनं वसु' इत्यमरः । उह्यमानम् । 'वह
प्रापणे' । कर्मणि शानच् । अधिकारी स्वामी मुख्यः । विरचितं कृतम् । सौ-
हृदं मैत्री । साकं सह । 'साकं सत्रा समंसह' इत्यमरः । निलयो गृहं वासस्था-

वणिङ्मन्दिरलक्ष्मीं मूर्तामिवावलोक्य तदीयलावण्यावधूतधीरभावो लतान्तबाणबाणलक्ष्यतामयासिषम् । चकितबालकुरङ्गलोचना सापि कुसुमसायकसायकायमानेन कटाक्षवीक्षणेन मामसकृन्निरीक्ष्य मन्दमारुतान्दोलिता लतेवाकम्पत । मनसाभिमुखैः समाकुञ्चितै रागलज्जान्तरालवर्तिभिः सांगवर्तिभिरीक्षणविशेषैर्निजमनोवृत्तिमकथयत् । चतुरगूढचेष्टाभिरस्या मनोनुरागं सम्यग्ज्ञात्वा सुखसंगमोपायमचिन्तयम् । ततो गतेषु कतिपयदिनेषु पौरजनसमक्षं सिद्धादेशप्रकारेण विवाह्य तामिन्दुमुखीं पूर्वसंकल्पितान्सुरतविशेषान्यथेष्टमन्वभूवम् । बन्धुपालशकुननिर्दिष्टे दिवसेऽस्मिन्निर्गत्य पुराद्बहिर्वर्तमानो नेत्रोत्सवकारि भवदवलोकनसुखमप्यनुभवामि ' इति ।

एवं मित्रवृत्तान्तं निशम्याम्लानमानसो राजवाहनः स्वस्य च सोमदत्तस्य च वृत्तान्तमस्मै निवेद्य सोमदत्तम् ' महाकालेश्वराराधनानन्तरं भवद्वल्लभां सपरिवारां निजकटकं प्रापय्यागच्छ ' इति नियुज्य पुष्पोद्भवेन सेव्यमानो भूस्वर्गायमानमवन्तिकापुरं विवेश । तत्र 'अयं मम स्वामिकुमारः' इति बन्धुपालादये बन्धुजनाय कथयित्वा तेन राजवाहनाय बहुविधां सपर्यां कारयन्सकलकलाकुशलो

नम् । गूढवसतिं गुप्तवासम् । काननभूमिषु वनप्रदेशेषु । न विद्यते पारोऽन्तो यस्य तत् । ग्लानिं हर्षक्षयं निर्वेदम् । विहाय त्यक्त्वा । तूष्णीं जोषम् । लपितं भाषितम् । उपकण्ठवर्ती समीपवर्ती । अवलीढा व्याप्ताः । नयनयोश्चन्द्रिका ज्योत्स्ना । मूर्तां मूर्तिमतीम् । **तदीयेति** । तस्या लावण्येन सौन्दर्येणावधूतश्चालितो धीरभावो धैर्यं यस्यैतादृशः । लतान्ता बाणा यस्य स लतान्तबाणः कामस्तस्य बाणास्तेषां लक्ष्यतां शरव्यत्वम् । लावण्यवतीं तां दृष्ट्वा कामबाणैर्विद्धोऽभवमिति तात्पर्यार्थः । चकितो भीतः । कुरंगो मृगः । ' मृगे कुरंगवातायु— ' इत्यमरः । बालशब्देनातिकातरत्वमतिलोलत्वं च नयनयोर्दर्शितम् । कुसुमानि सायका यस्य स कामस्तस्य सायक इवाचरतीति तथा तेन कटाक्षवीक्षणेन चेष्टाविशेषणापाङ्गदर्शनेन । ' कटाक्षोऽपांगदर्शने ' इत्यमरः । असकृद्वारंवारम् । आन्दोलिता कम्पिता । रागश्च लज्जा च तयोरन्तराले मध्ये वर्तन्ते ताभिः । सा अंगवर्तिभिः । इति च्छेदः । ' सांगभङ्गिभिः ' इति पाठेऽङ्गभंगिभिः सहिताभिः । ' व्याजच्छलनिभे भंगिः ' इति रभसः । विशेषावस्थानशोभिभिरित्यर्थः । मनोवृत्तिं मनोव्यापारम् । अभिलाषमिति यावत् । अनुरागं प्रीतिम् । सुखेन संगमस्योपायस्तम् ।

एवमिति । निजकटकं स्वावासस्थानम् । भुवि स्वर्ग इव भवति तम् ।

महीसुरवर इति पुरि प्रकटयन्पुष्पोद्भवोऽमुष्य राज्ञो मज्जनभोजनादिकमनुदिनं स्वमन्दिरे कारयामास ।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते पुष्पोद्भवचरितं नाम चतुर्थ उच्छ्वासः ।

सपर्यां पूजां सत्कारं वा ' महीसुरवरो द्विजश्रेष्ठः ' प्रकटयन्प्रथयन् , मज्जनं स्नानम् , अनुदिनं दिवसे दिवसे ॥ **इति श्रीदशकुमारचरितपूर्वपीठिकाटीकायां पददीपिकाभिधायां चतुर्थ उच्छ्वासः ॥**

हर्षचरितम् ।

प्रथम उच्छ्वासः ।

एवमनुश्रूयते—पुरा किल भगवान्स्वलोकमधितिष्ठन्परमेष्ठी विकासिनि पद्मविष्टरे समुपविष्टः सुनासीरप्रमुखैर्गीर्वाणैः परिवृत्तो ब्रह्मोद्याः कथाः कुर्वन्नन्याश्च निरवद्या विद्यागोष्ठीर्भावयन्कदाचिदासांचक्रे। तथासीनं च तं त्रिभुवनप्रतीक्ष्यं मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्वे च सप्तर्षिपुरःसरा महर्षयः सिषेविरे । केचिदृचः स्तुतिचतुराः समुदचारयन् । केचिदपचितिभाञ्जि यजूंष्यपठन् । केचित्प्रशंसासामानि जगुः । अपरे विवृतक्रतुक्रियातन्त्रान्मन्त्रान्व्याचचक्षिरे । विद्याविसंवादकृताश्च तत्र तेषामन्योन्यस्य विद्याविवादाः प्रादुरभवन् । X १४/६/८१

अथातिरोषणः प्रकृत्या महातपा मुनिरत्रेस्तनयस्तारापतेर्भ्राता

एवमिति । अनुश्रूयते पारम्पर्येणाकर्ण्यते । किलेत्यत एवागमसूचनाय । भगवानिति केवलनिर्देश उल्लुण्ठनपरिहारार्थम् । ब्रह्मलोकमित्युक्ते सत्युत्कर्षदायिन्यात्मीयताप्रतिपत्तिर्न स्यादिति स्वग्रहणं साभिप्रायम् । अधितिष्ठन्बहुमानेन तद्योगक्षेमादिकमुद्वहन् । परमे पदे तिष्ठतीति परमेष्ठी । विकासिनीति नित्ययोग इनिः । विष्टरमासनम् । सुनासीर इन्द्रः । गिरः स्तुतिरूपा वर्णन्ति भजन्तीति गीर्वाणा देवाः । गीरेव बाणः शरो येषामिति परिवृतश्चतुर्दिक्कं वृतः परिवलितः । तस्य चतुर्मुखत्वात् । ब्रह्म वदन्तीति ब्रह्मोद्याः । 'वदः स्वपि क्यप् च' । ब्रह्मणा वेदेन, ब्रह्मणि परमात्मनि वा वेदितव्या ब्रह्मोद्याः । उक्तं च—'ब्रह्मोद्या सा कथा यस्यामुच्यते ब्रह्म शाश्वतम्' इति । सामान्यविशेषभावेन 'उष्ट्रासिकामासते' इति वत् । ब्रह्मवदनरूपा वा कथास्तासां वक्ष्यमाणगोष्ठ्यभिप्रायेण प्राधान्यात्स्वयंकरणम् । निरवद्या दोषरहिताः । तथा च वात्स्यायनः—'या गोष्ठी लोकविद्विष्टा या च स्वैरविसर्पिणी । परहिंसात्मिका या च न तामवतरेद्बुधः ॥ लोकचित्तानुवर्तिन्याक्रीडामात्रैककार्यया । गोष्ठ्या सह चरन्विद्वांल्लोकसिद्धिं नियच्छति ॥' समानविद्यावित्तशीलबुद्धिवयसामनुरूपैरालापैरेकत्रासनबन्धो गोष्ठी । प्रतीक्ष्यः पूज्यः सम्यगुदात्तादित्रैस्वर्यादिप्राधान्यादुदचारयञ्जगुः । अपचितिः पूजा । सामानि जगुरिति साम्नां गानमेवोचितम् । विद्याविसंवादकृता इति, न तु मात्सर्यादिना । प्रादुरभवन्नित्यनौचित्यशङ्कया तत्कर्तृत्वपरिहारः ।

प्रकृत्येति । अन्यथा ब्रह्मसंनिधानेन कथमीदृगाक्षेपः । कथमीदृशोऽवकाश

नाम्ना दुर्वासा द्वितीयेन मन्दपालनाम्ना मुनिना सह कलहायमानः साम गायन्क्रोधान्धो विस्वरमकरोत्। सर्वेषु च शापभयप्रतिपन्नमौनेषु मुनिष्वन्यालापलीलयावधीरयति कमलसंभवे भगवती कुमारी किंचिदुन्मुक्तबालभावे भूषितनवयौवने नवे वयसि वर्तमाना, गृहीतचामरप्रचलद्भुजलता पितामहमुपवीजयन्ती, निर्भर्त्सनताडनजातरागाभ्यामिव स्वभावारुणाभ्यां पादपल्लवाभ्यां समुद्भासमाना, शिष्यद्वयेनेव पदक्रममुखरेण नूपुरयुगलेन वाचालितचरणा, विद्वन्मानसनिवासलग्नेन गुणकलापेनेवासावलम्बिना ब्रह्मसूत्रेण पवित्रीकृतकाया, भास्वन्मध्यनायकमनेकमुक्तानुयातमपवर्गमार्गमिव हारमुद्वहन्ती, वदनप्रविष्टसर्वविद्यालक्तकरसेनेव पाटलेन स्फुरता दशनच्छदेन विराजमाना, तिर्यक्सावज्ञमुन्नमितैकभ्रूलता, श्रोत्रमेकं विस्वरश्रवणकलुषितं प्रक्षालयन्तीवापाङ्गनिर्गतेन लोचनाश्रुजलप्रवाहेणेतरश्रवणेन च विकसितसितसिन्धुवारमञ्जरीजुषा हसतेव प्रकटितविद्यामदा, श्रुतिप्रणयिभिः प्रणवैरिव कर्णावतंसकुसुममधु-

---

इत्याह—**महातपा इति**। मुनिरित्यनेनास्य ज्ञानप्राधान्यात्तुल्यतोद्भासनमतीवापकारः। अत्रेस्तनय इति न केवलं महातपस्त्वेन यादवत्रितनयत्वेन ब्रह्मलोकप्राप्तिरस्य। ततस्तारापतेरित्यादिना तथाभूतपरमप्रजापतिसंबन्धयोग्यत्वमस्याख्यायते। द्वितीयेनेति तत्समत्वमुच्यते। कथं सामगानेऽप्यनवहित इत्याह—**क्रोधान्ध इति**। सर्वेष्वित्यादौ देवी सरस्वती श्रुत्वा जहासेति क्रियाप्रतिपत्तिरस्य माभूदित्युत्तमप्रकृतित्वादन्येत्याद्युक्तम्। अन्येन सहालापलीलाकथाक्रीडया। **कुमारीति**। कुमारीत्वेनास्या हास्यादिकं नानुचितमिति दर्शयति। भूषितेत्यनेन दर्शनीयत्वमाह। **पितामहमिति**। सर्वप्राधान्यमनेनोक्तम्। निर्भर्त्सनताडनं तेन तदर्थं वा यत्ताडनं रोषाद्भूमिहननं तद्वशाच्च जातरागाभ्यामिव पादपल्लवाभ्यामित्यनेनारुणत्वं सौकुमार्यं चाह। अतएव गाढताडनेन रक्तत्वमुत्प्रेक्षितम्। ताडितो वायं ताडितस्तत्तुल्यो रागो जातो ययोरिति व्याख्येयम्। पदक्रमं पादन्यासपरिपाटी। अन्यत्र च पदानि च क्रमश्च तत्पदक्रमम् चरणौ पादौ चरणाश्च विशिष्टशाखापाठकता वाचालिताः क्षोभिता ययेति। मानसं चित्तं, सरोविशेषश्च। गुणा अपि भास्वन्दीप्रो मध्यनायकः पदकं यत्र तत्। अथ च भास्वतो मध्यं तेन नयति सः—यदुक्तम्—'परिव्राड्योगयुक्तश्च शूरश्चाभिमुखे हतः। द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ॥' इति। मुक्ता मौक्तिकानि, मोक्षगामिनश्च। हारं मुक्ताकलापं च, अपवर्गमपि। हारं हरसंबन्धिनं तत्प्रसादप्राप्यत्वात्। 'अलक्तकरसेनेव पाटलेन' इति वा पाठः। स्फुरतेति रोषात्। **कलुषितं प्रक्षालयन्तीवेति**। सलिलस्य क्षालनमेव युक्तमिति समुचितेयमुक्तिः। **श्रुतिप्रणयिभिरिति**। श्रूयते इति श्रुतिर्ध्वनिस्तया

करकुलैरुपास्यमाना, सूक्ष्मविमलेन प्रज्ञाप्रतानेनेवांशुकेनाच्छादित शरीरा, वाङ्मयमिव निर्मलं दिक्षु दशनज्योत्स्नालोकं विकिरन्ती देवी सरस्वती श्रुत्वा जहास ।

दृष्ट्वा च तां तथाहसन्तीं स मुनिः 'आः पापकारिणि, दुर्गृहीत विद्यालवावलेपदुर्विदग्धे, मामुपहससि' इत्युक्त्वा शिरःकम्पशीर्यमाणबन्धविशरारोरुन्मिषत्पिङ्गलिम्नो जटाकलापस्य रोचिषा सिञ्चन्निव रोषदहनद्रवेण दश दिशः, भ्रुकुटिमावध्नन्, अतिलोहितेन चक्षुषामर्षदेवतायै स्वरुधिरोपहारमिव प्रयच्छन्, निर्दयदष्टदशनच्छदभयपलायमानामिव वाचं रुन्धन्दन्तांशुच्छलेन, अंसावस्रंसिनशापशासनपट्टस्येव ग्रथ्नन्ग्रन्थिमन्यथा कृष्णाजिनस्य, स्वेदकणप्रतिबिम्बितैः शापशङ्काशरणागतैरिव सुरासुरमुनिभिः प्रतिपन्नसर्वावयवः, कोपकम्पतरलिताङ्गुलिना करेण प्रसादनलग्नामक्षरमालामिवाक्षमालामाक्षिप्य कामण्डलवेन वारिणा समुपस्पृश्य शापजलं जग्राह ×

प्रणयः प्रसंशातिशयो येषां तैः । यद्वा श्रुती श्रोत्रे तत्कर्तृकः प्रणयः प्रार्थना मधुरध्वनित्वाद्येषां तैः । कर्णसंबन्धैरिति व्याख्याने तु कर्णावतंसेत्यादिना पौनरुक्त्यमपरिहार्यम् । श्रुतिर्वेदोऽपि । सूक्ष्मार्थदर्शित्वात्सूक्ष्मस्तीक्ष्णः, विमलस्तत्त्वग्राही । अन्यत्र सूक्ष्मं तनु, विमलं शुक्लम् । प्रतानः प्रसारः ।

दृष्ट्वेत्यादौ स मुनिस्तां तथा हसन्तीं दृष्ट्वा शापजलं जग्राहेति संबन्धः । तथेति पादताडनभ्रूक्षेपादिपूर्वम् । स मुनिरिति प्राग्वर्णितस्वरूपः । आः इत्यक्षमायाम् । मामिति योऽहं त्रैलोक्यप्रख्यातरोषणस्तमेवेति । समीप एव विशीर्यते तच्छीलो विशरारुरितश्चामुतश्च । अतएवोन्मिषत्पिङ्गलिमा । रोचिषा दीप्त्या । रोषदहनो द्रवो रस इव, द्रवत्वं च यद्यपि विशिष्टस्यैव तेजसः सुवर्णादि संभवति, तथाप्यत्रोपचारात्सादृश्यम् । भ्रुवोर्मूलसमुत्क्षेपाद्भ्रुकुटिं परिचक्षते' । सुशब्दः सुतरां नैरपेक्ष्यसूचनाय वा चोभयसंबन्धः । **अंसावस्रंसिन इति** । संरम्भाच्छासनपट्टः शुक्लत्वाल्लिपिकार्ष्ण्याच्च सितासितवर्णसंवलितमध्यः पर्यन्तशुक्लश्च भवति । अत एव ते बिन्दुचित्रत्वादुपान्तशुक्लत्वाच्च कृष्णाजिनमुत्प्रेक्षते । यथा शासनपट्टे सति क्वचिद्ग्रामादावधिकारो भवति, तद्वच्च जनसमूहः प्रार्थनां करोति । सहस्तपादादिके सर्वस्मिन्नङ्गे गलति । कोपेत्यादौ कम्पग्रहणम् । रोषः शरीरं बाधत इति यावत् । संनिवेशसाधर्म्यादुक्तम्—**अक्षरमालामिवेति** । सरस्वतीसंबन्धतया चोक्तम्—**प्रसादनलग्नामिति** । विक्षिप्यन्ते । यश्च विरुद्धपक्षः प्रसादयति स विक्षिप्यते तिरस्क्रियते । कामण्डलवेन मुनिकरकभवेन । समुपस्पृश्याचम्य ।

अत्रान्तरे स्वयंभुवोऽभ्याशे समुपविष्टा देवी मूर्तिमती पीयूषफेनपटलपाण्डरं कल्पद्रुमदुकूलवल्कलं वसाना, विसतन्तुमयेनांशुकेनोन्नतस्तनमध्यबद्धगात्रिकाग्रन्थिः, तपोबलनिर्जितत्रिभुवनजयपताकाभिरिव तिसृभिर्भस्मपुण्ड्रकराजिभिर्विराजितललाटाजिरा, स्कंधावलम्बिना सुधाफेनधवलेन तपःप्रभावकुण्डलीकृतेन गङ्गास्रोतसेव योगपट्टकेन विरचितवैकक्ष्यका, सव्येन ब्रह्मोत्पत्तिपुण्डरीकमुकुलमिव स्फटिकमण्डलु करेण कलयन्ती, दक्षिणमक्षमालाकृतपरिक्षेपं कम्बुनिर्मितोर्मिकादन्तुरितं तर्जनतरङ्गिततर्जनीकमुत्क्षिपन्ती करम्, 'आः पाप, क्रोधोपहत, दुरात्मन्, अज्ञ, अनात्मज्ञ, ब्रह्मबन्धो, मुनिखेटापसद, निराकृत, कथमात्मस्खलितविलक्षः सुरासुरमुनिमनुजवृन्दवन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुमभिलषसि' इत्यभिदधाना, रोषविमुक्तवेत्रासनैरोंकारमुखरितमुखैरुत्क्षेपदोलायमानजटाभारभरितदिग्भिः परिकरबन्धभ्रमितकृष्णाजिनाटोपच्छायाश्यामायमानदिवसैरमर्षनिःश्वासदोलाप्रेङ्खोलितब्रह्मलोकैः सोमरसमिव स्वेदविसरव्याजेन स्रवद्भिरग्निहोत्रपवित्रभस्मस्मेरललाटैः कुशतन्तुचारुचामरचीरचीवरिभिराषाढिभिः प्रहरणीकृतमण्डलुमण्डलैर्मूर्तैश्चतुर्भिर्वेदैः सह वृसीमपहाय सावित्री समुत्तस्थौ ।

दुपट्टेति - भाषायाम् ॥ क्षौमामिति अपरनाम × मांला

अत्रान्तर इत्यादौ मूर्तैश्चतुर्भिर्वेदैः सह सावित्री समुत्तस्थाविति संबन्धः । अभ्याशे समीपे । गात्रिकाग्रन्थिर्ग्रन्थिविशेषः स्वस्तिकाकारः स्त्रीणामुत्तरीयस्य स्तनोद्देशो भवति । तिलकं पुण्ड्रकं स्कन्धावंसौ वायुस्थानानि च स्कन्धाः । फेनस्तद्वच्चधवलेन । 'तिर्यग्वक्षसि विक्षिप्तं वैकक्ष्यकमुदाहृतम्' । सव्येन वामेन । पुण्डरीकमुकुलं मुकुलितं पद्मम् । कलयन्ती क्षिपन्ती, धारयन्ती वा । परिक्षेपः परिवलनम् । कम्बुः शङ्खः । ऊर्मिका वालिका । दन्तुर इव दन्तुरो व्याप्तस्तम् । तर्जनं निर्भर्त्सनम् । तरङ्गिता तर्जिता चालिता । तर्जनी प्रदेशिन्यंगुष्ठनिकटांगुलिः । क्रोधोपहतेत्यात्मविनाशायैव ते क्रोध इत्युक्तं भवति । ब्रह्मबन्धो निकृष्टब्राह्मण । अपसदो नीचः । निराकृतोऽस्वाध्यायः । विलक्षो लज्जितः । सुरासुरमनुजाश्च परस्परविरुद्धानुष्ठानाः । अत्र पुनरीदृशामपि न विप्रतिपत्तिरिति भावः । **अभिलषसीति** । इच्छामात्रकमपीदं महत्साहसमित्यर्थः । ॐकार एव मुखरितं मुखं येषां तैः । परिकरबन्धः पर्यङ्कबन्धः । स चोत्थितस्यापि संरम्भभाजो भवति । आटोपो वक्षः प्रदेशे श्यामायमानो रात्रिरिवाचरद्दिवसा यैर्हेतुभिरित्यर्थः । अमर्षनिःश्वासैर्दोलावत्प्रेङ्खोलितश्चलितो ब्रह्मलोको यैः । कुशतन्तूनां चामरमिव चामरं गुच्छः । कुशतन्तुचामरं दर्भपिञ्जूलम्, चीरचीवरं वृक्षत्वग्वस्त्रं ते विद्येते येषां तैः । 'आषाढसंज्ञो दण्डस्तु पालाशो व्रतचारिणाम्' ।

ततो 'मर्षय भगवन्, अभूमिरेषा शापस्य' इत्यनुनाथ्यमानोऽपि विबुधैः, 'उपाध्याय, स्खलितमेकं क्षमस्व' इति बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः, 'पुत्र, मा कृथास्तपसः प्रत्यूहम्' इति निवार्यमाणोऽप्यात्रिणा, रोषावेशविवशो दुर्वासाः 'दुर्विनीते, व्यपनयामि ते विद्याजनितामुन्नतिमिमाम् । अधस्ताद्गच्छ मर्त्यलोकम्' इत्युक्त्वा तच्छापोदकं विससर्ज । प्रतिशापदानोद्यतां सावित्रीम् 'सखि, संहर रोषम् । असंस्कृतमतयोऽपि जात्यैव द्विजन्मानो माननीयाः' इत्यभिदधाना सरस्वत्येव न्यवारयत् ।

अथ तां तथाशप्तां सरस्वतीं दृष्ट्वा पितामहो भगवान्कमलोत्पत्तिलग्नमृणालसूत्रामिव धवलयज्ञोपवीतिनीं तनुमुद्वहन्, उद्गच्छदच्छाङ्गुलीयमरकतमयूखलताकलापेन त्रिभुवनोपप्लवप्रशमकुशापीडधारिणेव दक्षिणेन करेण निवार्य शापकलकलमतिविमलदीर्घैर्भाविकृतयुगारम्भसूत्रपातमिव दिक्षु पातयन्, दशनकिरणैः सरस्वतीप्रस्थानमङ्गलपटहेनेव पूरयन्नाशाः स्वरेण सुधीरमुवाच—'ब्रह्मन्, न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः । निहन्त्येष परस्तात् । उद्दामप्रसृतेन्द्रियाश्वसमुत्थापितं हि रजः कलुषयति दृष्टिमनक्षजिताम् । कियद्दूरं वा चक्षुरीक्षते । विशुद्धया हि धिया पश्यन्ति कृतबुद्धयः सर्वानर्थानसतः सतो वा । निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयोरेकत्र वृत्तिः । आलो-

नक्कोरेति भाषायाम् आनक-इत्यपरनाम ॥

तत इत्यादौ शापोदकं जग्राहेति विससर्जेति संबन्धः । मर्षय क्षमस्व । अनुनाथ्यमानः प्रार्थ्यमानः प्रत्यूहं विघ्नम् । **उन्नतिमिति** । उच्चदेशस्थश्चाधस्तान्नीयत इति समुच्चितेयमुक्तिः । असंस्कृतमतयः संस्काररहिताः ।

अथेत्यादौ भगवान्पितामहः सुधीरमुवाचेति संबन्धः । **तथेति** । तेन प्रकारेण । निरपराधां सरस्वतीमित्यर्थः । **धवलयज्ञोपवीतिनीमिति** । प्रशंसायां नित्ययोगे वा मत्वर्थीयः । 'विसकिसलयच्छेदपाथेयवन्तः' इतिवत् । अन्यथा कर्मधारये कृते मत्वर्थीय एकबुद्ध्यनुमितौ बहुव्रीहौ प्रतिपत्तिर्भवतीति । इतरत्र तु बुद्धिद्वयमिति लघुत्वात्प्रक्रमस्येत्युक्तम् । उद्गच्छन्नच्छाङ्गुलीयमरकतस्य मयूखलताकलापो यस्य तेन करेण । आपीडः समूहः । पातं विन्यासम् । पातयन्कुर्वन् । अत्र हि धात्वर्थगतानुष्ठानमात्रवृत्तिः क्रिया । यथा—'संवस्ते क्षालिते वस्त्रे' इति । पन्था व्यवहारः, मार्गश्च । निहन्ति पातयति । प्रसृतानि गन्तुं प्रवृत्तानि, प्रसृता च जङ्घा । रजो रागः, धूलिश्च । कलुषयति कार्याकार्यदर्शनासमर्थां करोति । दृष्टिं बुद्धिम्, नेत्रं च । अक्षाणीन्द्रियाणि, रथाङ्गं चाक्षः । तेन च रथो लक्ष्यते । कृतबुद्धयः । संस्कृतमतयः । असदविद्यमानम् । निसर्गः स्वभावः । आलोको विवेकः,

कमपहाय कथं तमसि निमज्जसि। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिर्न त आत्मरागदोषं पश्यति। क्व महातपोभारवैवधिकता। क्व पुरोभागित्वम्। अतिरोषणश्चक्षुष्मानन्ध एव जनः। नहि कोपकलुषिता विमृशति मतिः कर्तव्यमकर्तव्यं वा। कुपितस्य प्रथममन्धकारीभवति विद्या, ततो भ्रुकुटिः। आदाविन्द्रियाणि रागः समास्कन्दति, चरमं चक्षुः। आरम्भे तपो गलति, पश्चात्स्वेदसलिलम्। पूर्वमयशः स्फुरति, अनन्तरमधरः। कथं लोकविनाशाय ते विषपादपस्येव जटावल्कलानि जातानि। अनुचिता खल्वस्य मुनिवेषस्य हारयष्टिरिव वृत्तमुक्ता चित्तवृत्तिः। शैलूष इव वृथा वहसि कृत्रिममुपशमशून्येन चेतसा तापसाकल्पम्। अल्पमपि न ते पश्यामि कुशलजातम्। अनेनातिलघिम्नाद्याप्युपर्येव प्लवसे ज्ञानोदन्वतः। न खल्वनेडमूकाः एडा जडा वा सर्व एते महर्षयः। रोषदोषनिषद्ये स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसं सरस्वतीम्। एतानि तान्यात्मप्रमादस्खलितवैलक्ष्याणि, यैर्याप्यतां यात्यविदग्धो जनः' इत्युक्त्वा पुनराह—'वत्से सरस्वति, विषादं मा गाः। एषा त्वामनुयास्यति सावित्री। विनोदयिष्यति चास्मद्विरहदुःखिताम्। आत्मजमुखकमलावलोकनावधिश्च ते शापोऽयं भविष्यति' इति। एतावदभिधाय विसर्जितसुरासुरमुनिमनुजमण्डलः ससंभ्रमोपगतनारदस्कन्धविन्यस्तहस्तः समुचिताह्निककरणायोदतिष्ठत्। सरस्वत्यपि शप्ता किंचिदधोमुखी धवलकृष्णशारां कृष्णाजिनले-

स्कन्दिर=गतिशोषणयोः पठितः

सेवादोषा-श्रये

प्रकाशश्च। तमः, अज्ञानमपि। दोषाः, सव्यमण्डलत्वादीनि च। कुपिता क्रुद्धा, धातुवैषम्यदूषिता च। आत्मरागदोषमिति। आत्मभूतगुणदर्शनम्, लौहित्यलक्षणं च विकारम्, 'वोढा भारस्य धीमद्भिर्जनैर्वैवधिकः स्मृतः। दोषैकग्राहिहृदयः पुरोभागी निगद्यते रागोऽभूतगुणाभिनन्दनम्, रक्तता च। जटाः शिखाः, मूलानि वल्कलानि मुनिवस्त्राणि, त्वचश्च। वृत्तमुक्ता शीलेन त्यक्ता, परिवर्तुलमौक्तिका च। 'जायोपजीवी हि जनः शैलूषः कथितो बुधैः'। आकल्पो वेषः। जातं प्रकारः। अतिलघिमानुपादेयता तुच्छतमम्। उपर्येवेत्यन्तःप्रवेशाभावात्। लघुश्च जलोपरि प्लवते। 'कथिता अनेडमूकाः श्रोतुं वक्तुं च खलु न ये शक्ताः। एडास्तु श्रुतिहीना जडास्तु मूर्खा बुधैः प्रोक्ताः'॥ रोष एव दोषस्तस्य निषद्या नियमेनावस्थितिर्यत्र तस्मिन्स्वहृदये ते। यद्वा रोषदोषस्य निषद्या आपणत्वं तस्यामन्त्रणम्। हे रोषदोषनिषद्ये इति व्याख्येयम्। निगृहीतवान्प्राप्तवान्। 'आगः पापापराधयोः'। वैलक्ष्यं ल-

मूर्च्छित-कठिनयोः पठितः कोषे

खामिव दृष्टिमुरसि पातयन्ती सुरभिनिःश्वासपरिमललग्नैर्मूर्तैः शापात्तरैरिव षट्चरणचक्रैराकृष्यमाणा शापशोकशिथिलितहस्ताधोमुखीभूतेनोपदिश्यमानमर्त्यलोकावतरणमार्गेव नखमयूखजालकेन नूपुरव्याहाराहूतैर्भवनकलहंसकुलैर्ब्रह्मलोकनिवासिहृदयैरिवानुगम्यमाना समं सावित्र्या गृहमगात् ।

कादम्ब

अत्रान्तरे सरस्वत्यवतरणवार्तामिव कथयितुं मध्यमं लोकमवततारांशुमाली । क्रमेण च मन्दायमाने मुकुलितविसिनीविसरव्यसनविषण्णसरसि वासरे, क्षितिधरशिखरमवतरति तरुणतरकपिलपनलोहिते लोकैकचक्षुषि भगवति, प्रकटयति च तारापथे पाटलताम्, मेदिनीं मीलयति नववयसि तमसि तरुणतरतिमिरपटलपाटनपटीयसि समुन्मिषति यामिनीकामिनीकर्णपूरचम्पककलिकाकदम्बके प्रदीपप्रकरे, स्पष्टे प्रदोषसमये सावित्री शून्यहृदयामिव किमपि ध्यायन्तीं सास्रां सरस्वतीमवादीत्—' सखि, त्रिभुवनोपदेशदानदक्षायास्तव पुरो जिह्वा जिह्वेति मे जल्पन्ती जानास्येव यादृश्यो विसंस्थुला गुणवत्यपि जने दुर्जनवन्निर्दाक्षिण्याः क्षणभङ्गिन्यो दुरतिक्रमणीया न रमणीया दैवस्य वामा वृत्तयः । निष्कारणा च निकारकणिकापि कलुषयति मनस्विनोऽपि मानसमसदृशजलादापतन्ती । अनवरतनयनजलसिच्यमानश्च तरुरिव विपल्लवोऽपि सहस्रधा प्ररोहति । अतिसुकुमारं च जनं संतापपरमाणवो

सूर्ये

जितम् । याप्यो गर्ह्यः । **पुनराहेति** । अविश्रान्तेऽप्युक्तिक्रमे पुनरित्युपादानं वाच्यतापरिहाराय । वत्से इति प्रसादाविष्करणार्थम् । **एषेति** । या तवैव स्निग्धा । विनोदयिष्यति सुखयिष्यति । सरस्वत्यादौ सरस्वत्यपि शप्ता गृहमगादिति सम्बन्धः । शारशबलाम् । धवलकृष्णामित्येव वक्तव्ये शारग्रहणं संवलितवर्णद्वयप्रतीत्यर्थम् । **अधोमुखीभूतेनेति** । योऽधिकरणवशादनिष्टमुपदिशति स लज्जादिनावश्यमधोमुखीभवति । जालकं समूहः । व्याहार उक्तिः ।

मध्यमं लोकं भूमिम् । अंशुमाली रविः । क्रमेणेत्यादावस्मिन्सति सावित्री सरस्वतीमवादीदिति संबन्धः । विसरशब्द औणादिकः षण्डपर्यायः । लपनं वदनम् । लोकेत्यादिना संभोगविघ्नकारित्वमेव प्रकाश्यते । तारापथो नभः । मीलयति स्थगयति । नववयसि प्रत्यग्रे । चम्पको हेमपुष्पकः । विसंस्थुला निर्मर्यादाः दुर्जनवन्निर्दाक्षिण्याः क्रूराः । क्षणभंगिन्य इत्याश्वासनगर्भेयमुक्तिः । वामाश्च स्त्रिय ईदृश्य एव । निकारः परिभवः । कणिका लेशः, शर्करिका च । कलुषयति दूषयति, कालुष्यं नयति च । मानसं चेतः, सरश्च । अनवरतमश्रुणा सिच्यमानः अनवरतं घटसारणीप्रणालादिना नयनं प्रापणं यस्य तादृशो जलेनोच्यमाणश्च विपल्लव आपल्लेशः, विगतपल्लवश्च । प्ररोहति स्थिरीभवति । तरुपक्षे प्ररोहा वि

कमलानाम् समूहः ॥

मालतीकुसुममिव म्लानिमानयन्ति । महतां चोपरि निपतन्नणुरपि 'सृणिरिव करिणां, क्लेशः कदर्थनायालम् । सहजस्नेहपाशग्रन्थिबन्धनाश्च बान्धवभूता दुस्त्यजा जन्मभूमयः । दारयति । दारुणः क्रकचपात इव हृदयं संस्तुतजनविरहः, सा नार्हस्येवं भवितुम् । अभूमिः खल्वसि दुःखक्ष्वेडाङ्कुरप्रसवानाम् । अपि च पुराकृते कर्मणि बलवति शुभेऽशुभे वा फलकृति तिष्ठत्यधिष्ठातरि प्रष्टे पृष्ठतश्च कोऽवसरो विदुषि, शुचाम् । इदं च ते त्रिभुवनमङ्गलैककमलम्, मङ्गलभूताः कथमिव मुखमपवित्रयन्त्यश्रुबिन्दवः । तदलम् । अधुना कथय कतमं भुवो भागमलंकर्तुमिच्छसि । कस्मिन्नवातितीर्षति ते पुण्यभाजि प्रदेशे हृदयम् । कानि वा तीर्थान्यनुग्रहीतुमभिलषसि । केषु वा धन्येषु तपोवनधामसु तपस्यन्ती स्थातुमिच्छसि । सज्जोऽयमुपचरणचतुरः सहपांसुक्रीडापरिचयपेशलः प्रेयान्सखीजनः क्षितितलावतरणाय । अनन्यशरणा चाद्यैव प्रभृति प्रतिपद्यस्व मनसा वाचा क्रियया च सर्वविद्याविधातारं, दातारं च श्वःश्रेयसस्य, चरणरजःपवित्रितत्रिदशासुरं सुधासूतिकलिकाकल्पितकर्णावतंसं देवदेवं त्रिभुवनगुरुं त्र्यम्बकम् । अल्पीयसैव कालेन स ते शापशोकविरतिं वितरिष्यति' इति ।

एवमुक्त्वा मुक्तमुक्ताफलधवललोचनजललवा सरस्वती प्रत्यवादीत्—प्रियसखि, त्वया सह विचरन्त्या न मे कांचिदपि पीडामुत्पादयिष्यति ब्रह्मलोकविरहः शापशोको वा । केवलं कमलासनसेवासुखमार्द्रयति मे हृदयम् । अपि च त्वमेव वेत्सि मे भुवि धर्मधामानि समाधिसाधनानि योगयोग्यानि च स्थानानि स्थातुम्

सुरासुरम्"

वत्

द्यन्ते यस्य स प्ररोहः, स इवाचरति प्ररोहतीति व्याख्या । संतापः खेदः, ऊष्मा च । मालतीकुसुमं सुमनःपुष्पमतिसुकुमारम् । महान्त उत्तमाः द्राघीयांसश्च । सृणिरङ्कुशः । मातरोऽपि जन्मभूमयः । दारुणो विषमः, काष्ठस्य च । क्रकचः करपत्त्रम्, हृदयं चित्तम्, मध्यं च । संस्तुतः परिचितः । सेति । सर्वनामपदं जानासीत्यादि पूर्वोक्तार्थगर्भीकारेण । अभूमिरस्थानम्, अक्षेत्रं च । क्ष्वेडो विषम् । शुभेऽशुभे वेत्यादि । सप्रतिपक्षा लोकोक्तिरियम् । 'अव्युत्पन्नमतिः कृतेन न सता नैवासताप्याकुलः', 'गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः' इत्यादिवत् । अधिष्ठातरि स्वामिनि । प्रष्टेऽप्रगामिनि । अपवित्रतां नयन्ति, न तु शोभां त्याजयन्ति । धामसु स्थानेषु । तपस्यन्ती तपश्चरन्ती । सज्जः प्रगुणः । आज्ञाकार्यमिति दृष्टस्वरूपः । निःसामान्यविस्रम्भभाजनतामभिव्यनक्ति सखीजनशब्दः । श्वःश्रेयसस्य कल्याणस्य दातारम् । सुधासूतिश्चन्द्रः । कलिका तरिका । शापविर-

इत्येवमभिधाय विरराम। रणरणकोपनीतप्रजागरा चानिमीलितलोचनैव तां निशामनयत्।

अपरेद्युरुदिते भगवति त्रिभुवनशेखरे उदयाचलचूडामणौ नातिदूरवर्ती विविच्य पितामहविमानहंसकुलपालः पर्यटन्नपरवक्त्रमुच्चैरगायत्—

'तरलयसि दृशं किमुत्सुकामकलुषमानसवासलालिते।
अवतर कलहंसि वापिकां पुनरपि यास्यसि पङ्कजालयम्' ॥२१॥

तच्छ्रुत्वा सरस्वती पुनरचिन्तयत्—'अहमिवानेन पर्यनुयुक्ता। भवतु। मानयामि मुनेर्वचनम्' इत्युक्त्वोत्थाय कृतमहीतलावतरणसंकल्पा परित्यज्य वियोगविक्लवं स्वपरिजनं, ज्ञातिवर्गमविगणय्यावगणा त्रिः प्रदक्षिणीकृत्य चतुर्मुखं कथमप्यनुनयानिवर्तितानुयायिव्रतिव्राता ब्रह्मलोकतः सावित्रीद्वितीया निर्जगाम।

गगनोरगस्य निर्मोकमुक्तिमिव मन्दाकिनीमनुसरन्ती इत्यादि मर्त्यलोकमवतरतेतिसंबन्धः

ततः निर्मोकमुक्तिमिव गगनोरगस्य, लीलाललाटिकामिव त्रिविष्टपविटस्य, विक्रयवीथीमिव पुण्यपण्यस्य, दत्तार्गलामिव नरकनगरद्वारस्य, अंशुकोष्णीषपट्टिकामिव सुमेरुनृपस्य, दुगूलकदलिकामिव कैलासकुञ्जरस्य, पद्धतिमिवापवर्गस्य, नेमिमिव कृतयुगस्य, सप्तसागरराजमहिषीं मन्दाकिनीमनुसरन्ती मर्त्यलोकमवततार। अपश्यच्चाम्बरतलस्थितैव हारमिव वरुणस्य, अमृतनिर्झरमिव चन्द्रा-

---

तिर्ब्रह्मणैवोक्ता। अतस्तत्र किमन्यापेक्षयेत्याशङ्क्याह—**अल्पीयसैव कालेनेति**।

आर्द्रयति स्नेहयति। धर्मधामानि मध्यदेशादीनि। समाधिश्चित्तैकाग्र्यम्। योगे हि तदुक्तम्—'आदौ समाधिमासीत पश्चाद्योगमुपाचरेत्' इति। रणरणको दुःखमरतिकृतम्।

अपरेद्युरपरस्मिन्नहनि। एते च कालाः संख्यादयो व्यवहारा इहत्या ब्रह्मलोक उपचरिताः। शेखर इव। शेखरो मुण्डमालकः। विविच्य विचार्य। विमानपालः स्वप्रस्तावे हंसीं यदाह तेन सरस्वती पर्यनुयोजितेवाभूत्। अपरवक्त्राख्यं वृत्तमाख्यायिकासु प्रयोज्यम्। तथा चाह भामहः—'वक्त्रं चापरवक्त्रं च काव्ये काव्यार्थशंसिनि' इति। **तरलयसीत्यादि**। अकलुषं मानसं यस्य स निर्मलचेता ब्रह्मा, मानसाख्यं च सरः। लालिता शीलिता। वापिका पुष्करिणी, उप्यन्तेऽस्यां तानि कर्माणीति वापिका मर्त्यभूमिरपि। पङ्कजमालयो यस्य स ब्रह्मा, सरश्च। पर्यनुयुक्ता उपपत्त्या बोधिता। अवगणा केवला सावित्रीव्यतिरेकेण नान्यपरिवारा। **कथमपीति**। न भृत्यादिवत्। व्रतिव्रातस्तपस्विसमूहः।

परिपृष्टेवाभूत्

तत इत्यादावीदृशं मन्दाकिनीमनुसरन्ती सरस्वती मर्त्यलोकमवततारेति

चलस्य, शशिमणिनिष्यन्दमिव विन्ध्यस्य, कर्पूरद्रुमद्रवप्रवाहमिव दण्डकारण्यस्य, लावण्यरसप्रस्रवणमिव दिशाम्, स्फाटिकशिलापट्टशयनमिवाम्बरश्रियाः, स्वच्छशिशिरसुरसवारिपूर्णं भगवतः पितामहस्यापत्यं हिरण्यवाहनामानं महानदम्, यं जनाः शोण इति कथयन्ति। दृष्ट्वा च तं रामणीयकहृतहृदया तस्यैव तीरे वासमरचयत्। उवाच च सावित्रीम्—'सखि, मधुरमयूरविरुतयः कुसुमपांशुपटलसिकतिलतरुतलाः परिमलमत्तमधुपवेणीवीणारणितरमणीया रमयन्ति मां मन्दीकृतमन्दाकिनीद्युतेरस्य महानदस्योपकण्ठभूमयः। पक्षपाति च हृदयमत्रैव स्थातुं मे' इति अभिनन्दितवचना च तथेति तया तस्य पश्चिमे तीरे समवातरत्। एकस्मिंश्च शुचौ शिलातलसनाथे तटलतामण्डपे गृहबुद्धिं बबन्ध। विश्रान्ता च नातिचिरादुत्थाय सावित्र्या सार्धमुच्चितार्चनकुसुमा सस्नौ। पुलिनपृष्ठप्रतिष्ठितसैकतशिवलिङ्गा च भक्त्या परमया पञ्चब्रह्मपुरःसरां सम्यङ्मुद्राबन्धविहितपरिकरां ध्रुवागीतिगर्भामवनिपवनवनगगनदहनतपनतुहिनकिरणयजमानमयीर्मूर्तीरष्टावपि ध्यायन्ती सुचिरमष्टपुष्पिकामदात्। अयत्नोपनतेन फलमूलेनामृतरसमप्यतिशिशयिषमाणेन च स्वादिम्ना शिशिरेण शोणवारिणा शरीरस्थितिमकरोत्। अतिवाहितदिवसा च तस्मिन्नतामण्डपशिलातले कल्पितपल्लवशयना

शोण भद्र इतिभाषायाम्॥

प्रमरपंक्तिरेव वीणा तस्या रणितेन रमणीया इति विग्रहः

संबन्धः। निर्मोकः सर्पकञ्चुकः। विस्रसतया शुक्लत्वेन, लहरिकावलीत्वेन च निर्मोकमुक्तिमिवेत्युत्प्रेक्षा। गगनमिवोरगः कृष्णतया। ललाटिका ललाटालंकारः। विटो भुजंगः। उष्णीषं शिरोवेष्टनं दिक्षु प्रसिद्धम्। दुगूलशब्दो दुकूलसमानार्थः। पद्धतिर्मार्गः। अपवर्गो मोक्षः। कृतयुगस्य रचितयुगकाष्ठस्य रथस्येत्यर्थः। यथा नेमिवशाद्रथग्रहणं तथा तद्वशात्कृताख्यस्य युगस्य। सप्तसागरराजः क्षीरसमुद्रः। चन्द्राख्यः पर्वत इति केचित्। शशिमणिश्चन्द्रकान्तः। **पितामहस्येति**। तद्भक्त्या तदाश्रयणम्। सिकता विद्यन्ते यस्य स सिकतिलः। मत्तशब्देन सशब्दत्वम्, वेणीपदेन च तन्त्रीसंनिवेशसादृश्यमाह। वेणी पङ्क्तिः। लिङ्गयतेऽनेनेति लिङ्गमाकारः। पञ्च ब्रह्माणि सद्योजातः, वामदेवः, अघोरः, तत्पुरुषः, ईशानश्चेति। मुद्राबन्धो विशिष्टकराङ्गुलिसंनिवेशः। ध्रुवाख्या विशिष्टा गीतिः। वनं तोयम्। यजमान उग्रः। अष्टौ पुष्पाण्येवाष्टपुष्पिका। तत्र प्रभृति गन्धप्रधानं पार्थिवम्, अर्धम्लानादिकं रसप्रधानमाप्यम्, प्रदीपाभरणप्रभादिरूपप्रधानं तैजसम्, अनुलेपनप्रभृति स्पर्शप्रधानं वायवीयम्, सुशिरातोद्यगीतादिकं शब्दप्रधानमाकाशीयम्, अनुध्यानं मानसम्, अस्ति सर्वत्रैवेश्वर इति निश्चयो बौद्धम्, अहमेवेश्वर इत्याहंकारिकम्। यद्वा आसनवर्गप्रवृत्तिष्वष्टसु प्रत्येकमष्टपुष्पिका। अति

सुष्वाप । अन्येद्युरप्यनेनैव क्रमेण नक्तंदिनमत्यवाहयत् ।

एवमतिक्रामत्सु दिवसेषु, गच्छति च काले, याममात्रोद्गते च रवावुत्तरस्यां ककुभि, प्रतिशब्दपूरितवनगह्वरं गम्भीरतारतरं तुरङ्गहेषितह्रादमश्रृणोत् । उपजातकुतूहला च निर्गत्य लतामण्डपाद्विलोकयन्ती विकचकेतकीगर्भपत्रपाण्डुरं रजःसंघातं नातिदवीयसि संमुखमापतन्तमपश्यत् । क्रमेण च सामीप्योपजायमानाभिव्यक्ति 'तस्मिन्महति शफरोदरधूसरे रजसि, पयसीव मकरचक्रं प्लवमानं, पुरः प्रधावमानेन, प्रलम्बकुटिलकचपल्लवघटितललाटजूटकेन, धवलदन्तपत्रिकाद्युतिहासितकपोलभित्तिना, पिनद्धकृष्णागुरुपङ्ककल्कच्छुरणकृष्णशबलकषायकञ्चुकेन, उत्तरीयकृतशिरोवेष्टनेन, वामप्रकोष्ठनिविष्टस्पष्टहाटककटकेन, द्विगुणपट्टपट्टिकागाढग्रन्थिग्रथितासिधेनुना, अनवरतव्यायामकृशकर्कशशरीरेण, वातहरिणयूथेनेव मुहुर्मुहुः खमुड्डीयमानेन, लङ्घितसमविषमावटविटपेन, कोणधारिणा, कृपाणपाणिना, सेवागृहीतविविधवनकुसुमफलमूलपर्णेन, 'चल चल, याहि याहि, अपसर्पापसर्प, पुरः प्रयच्छ पन्थानम्' इत्यनवरतकृतकलकलेन युवप्रायेण, सहस्रमात्रेण पदातिबलेन सनाथमश्ववृन्दं संददर्श । X १९/८

मध्ये च तस्य अनङ्गयुगावतारमिव दर्शयन्तम्, चन्द्रमयीमिव

शेतुमभिभवितुमिच्छतातिशिशयिषमाणेन । स्वादिम्ना मृष्टत्वेन । शरीरस्थितिमिति । न त्वातृप्तिभोजनम् । अन्येद्युरन्यस्मिन्नहनि ।

यामः प्रहरः । नक्तंदिनशब्देन तत्कालनिवर्तनीयं कर्मैव लक्ष्यते । गम्भीरश्चिरकालस्थितः । तारतरो दूरदेशश्रूयमाणः । हेषितमश्वशब्दः, तद्रूपो ह्रादो ध्वनिस्तम् । क्रमेणेत्यादावश्ववृन्दं संददर्शेति संबन्धः । शफरा मत्स्याः । तदुदरवत्तैश्च धूसरे । प्रलम्बेत्यादिना सज्जत्वमुक्तम् । कचाः केशाः । सौकुमार्यात्पल्लवानीव । घटितललाटजूटता दाक्षिणात्येषु वेषः । दन्तपत्रिका कर्णाभरणभेदः । पिनद्धो बद्धः । कृष्णागुरुणः पंको निर्घृष्टकृष्णागुरुः, तस्य शुक्लस्य सतः कल्कश्चूर्णः, तच्छुरणात्कृष्णेन गुणेन शबलं कषायं साधिवासितं कञ्चुकं वारबाणं यस्य । उत्तरीयेत्यादिना संनद्धतां वर्मादिप्रसंगं चाह । वामेत्यनेनाश्वमिस्वभाववर्णनाश्चंगारिता चोक्ता । 'प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः' । हाटकं स्वर्णम् । यदेव द्विगुणात एव गाढग्रन्थिसहत्वम् । ग्रथिताविस्रंसिनी । असिधेनुश्छुरिका । वातहरिणो यो वाताभिमुखं धावति । अवट उन्मार्गः । कोणो लगुडः ।

मध्य इत्यादौ तस्य च मध्येऽष्टादशवर्षदेशीयं युवानमद्राक्षीदिति संबन्धः ।

सृष्टिमुत्पादयन्तम्, विलासप्रायमिव जीवलोकं जनयन्तम्, अनुरागमयमिव मार्गान्तरमालयन्तम्, शृङ्गारमयमिव दिवसमापादयन्तम्, रागराज्यमिव प्रवर्तयन्तम्, आकर्षणाञ्जनमिव चक्षुषोः, वशीकरणमन्त्रमिव मनसः, स्वस्थावेशचूर्णमिवेन्द्रियाणाम्, असंतोषमिव कौतुकस्य, सिद्धयोगमिव सौभाग्यस्य, पुनर्जन्मदिवसमिव मन्मथस्य, रसायनमिव यौवनस्य, एकराज्यमिव रामणीयकस्य, कीर्तिस्तम्भमिव रूपस्य, मूलकोषमिव लावण्यस्य, पुण्यकर्मपरिणाममिव संसारस्य, प्रथमांकुरमिव कान्तिलतायाः, सर्गाभ्यासफलमिव प्रजापतेः, प्रतापमिव विभ्रमस्य, यशःप्रवाहमिव वैदग्ध्यस्य, अष्टादशवर्षदेशीयं युवानमद्राक्षीत्। अद्राक्षीदिति पुरुषेणापि संबध्यते अद्राक्षीत्पुरुषं इति संबन्धः॥

पार्श्वे च तस्य द्वितीयमपरसंश्लिष्टतुरङ्गम्, प्रांशुमुत्तप्ततपनीयस्तम्भाकारम्, परिणतवयसमपि व्यायामकाठिनकायम्, नीचनखश्मश्रुकचम्, शुक्लिखलतिम्, ईषत्तुन्दिलम्, रोमशोरःस्थलम्, अनुल्बणोदारवेशतया जरामपि विनयमिव शिक्षयन्तम्, गुणानपि गरिमाणमिवानयन्तम्, महानुभावतामपि शिष्यतामिवानयन्तम्, आचारस्याचार्यकमिव कुर्वाणम्, धवलवारबाणधारिणम्, धौतदुकूलपट्टिकापरिवेष्टितमौलिं पुरुषम्।

अनङ्गयुगेति। अनङ्गजन्मना यदुपलक्षितं युगं कालविशेषस्तस्य नूतनमदनसादृश्यात्। यद्वा अनङ्गयोर्युगं तदवतारमिव। द्वित्वसंख्यापूर्वकत्वात्। चन्द्रमयीमिवेति कान्तिमत्त्वेन। आकर्षणाञ्जनं वशीकरणार्थं कज्जलम्। **असंतोषमिवेति**। यस्यैनं प्राप्य कौतुकं न निवर्तते, तस्य संतोष एव नास्ति। केषांचिदेव द्रव्याणां संबन्धी यो न कदाचित्कार्ये व्यभिचरति स सिद्धयोगः। सौभाग्यं तावत्सर्वं किंचन वशीकुरुते, एवं चास्य तदेव सिद्धयोग इव तदाश्रयणतानिःशेषलोकवशीकरणक्षमत्वम्। जन्मदिवसमिति तद्गोचरपतितानां कामोत्पत्तेः। **रसायनमिवेति**। यथा रसायनवशात्कश्चित्परिपूर्णश्च स्थिरश्च भवति, तद्वदेतदाश्रयेण यौवनम्। ईषदसमाप्तोऽष्टादशवर्षोऽष्टादशवर्षदेशीयस्तम्। न परेण संश्लिष्टस्तुरङ्गो यस्य तम्। दधीचस्य तु पर्याणश्लिष्टायुक्तम्। परिणतवयस्त्वेन सत्यवादिना सावित्रीसरस्वत्यौ प्रति च विस्रम्भकारित्वमुच्यते। अन्यथोपक्रम एव संभाषणमात्रं प्रवर्तते।

शुक्लिखलतिं शुक्लाकारखल्वाटम्। तुन्दिलं लम्बोदरम्। अत एवास्य विकुक्षिरिति नाम। अनुल्बणोऽनुद्धतः। उदारः श्रेष्ठः। **जरामिति**। जरा किल सर्वं विनयं शिक्षयति। महानुभावता महाशयता। अनुभावयति कार्यमकार्यं वा बोधयतीत्यनुभावः। **शिष्यतामिति**। परशासनदक्षकर्म महानुभावतया तत एवावसीयत इत्युक्तं भवति। आचारः शास्त्रकारप्रदर्शिता विशिष्टा नीतिः।

अथ स युवा पुरोयायिनां यथादर्शनं प्रतीत्य विस्मितमनसां कथयतां पदातीनां सकाशादुपलभ्य दिव्याकृतिं तत्कन्यायुगलमुपजातकुतूहलः प्रतूर्णतुरगो दिदृक्षुस्तं लतामण्डपोद्देशमाजगाम। दूरादेव च तुरगादवततार। निवारितपरिजनश्च तेन द्वितीयेन साधुना सह चरणाभ्यामेव सविनयमुपससर्प। कृतोपसंग्रहणौ तौ सावित्री समं सरस्वत्या किसलयासनदानादिना सकुसुमफलार्घ्यावसानेन वनवासोचितेनातिथ्येन यथाक्रममुपजग्राह। आसीनयोश्च तयोरासीना नातिचिरमिव स्थित्वा तं द्वितीयं प्रवयसमुद्दिश्यावादीत्—'आर्य, सहजलज्जाधनस्य प्रमदाजनस्य प्रथमाभिभाषणमशालीनता, विशेषतो वनमृगीमुग्धस्य कुलकुमारीजनस्य। केवलमियमालोकनकृतार्थाय चक्षुषे स्पृहयन्ती प्रेरयत्युदन्तश्रवणकुतूहलिनी श्रोत्रवृत्तिः। प्रथमदर्शने चोपायनमिवोपनयति सज्जनः प्रणयम्। अप्रगल्भमपि जनं, प्रभवता प्रश्रयेणार्पितं मनो मध्विव, वाचालयति। अयत्नेनैव चातिनम्रे साधौ धनुषीव गुणः परां कोटिमारोपयति विस्रम्भः। जनयन्ति च विस्मयमतिधीरधियामदृष्टपूर्वा दृश्यमाना जगति स्रष्टुः सृष्ट्यतिशयाः। यतस्त्रिभुवनाभिभावि रूपमिदमस्य महानुभावस्य। सौजन्यपरतन्त्रा चेयं देवानांप्रियस्यातिभद्रता कारयति कथां न तु युवतिजने सहोत्था तरलता। तत्कथयागमनेनापुण्यभाक्कृतमो विजृम्भितविरहव्यथः शून्यतां नीतो देशः। क्व वा गन्तव्यम्।

तौ सावित्री उपजग्राहेति संबन्धः॥

तुहफा- इति भाषायाम्॥

स च सर्वस्मिन्नाचार्यकमवलम्बते। संस्कारातिशयमापादयतीत्यर्थः। वलक्षः शुक्लः। वारवाणः कञ्चुकः। मौलेयाः केशाः।

अथेति। ननु गतागतिकतया सर्वचेतनाभिप्रायेण सौन्दर्यमेतयोरभिव्यज्यते। प्रतीत्य न पुनः प्रसङ्गत उपेत्य। कन्यकात्वादेतन्नानुचितम्। प्रतूर्णो वेगगामी साधुना विनीतेन। 'उपसंग्रहणं धीराः कथयन्त्यभिवादनम्'। आतिथ्यमेवोपजग्राहापूजयत्। 'प्रवयाः स्यात्परिणतः'। अशालीनता धृष्टता। वनशब्देन मृगीसामान्येऽपि जनसंपर्काद्यभावमाह। उपायनं ढौकनिका। उपनयति ढौकयति। **प्रगल्भमित्यादि**। मनः कर्तृ अप्रगल्भमपि जनं वाचालयति। कीदृशम्। प्रभवता स्वामिना प्रश्रयेण प्रत्यर्पितं दत्तमेवं विधमस्मदीयं युष्मासु मन इति बहिःप्रकाशितं यश्च परतश्च केनापि प्रभावशीलेन ढौकितं मध्वप्रगल्भमपि जनं कुलयोषित्प्रायं वाचालयति किंचन जल्पयति। अत्रापि प्रश्रयेणेति साभिप्रायम्। तथा च—'अन्यथान्यवनितागतचित्तं चित्तनाथमभिशङ्कितवत्या। पीतभूरिसुरयापि न मोदे निर्वृतिर्हि मनसो मदहेतोः॥' इत्युक्तम्। नम्रे प्रह्वे, कुब्जे च। गुणो विनयादिः, ज्या

कस्य वायमपहृतहरहुंकाराहंकारोऽपर इवानन्यजो युवा । किं-
नाम्नः समृद्धतपसः पितुरयममृतवर्षी 'कौस्तुभमणिरिव हरेर्हृदय-
माह्लादयति । का चास्य त्रिभुवननमस्या प्रभातसंध्येव महतस्ते-
जसो जननी । कानि वास्य पुण्यभाञ्जि भजन्त्यभिख्यामक्षराणि ।
आर्यपरिज्ञानेऽप्ययमेव क्रमः कौतुकानुरोधिनो हृदयस्य ' इत्यु-
क्तवत्यां तस्यां प्रकटितप्रश्रयोऽसौ प्रतिव्याजहार—' आयुष्मति,
सतां हि प्रियंवदता कुलविद्या । न केवलमाननं हृदयमपि च
ते चन्द्रमयमिव सुधाशीकरशीतलैरानन्दयति वचोभिः । सौजन्य-
जन्मभूमयो भूयसा शुभेन सज्जननिर्माणशिल्पकला भवादृश्यो
जायन्ते । दूरे तावदन्योन्यस्यालापनमभिजातैः सह दृशोऽपि
मिश्रीभूता महतीं भूमिमारोपयन्ति । श्रूयताम्—अयं खलु
भूषणं भार्गववंशस्य भगवतो भूर्भुवःस्वस्त्रितयतिलकस्य, अदभ्रप्र-
भावस्तम्भितजम्भारिभुजस्तम्भस्य, सुरासुरमुकुटमणिशिलाशयन-
दुर्ललितपादपङ्करुहस्य निजतेजःप्रसरप्लुष्टपुलोम्नश्च्यवनस्य बहि-
र्वृत्तिजीवितं दधीचो नाम तनयः जनन्यस्य जितजगतोऽने-
कपार्थिवसहस्रानुयातस्य शर्यातस्य सुता राजपुत्री त्रिभुवनकन्या-
रत्नं सुकन्या नाम । तां खलु देवीमन्तर्वत्नीं विदित्वा वैजनने
मासि प्रसवाय पिता पत्युः पार्श्वात्स्वगृहमानाययत् । असूत च
सा तत्र देवी दीर्घायुषमेनम् । अनेहसावर्धत तत्रैवायमानन्दितज्ञा-
तिवर्गो बालस्तारकराज इव राजीवलोचनो राजगृहे । भर्तृभवन-
मागच्छन्त्यामपि दुहितरि नासेचनकदर्शनमिर्मुमुञ्चन्मातामहो

पितर्हृदयमा-
ह्लादयति इति
संबन्धः ॥

नामञ्चदि-
ति संबंधः

च । कोटिः प्रकर्षः, धनुःशिखा च । देवानांप्रियस्येति पूजावचनम् । षष्ठ्या अलु-
क् । अत्रागमनेत्यादिना ब्रह्मोक्तशापबुद्ध्या दधीचस्य तद्भर्तृयोग्यतया कतम इति
देशोत्कर्षकुलादिकं पृच्छति । **कस्येति** । देवस्य । सिद्धा देवाः । अनन्यजः कामः ।
महतस्तेजस इति । महश्च तेजः सूर्याख्यम् । अभिख्या नाम । **अयमेव
क्रम इति** । यथास्योत्पत्त्यादिकं तद्वद्भवतोऽपीत्यर्थः । कला उपायः । भूरिति
रेफान्तो भूवाची । भुव इति रेफान्तः पातालवाची । भूश्च भुवश्च स्वश्च
भूर्भुवःस्वः । एषां त्रयमिति समासः । अदभ्रोऽनल्पः । जम्भारिरिन्द्रः । स
ह्यश्विभ्यां यज्ञभागभुजौ कुर्वावामिति चिरं प्रार्थितः । तथेति प्रतिपद्य ताभ्यां
भागं ददिन्द्रेणोद्यतवज्रेण रोषितः । ततस्तेनास्य सवज्रः स्तम्भितो भुज इति ।
दुर्ललितोऽलभ्यविषयः । **प्लुष्टपुलोम्न इति** । अनवरतं रुदत्यां दुहितरि कोपा-
न्मात्रा गृहाणेमामिति पुलोम्नो राक्षसस्योक्तम् । ततस्तां प्रतिगृह्य तत्रैव स्थाप-

मनोविनोदनं नप्तारम्। अशिक्षतायं तत्रैव सर्वा विद्याः सकलाश्च कलाः। कालेन चोपारूढयौवनमिममालोक्याहमिवासावप्यनुभवतु मुखकमलावलोकनानन्दमस्येति मातामहः कथंकथमप्येनं पितुरन्तिकमधुना व्यसर्जयत्। मामपि तस्य देवस्य सुगृहीतनाम्नः शर्यातस्याज्ञाकारिणं विकुक्षिनामानं भृत्यपरमाणुमवधारयतु भवती। पितुः पादमूलमायान्तं मया साभिसारमकरोत्स्वामी। तद्धि नः कुलक्रमागतं राजकुलम्। उत्तमानां च चिरंतनता जनयत्यनुजीविन्यपि जने कियन्मात्रमपि मन्दाक्षम्। अक्षीणः खलु दाक्षिण्यकोशो महताम्। इतश्च गव्यूतिमात्रमिव पारेशोणं तस्य भगवतश्च्यवनस्य स्वनाम्ना निर्मितव्यपदेशं च्यावनं नाम चैत्ररथकल्पं काननं निवासः। तदवधिश्चेयं नौ यात्रा। यदि च गृहीतक्षणं दाक्षिण्यमनवहेलं वा हृदयमस्माकमुपरि भूमिर्वा प्रसादानामयं जनः श्रवणार्हो वा, ततो न विमाननीयोऽयं यः प्रथमः प्रणयः कुतूहलस्य। वयमपि शुश्रूषवो वृत्तान्तमायुष्मत्योः। नेयमाकृतिर्दिव्यतां व्यभिचरति। गोत्रनामनी तु श्रोतुमभिलषति नौ हृदयम्। तत्कथय कतमो वंशः स्पृहणीयतां जन्मना नीतः। का चेयमत्रभवती भवत्याः समीपे समवाय इव विरोधिनां पदार्थानाम्। तथा हि। संनिहितबालान्धकारा भास्वन्मूर्तिश्च, पुण्डरीकमुखी हरिणलोचना च, बालातपप्रभाधरा कुमुदहासिनी च, कलहंसस्वना समुन्नतपयोधरा च, कमलकोमलकरा हिमगिरिशि-

अवहेलनं= अनादरः॥

यित्वा क्वापि गते रक्षसि सा भृगुणा विवाहिता। ततः सगर्भा सती पुलोम्नागत्यापह्रियमाणतया च्यवनं गर्भमत्याक्षीत्। तेन चान्वर्थनाम्ना तद्रक्षो दृष्ट्वेवादह्यत। अन्तर्वत्नीं गर्भिणीम्। वैजनने मासि प्रसवमासे। दीर्घायुषमिति साभिप्रायम्। रूपकुलाद्युत्कर्षे वर्णिते सत्येतदेव वरगुणवर्णनमवशिष्यते। अनेहसा परिपूर्णेन कालेन। 'न जायते यत्र तृप्तिस्तदासेचनकं विदुः'। नप्तारं पौत्रम्। साभिसारं ससहायम्। मन्दाक्षमुपरोधम्। गव्यूतिः क्रोशद्वयम्। यात्रा प्रस्थानम्। गोत्रं वंशः। समवाय एकत्रस्थितिः। बालेषु केशेष्वन्धकारं तम इति यस्या बालं प्रत्यग्रम्। भास्वती मूर्तिमती। भास्वत आदित्यस्य च मूर्तिः। न कदाचित्संनिहितबालान्धकारा भवतीति विरोधः। पुण्डरीकं पद्मम्, सिंहश्च यास्य मुखं तत्र कथं हरिणस्य विलोचने स्त इति विरोधः। पयोधरौ स्तनौ, मेघाश्च पयोधराः। कलहंसानां स्वनो यस्यां सा। सरित्कथं प्रावृड् भवतीति विरोधः। करो हस्तः, रश्मिश्च। शिला वातवज्रीभूतं हिमम्। यत्र च हिमगिरिशिलाभिः पृथुर्मध्यभागस्तत्र कथं पद्मकोमलकान्तिः। हिमस्पर्शे पद्मना-

लापृथुनितम्बा च, करभोरुर्विलम्बितगमना च, अमुक्तकुमारभावा स्निग्धतारका च, इति । सा त्ववादीत्—' आर्य, श्रोष्यसि कालेन । भूयसो दिवसानत्र स्थातुमभिलषति नौ हृदयम् । अल्पीयांश्चायमध्वा। परिचय एव प्रकटीकरिष्यति । आर्येण न विस्मरणीयोऽयमनुषङ्ग-दृष्टो जनः ' इत्यभिधाय तूष्णीमभूत् । दधीचस्तु नवाम्भोभरगभीरा-म्भोधरध्वाननिभया भारत्या नर्तयन्वनलताभवनभाजो भुजगभुजः सुधीरमुवाच—'आर्य, करिष्यसि प्रसादमार्याराध्यमाना । पश्या-मस्तावत्तातम् । उत्तिष्ठ । व्रजामः ' इति । तथेति च तेनाभ्यनुज्ञातः शनकैरुत्थाय कृतनमस्कृतिरुच्चचाल । तुरगारूढं च तं प्रयान्तं सरस्वती सुचिरमुत्तम्भितपक्ष्मणा निश्चलतारकेण लिखितेनेव च-क्षुषा व्यलोकयत् । उत्तीर्य शोणमचिरेणैव कालेन दधीचः पितुरा-श्रमपदं जगाम । गते च तस्मिन्सा तामेव दिशमालोकयन्ती सुचि-रमतिष्ठत् । कृच्छ्रादिव च संजहार दृशम् ।

अथ मुहूर्तमिव स्थित्वा स्मृत्वा च तां तस्य रूपसंपदं पुनः पु-नर्व्यस्मयतास्या हृदयम् । भूयोऽपि चक्षुराचकांक्ष तद्दर्शनम् । अवशेव केनाप्यनीयत तामेव दिशं दृष्टिः । अप्रहितमपि मनस्ते-नैव सार्धमगात् । अजायत च नवपल्लव इव बालवनलतायाः कुतोऽप्यस्या अनुरागश्चेतसि । सालस्येव शून्येव सनिद्रेव दि-वसमनयत् । अस्तमुपयाति च प्रत्यक्पर्यस्तमण्डले लाङ्गलिका-स्तबकताम्रत्विषि कमलिनीकामुके कठोरसारसशिरःशोणशो-चिषि सावित्रे त्रयीमये तेजसि, तरुणतरतमालश्यामले च मलि-

---

शात् । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' करभश्चोष्ट्रः । विलम्बितं सवि-लासम्, लम्बितश्च करभो यस्याः । करभोरु कथं विगतकरभगमनेति विरोधः । कुमारभावो बाल्यम्, कुमारे च भावो भक्तिः । स्निग्धो रम्यः, प्रतीतश्च । तारका-क्षणः कनीनिका, दैत्यभेदश्च तारकः स्कन्देन यो हतः । परिचयः संस्तवः । अनु-षङ्गः प्रसङ्गः । विकुक्षिप्रार्थितयापि सावित्र्या कौतुकनिवृत्तिर्माभूदित्यात्मस्वरूपं नोक्तम्। अत एवोत्तरत्र तदनुबन्ध एवोक्तः—**भूयसो दिवसानित्यादिना** । स्वरूपो-क्तौ च ज्ञातसरस्वतीकत्वेनापत्यजननकार्यभङ्गो भवेत् । भारती वाक् । भुजगभुजो मयूरान्, भुजग इव भुजावस्येति च, उच्चचालोत्थातुं प्रवृत्तः । उत्तम्भितान्यु-त्क्षिप्तानि ।

कुतोऽस्मि कस्मादपि न ज्ञायत इत्यर्थः । मनुष्यतस्तथाविधस्तादृश्याः कथम-नुराग इति । कथमेतदस्या उपपद्यत इति न वाच्यम् । यदाह मुनिः—'शापभ्रं-शात्तु दिव्यानां तथा चापत्यलिप्सया । कार्यो मानुषसंयोगः शृङ्गाररससंश्रयः ॥'

नयति व्योम व्योमव्यापिनि तिमिरसंचये संचरत्सिद्धसुन्दरीनूपुररवानुसारिणि च मन्दं मन्दं मन्दाकिनीहंस इव समुत्सर्पति शशिनि गगनतलम्, कृतसंध्याप्रणामा निशामुख एव निपत्य विमुक्ताङ्गी पल्लवशयने तस्थौ । सावित्र्यपि कृत्वा यथाक्रियमाणं सायंतनं क्रियाकलापमुचिते शयनकाले किसलयशयनमभजत । जातनिद्रा च सुष्वाप ।

इतरा तु मुहुर्मुहुरङ्गवलनैर्विलुलितकिसलयशयनतला निमीलितलोचनापि नाभजत निद्राम् । अचिन्तयच्च—'मर्त्यलोकः खलु सर्वलोकानामुपरि, यस्मिन्नेवंविधानि संभवन्ति त्रिभुवनभूषणानि सकलगुणग्रामगुरूणि रत्नानि । तथा हि । तस्य मुखलावण्यप्रवाहस्य निष्यन्दबिन्दुरिन्दुः । तस्य च चक्षुषो विक्षेपा विकचकुमुदकुवलयकमलाकराः । तस्य चाधरमणेर्दीधितयो विकसितबन्धूकवनराजयः । तस्य चाङ्गस्य परभागोपकरणमनङ्गः । पुण्यभाञ्जितानि चक्षूंषि चेतांसि यौवनानि वा स्त्रैणानि, येषामसौ विषयो दर्शनस्य । क्षणं नु दर्शयता च तमन्यजन्मजनितेनेव मे फलित-

---

इति । अन्यत्र कुतः क्षितेर्नवपल्लवोऽनुरागहतो लतार्थो जायत इत्येवमभिलाषरूपं प्रथमं दशान्तरमालभ्येत्यादिना द्वितीयचिन्तनरूपमाह । अनयत्कष्टेनात्यवाहयत् । अस्तमित्यादौ पल्लवशयने तस्याविति संबन्धः । प्रतीच्यां पश्चिमायाम् । लाङ्गलिका फलिनी । मयूरशिखौषधिरित्यपरे, रक्तिकेत्यन्ये । कमलिनीकामुक इति सरस्वतीदयिताभिप्रायेणोक्तम् । कठोरो जरठः । सारसो लक्ष्मणः । शोणो लोहितः । शोचिर्दीप्तिः । 'ऋग्यजुःसामनामानि त्रयो वेदास्त्रयी स्मृता । वेदे च पठ्यते सैषा' । त्रय्येव विद्या तपतीति । 'कृत–'इत्यादिना 'तस्थौ' इत्यन्तेन क्रियान्तरत्यागेन वैमनस्यमावेद्यते । 'वेपते श्वसते चैव मनोरथविचिन्तनैः । प्रद्वेषेणान्यकार्याणामनुस्मृतिरपीष्यते ॥' **निशामुख एवेति** । न पुनरुचिते शयनकाले विमुक्ताङ्गीत्यनेन निःसहाङ्गत्वमस्या दर्श्यते । **तस्थाविति** । न पुनर्निद्रामलभत । यथाक्रियमाणमित्यनेन च सरस्वतीतोऽस्या व्यतिरेकं दर्शयन्सरस्वत्या एवानङ्गावस्थामाह ।

विलुलितं विपर्यासितम् । मर्त्यलोक इत्यादिना गुणकीर्तनम् । चतुर्थमवस्थाविशेषमाह । तदुक्तम्—'अङ्गप्रत्यङ्गलीलाभिर्वाक्चेष्टासहितेक्षणैः । नास्त्यन्यः सदृशस्तेन तदेतद्गुणकीर्तनम् ॥' इति । गुणा वैदग्ध्यादयः सूत्राणि च । तद्वशेन गुरूणि बहुमानभाञ्जि । इतरत्र तु तिष्ठतु तावदेकः । गुणग्रामस्यापि गुणिरूपितेनापि दुर्वहानीति यावत् । **तस्येति** । पूर्वानुभूतस्य बिन्दुरिति न केवलं लावण्यप्रवाहाभिप्रायेण यावत्संनिवेशसादृश्यात् । विक्षेपाः परतः प्रेरणानि । कुमुदेत्याद्युक्तम् । शुक्लकृष्णरक्तरुचित्वाच्चक्षुषो दीधितय इति मणिशब्दाभिप्रायेण । विकसित-

मधर्मेण । का प्रतिपत्तिरिदानीम्' इति चिन्तयन्त्येव कथंकथमप्युपजातनिद्रा चिरात्क्षणमशेत । सुप्ता च तं दीर्घलोचनं ददर्श । स्वप्नासादितद्वितीयदर्शना चाकर्णाकृष्टकार्मुकेण मनसि निर्दयमताड्यत मकरकेतुना । प्रतिबुद्धाया मदनशरताडितायाश्च तस्या वार्तामिवोपलब्धुमरातिराजगाम । तथा हि ततः प्रभृति कुसुमधूलिधवलाभिर्वनलताभिरताडितापि वेदनामधत्त । मन्दमन्दमारुतविधुतैः कुसुमरजोभिरदूषितलोचनाप्यश्रुजलं मुमोच । हंसपक्षतालवृन्तव्राताविततैः शीणशीकरैरसिक्ताप्यार्द्रतामगात् । प्रेङ्खत्कादम्बमिथुनाभिरनूढाप्यघूर्णत वनकमलिनीकल्लोलदोलाभिः । विघटमानचक्रवाकयुगलविसृष्टैरस्पृष्टापि श्यामतामाससाद विरहनिःश्वासधूमैः । पुष्पधूलिधूसरैरदृष्टापि व्यचेष्टत मधुकरकुलैः ।

अथ गणरात्रापगमे निवर्तमानस्तेनैव वर्त्मना तं देशमागत्य तथैव निवारितपरिजनश्छत्रधारद्वितीयो विकुक्षिर्डुढौके । सरस्वती तु तं दूरादेव संमुखमागच्छन्तं प्रीत्या सम्यक्समुत्थाय वरमृगीवोद्ग्रीवा विलोकयन्ती मार्गोपरिश्रान्तमस्नपयदिव धवलितदशदिशा दृशा कृतासनपरिग्रहं तु तं प्रीत्या सावित्री, पप्रच्छ—

शार्यातस्य मृदयः ॥

शब्देन लौहित्यातिशयमाह । अङ्गानि विद्यन्ते यस्य तदङ्गं शरीरम् । परभागो वर्णस्य वर्णान्तरेण शोभातिशयः । स्त्रैणानि स्त्रीसंबन्धीनि । का प्रतिपत्तिः किमनुष्ठेयम् । मदन-इत्यादिनोद्वेगरूपं पञ्चममवस्थाभेदमाह । यदुक्तम्—'आसने शयने वापि न हृष्यति न तुष्यति । नित्यमेवोत्सुका च स्यादुद्वेगस्थानमाश्रिता ॥ चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च । कुर्यात्तदेवमत्यन्तमुद्योगाभिनयेन च ॥' इति । दश किल कामावस्थाः । तदुक्तम्—'प्रथमे त्वभिलाषः स्याद्द्वितीये चिन्तनं भवेत् । अनुस्मृतिस्तृतीये तु चतुर्थे गुणकीर्तनम् ॥ उद्वेगः पञ्चमे प्रोक्तः प्रलापः षष्ठ उच्यते । उन्मादः सप्तमे चैव भवेद्व्याधिस्तथाष्टमे ॥ नवमे जडता प्रोक्ता दशमे मरणं भवेत् ॥' इति । अरतिर्दुःखासिका हि । कामवधूप्रतिपक्षभूतेति तदागमनाभिधानम् । हंसपक्षा इव तालवृन्तं व्यजनम् । आर्द्रतां सस्नेहताम्, क्लिन्नतां च । प्रेङ्खद्दोलायमानम् । कादम्बाः कृष्णहंसाः । श्यामता शृङ्गाररसाविष्कारि वैवर्ण्यम् । यदुक्तम्—'शृङ्गारदेवो भगवान्मुरारिः संगीयते श्यामवपुर्मुरारिः । श्यामो मनाक्स्निग्धतरश्च तेन शृङ्गारशंसी मुखराग उक्तः ॥' अथ श्यामता सधूमता । श्यामत्वेऽपि सधूमता इति विरोधाभासः ।

गणरात्रं निशाबह्वयः । **तेनैव वर्त्मनेति** । अनेन तस्य यदृच्छया तदाश्रयमागमनमिति दर्शयति । प्रधानप्रकृतेः स्थवीयसस्तथाविधव्यापारविनियोगादिनौचित्यात् । अत एव वक्ष्यति—'यथाभिलषितं देशमयासीत्' । डुढौके इत्यनेन निमित्त-

'आर्य, काच्चित्कुशली कुमारः' इति । सोऽब्रवीत्—'आयुष्मति, कुशली । स्मरति च भवत्योः, केवलमर्मासु दिवसेषु तनीयसीमिव तनुं बिभर्ति । अविज्ञायमानां चानिमित्तां शून्यतामिवाधत्ते । अपि च । अन्वक्षमागमिष्यत्येव मालतीति नाम्ना वाणिनी वार्तां वो विज्ञातुम् । उच्छ्वसितं सा कुमारस्य ' इति तच्छ्रुत्वा पुनरपि सावित्री समभाषत—' अतिमहानुभावः खलु कुमारो यदेवमविज्ञायमाने क्षणदृष्टेऽपि जने परिचितिमनुबध्नाति । तस्य हि गच्छतो यदृच्छया कथमप्यंशुकमिव मार्गलतासु मानसमस्मासु मुहूर्तमासक्तमासीत् । अशून्यं हि सौजन्यमाभिजात्येन वः स्वामिसूनोः । अलसः खलु लोको यदेवं सुलभसौहार्दानि येनकेनचिन्न क्रीणाति महतां मनांसि । सोऽयमौदार्यातिशयः कोऽपि महात्मनामितरजनदुर्लभो येनोपकरणीकुर्वन्ति त्रिभुवनम् ' इति । विकुक्षिरुच्चावचैरालापैः सुचिरमिव स्थित्वा यथाभिलषितं देशमयासीत् । X २४/6

अपरेद्युरुद्यति भगवति द्युमणावुद्दामद्युतावभिद्रुततारके तिरस्कृततमसि तामरसव्यासव्यसनिनि सहस्ररश्मौ शोणमुत्तीर्यायान्ती, मकरकेतुकेतुपताका, कुलदेवतेव चन्द्रमसः, पुनःसंजीवनौषधिरिव पुष्पधनुषः, वेलेव रागसागरस्य, ज्योत्स्नेव यौवनचन्द्रोदयस्य, महानदीव रतिरसामृतस्य, कुसुमोद्भूतिरिव सुरततरोः, बालविद्येव वैदग्ध्यस्य, कौमुदीव कान्तेः, धृतिरिव धैर्यस्य, गुरु-

---

परतन्त्रया संनिकृष्टमेवैनमालुलोकेति प्रदर्शितम् । यदुक्तम्—'पटुता धाष्टर्यता इङ्गिताकारज्ञानं प्रतारणे देशकालज्ञता कार्येषु विषह्यबुद्धित्वं लघ्वी प्रतिपत्तिः सापाया च इति दूतीगुणाः' । भरतमुनिरपि—'विज्ञानगुणसंपन्ना कथिनी लिंगिनी तथा । रञ्जोपजीविनी चापि प्रतिपत्तिविचक्षणा ॥ प्रोत्साहनैककुशलेत्यादिदूतीगुणैर्युता ॥' इति । अत एवागृह्णचाकारतःप्रभृतीत्यादि वक्ष्यते । अन्वक्षं प्रत्यक्षम् । वाणिनी दूती । उच्छ्वसितमित्यनेनातिविस्रम्भवत्ता ख्याता । उच्छ्वसितं प्राण इति वा । यदृच्छया यथाकथंचित् । यश्च तथागच्छति यस्य निरवधानतया क्वचिदंशुकादि गलतिम् । आभिजात्येन महाकुलीनत्वेनोपकरणीकुर्वन्त्यायततां नयन्ति । उच्चावचैः प्रकृतवस्त्वसंस्पर्शिभिः, विचित्रैरिति वा ।

अपरेद्युरित्यादावीदृशी मालती समदृश्यतेति संबन्धः । दिवि मणिरिवि द्युमणिः । वियद्भूषणं सूर्यः । अभिद्रुता न्यक्कृता । तामरसं पद्मम् । व्यासो विकासः । वेला यथा सागरं क्षोभयति तद्वदेव रागम् । क्षोभेन यथा सागरो दुरुत्तर एवमेतयापि रागः । यथा । ज्योत्स्नया विना चन्द्रोदयो भवन्नपि न क्वापि विलसन्विभाव्यते तथैतया विना यौवनं सविलासमन्यत्र न दृश्यते । रतिप्रधानो रसः शृङ्गार एव ।

शालेव गौरवस्य, बीजभूमिरिव विनयस्य, गोष्ठीव गुणानाम्, मनस्विनेव महानुभावतायाः, तृप्तिरिव तारुण्यस्य, कुवलयदलदामदीर्घलोचनया पाटलाधरया कुन्दकुड्मलस्फुटदशनया शिरीषमालासुकुमारभुजयुगलया कमलकोमलकरया बकुलसुरभिनिःश्वसितया चम्पकावदातया कुसुममय्येव ताम्बूलकरङ्कवाहिन्या महाप्रमाणाश्वतरारूढयानुगम्यमाना, कतिपयपरिचारकपरिकरा मालती समदृश्यत। दूरादेव च दधीचप्रेम्णा सरस्वत्या लुण्ठितेव मनोरथैः, आकृष्टेव कुतूहलेन, प्रत्युद्गतेवोत्कलिकाभिः, आलिङ्गितेवोत्कण्ठया, अन्तःप्रवेशितेव हृदयेन, स्नपितेवानन्दाश्रुभिः, विलुप्तेव स्मितेन, वीजितेवोच्छ्वासितैः, आच्छादितेव चक्षुषा, अभ्यर्चितेव वदनपुण्डरीकेण, सखीकृतेवाशया सविधमुपययौ। अवतीर्य च तुरगाद्दूरादेवावनतेन मूर्ध्ना प्रणाममकरोत्। आलिङ्गिता च ताभ्यां सविनयमुपाविशत्। सप्रश्रयं ताभ्यां संभाषिता च पुण्यभाजमात्मानममन्यत। अकथयच्च दधीचसंदिष्टं शिरसि विनिहितेनाञ्जलिना नमस्कारम्। अगृह्णाच्चाकारतः प्रभृत्यग्राम्यतया तैस्तैरपि पेशलैरालापैः सावित्रीसरस्वत्योर्मनसी।

सरस्वत्याः सविधमुपययौ इति संबन्धः॥

माधुर्यातिशययोगित्वात्प्रकृष्टत्वाच्च। ह्लादनममृतम्। यदुक्तम्—'शृङ्गार एव परमः परः प्रह्लादनो रसः' इति। संप्रयोगो रतं रहःशयनं मोहनमिति पर्यायाः। बालविद्या न कंचन मुञ्चति, तद्वदेष वैदग्ध्यम्। **कौमुदीति**। तथाविधकान्त्यतिशयसंभवात्। ध्रियते येन धृतिः। अस्यां सत्यां धैर्यमपि। यद्वा धृतिः प्रवेशरक्षणम्। यथा प्रविशन्कश्चिद्राजानिकटं ध्रियते केनचित्तथा धैर्यं तावत्प्रसरति — यावदेषा न दृष्टा एतस्यां दृष्टायां सर्वे धैर्यशून्या इति। 'समान विद्यावित्तशीलबुद्धिवयसामनुरूपैरालापैरेकत्रासनबन्धो गोष्ठीमनस्विता' इत्यनेनैतस्या महानुभावताया व्यभिचारित्वमुच्यते। यस्माद्यत्र मनस्विता तत्र महाशयत्वमेवावश्यं संभावयतीति स्थितमेव। **तृप्तिरिवेति**। यथा कश्चित्संजाततृप्तिर्नान्यत्किंचित्पुनरपेक्षते तद्वदासादितमालतीकं तारुण्यम्। एतदाश्रयणेन परिपूर्णवैषयिकोपभोगप्राप्तिस्तारुण्यस्येत्यर्थः। **कुसुममय्येवेति**। कुवलयादिभिर्नयनादीनां विधानम्। तरुणोऽश्वोऽश्वतरः। 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वम्' इति तनुत्वे तरप्। अत्र च व्याख्यातम्—'तनुत्वं द्वितीयवयःप्राप्तिः' इति। अश्वतरो वा गर्दभेनाश्वायां जातः। **मालतीति**। एवं दधीचपरिवारभूतया मालत्या गुणवर्णनद्वारेण सरस्वत्या एव निःसामान्यगुणातिशयो ध्वन्यते। **लुण्ठितेवेति**। वक्ष्यमाणं प्रार्थनादि। तया मनोरथैरुत्प्रेक्ष्य स्वीकृतमित्यतस्तैर्लुण्ठितेवेत्युक्तम्। लुण्ठनं च पथियाभिवितरणमेवमन्यत्। उत्कलिका रुहरुहिका। सविधं समीपम्। अपि च यः स्निग्धो दूरात्सविधमायाति, तस्य

क्रमेण चातीते मध्यंदिनसमये शोणमवतीर्णायां सावित्र्यां स्नातुमुत्सारितपरिजना साकूता मालती कुसुमप्रस्तरशायिनीं समुपसृत्य सरस्वतीमावभाषे—' देवि, विज्ञप्यं नः किंचिदस्ति रहसि । अतो मुहूर्तमवधानदानेन प्रसादं क्रियमाणमिच्छामि ' इति । सरस्वती तु दधीचसंदेशाशङ्किनी किं वक्ष्यतीति कुसुमशयनीयान् मन्दं मन्दमुदगात् । ' उपांशु कथय ' इति कपोलतलप्रतिबिम्बितां लज्जयेव कर्णमूलं मालतीं प्रवेशयन्ती मधुरया गिरा सुधीरमुवाच— ' सखि मालति किमर्थमेवमभिदधासि । काहमवधानदानस्य शरीरस्य प्राणानां वा । सर्वस्याप्रार्थितोऽपि प्रभवत्येवातिवेलं चक्षुष्यो जनः । सा न काचिद्या न भवसि मे स्वसा सखी प्रणयिनी प्राणसमा च । नियुज्यतां यावतः कार्यस्य क्षमं क्षोदीयसो गरीयसो वा शरीरकमिदम् । अनवस्करमाश्रवं मे त्वयि हृदयम् । प्रीत्या प्रतिसरा विधेयास्मि ते । व्यावृणु वरवर्णिनि, विवक्षितम् ' इति । सा त्ववादीत्—' देवि, जानास्येव माधुर्यं विषयाणाम्, लोलुपतां चेन्द्रियग्रामस्य, उन्मादितां च नवयौवनस्य, पारिप्लवतां च मनसः । प्रख्यातैव मन्मथस्य दुर्निवारता । अतो न मामुपालम्भेनोपस्थातुमर्हसि । न च बालिशता चपलता चारणता वा वाचालतायाः कारणम् । न किंचिन्न कारयत्यसाधारणा स्वामिभक्तिः । सा त्वं देवि,

---

लुण्ठनादिसर्वमर्चनावसानं क्रियत इति ध्वनिः । पेशलैर्हृद्यैः ।

आकूतमभिप्रायः । रहस्येकान्ते । सरस्वतीत्यादौ सरस्वती कुसुमशयनीयादुदगादुदतिष्ठदिति संबन्धः । च इति ध्वनति । स्वसा भगिनी । प्रणयिनी विश्वस्ता । अतिशयेन क्षुद्रमल्पं क्षोदीयः । 'ज्ञेयं गुह्यमवस्करम्' । आश्रवं वचसि स्थितम् । प्रतिसरानुकूला । विधेया वश्या । व्यावृणु प्रकटय । वरवर्णिनि वरारोहे । लोलुपतां साभिलाषत्वम् । 'चलार्थकौ निगद्येते पारिप्लवपरिप्लवौ' । बालिशोऽज्ञः । चारणता धूर्तता । असाधारणानन्यसदृशी । देवी देवेनेति च परस्परसमगुणयोगित्वमभिव्यनक्ति । गुरुर्गरीयान्, उपदेष्टा वा । तद्वशवर्त्तित्वात् । यश्च देवस्तस्य गुरुराचार्यः कश्चिदवश्यं संभवति । जीवितस्येश्वरः स्वामी जीवितेशः । शिशिरतया मदनदाहप्रशमनहेतुत्वात् । अमृतमयत्वेन च जीवितसंधारणसक्तत्वात् । अथ च जीवितेशो मृत्युः । चन्द्रादयो ह्यापातत एव तापं शमयन्ति, अनवरतं सेव्यमानाः पुनः कामोद्दीपकत्वेन मृत्युं दिशन्ति । राजपक्षे जीवितेशः कश्चित्पुरोहितप्रायः । उच्छ्वसनमुच्छ्वासस्तत्र हेतुः । अथ च श्वासोत्क्रान्तौ कारणम्, इतरत्र सचिवप्राया विश्वसनीयाः । आधयश्चित्तपीडाः । अत एवान्तरङ्गमन्तःशरीरं यानि स्थानानि तेषु, इतरत्रान्तरङ्गान्तर्वंशिकस्तत्स्थानेषु

यदैव दृष्टासि देवेन तत एवारभ्यास्य कामो गुरुः, चन्द्रमा जीवितेशः, मलयमरुदुच्छ्वासहेतुः, आधयोऽन्तरङ्गस्थानेषु, संतापः परमसुहृत्, प्रजागर आप्तः, मनोरथाः सर्वगताः, निश्वासा विग्रहाग्रेसराः, मृत्युः पार्श्ववर्ती, रणरणकः संचारकः, संकल्पा बुद्ध्युपदेशवृद्धाः। किं वा विज्ञापयामि। अनुरूपो देव्या इत्यात्मसंभावना, शीलवानिति प्रक्रमविरुद्धम्, धीर इत्यवस्थाविपरीतम्, सुभग इति त्वदायत्तम्, स्थिरप्रीतिरिति निपुणोपक्षेपः, जानाति सेवितुमित्यस्वामिभावोचितम्, इच्छति दासभावमामरणात्कर्तुमिति धूर्तालापः, भवनस्वामिनी भवसीत्युपप्रलोभनम्, पुण्यभागिनी भजति भर्तारं तादृशमिति स्वामिपक्षपातः, त्वं तस्य मृत्युरित्यप्रियम्, अगुणज्ञासीत्यधिक्षेपः, स्वप्नेऽस्य बहुशः कृतप्रसादासीत्यसाक्षिकम्, प्राणरक्षार्थमर्थयत इति कातरता, तत्रागम्यतामित्याज्ञा, वारितोऽपि बलादागच्छतीति परिभवः। तदेवमगोचरे गिरामसीति श्रुत्वा 'देवी प्रमाणम्' इत्यभिधाय तूष्णीमभूत्।

अथ सरस्वती प्रीतिविस्फारितेन चक्षुषा प्रत्यवादीत्—'अयि, न शक्नोमि बहु भाषितुम्। एषास्मि ते स्मितवादिनि वचसि स्थिता। गृह्यन्तामम्मी प्राणाः' इति। मालती तु 'यदाज्ञापयस्यतिप्रसादः' इति व्याहृत्य प्रहर्षपरवशा प्रणम्य प्रजविना तुरगेण ततार शोणम्। अगाच्च दधीचमानेतुं च्यवनाश्रमपदम्। इतरा तु सखीस्नेहेन सावित्रीमपि विदितवृत्तान्तामकरोत्। उत्कण्ठाभारभृता च ताम्यता चेतसा कल्पायितं कथंकथमपि दिवसशेषमनैषीत्, अस्तमुपगतवति भगवति गभस्तिमति, स्तिमिततर-

---

विश्वसनीयजनाधिकारेषु। परं प्रकृष्टम्। असुहृरोऽमित्रो वा, अन्यत्र परमसुहृन्मित्रं च आप्तः प्राप्तो बान्धवप्रायः कश्चित्। सर्वगताश्चारा अपि संस्थाख्याः। विग्रहो विरोधः, देहश्च। **मृत्युरिति**। त्वदनङ्गीकारेण निश्चितं म्रियते। राज्ञोऽपि पार्श्वे मृत्युस्तिष्ठत्येव। रणरणको दुःखमरतिकृतम्। अत एव संचारक एकत्र नरे संभवदितरत्र संचारयति, चरितं वस्तु यः प्रापयते सः। द्विविधा हि चाराः—'संस्थाः, संचारकाश्च। वृद्धा महान्तः, स्थविराश्च। अनुरूप इत्यादिनेदमिदं तत्रास्तीति वक्रोक्त्या सातिशयं मालती वैदग्ध्येनाह। प्रक्रम आरम्भः। निपुणोपक्षेपो बुद्धिमत्प्रक्रमः। धूर्तालापः प्रतारणावचनम्। **वारित इति**। भवत्येवेत्यर्थात्।

प्रजविनेति साभिप्रायम्। अस्तमित्यादौ सरस्वती प्रतिपालयामासेति संबन्धः।

मवतरति तमसि, प्रहसितामिव सितां दिशं पौरंदरीं दरीमिव केसरिणि, मुञ्चति चन्द्रमसि, सरस्वती शुचिनि चीनांशुकसुकुमारे तरङ्गिणी दुगूलकोमले शयन इव शोणसैकते समुपविष्टस्वप्नकृतप्रार्थनापादपतनलज्जां दधीचचरणनखचन्द्रिकामिव ललाटिकां दधाना, गण्डस्थलादर्शप्रतिबिम्बितेन 'चारुहासिनि, अयमसावाहृतो हृदयदयितो जनः' इति श्रवणसमीपवर्तिना निवेद्यमानमदनसंदेशेवेन्दुना, विकीर्यमाणनखकिरणचक्रवालेन बालव्यजनीकृतचन्द्रकलाकलापेनेव करेण वीजयन्ती खेदिनं कपोलपट्टम्, 'अत्र दधीचाद्दते न केनचित्प्रवेष्टव्यम्' इति तिरश्चीनं चित्तभुवा पातितां विलासवेत्रलतामिव बालमृणालिकामधिस्तनं स्तनयन्ती कथमपि हृदयेन वहन्ती प्रतिपालयामास । आसीच्चास्या मनसि—'अहमपि नाम सरस्वती यत्रामुना मनोजन्मना जघन्येव परवशीकृता । तत्र का गणनेतरासु तपस्विनीष्वतितरलासु तरुणीषु' इति ।

आजगाम च मधुमास इव सुरभिगन्धवहः, हंस इव कृतमृणालधृतिः, शिखण्डीव घनप्रीत्युन्मुखः, मलयानिल इवाहितसरसचन्दनधवलतनुलतोत्कम्पः, कृष्यमाण इव कृतकरकचग्रहेण ग्रहपतिना, मालतीद्वितीयो दधीचः । आगत्य च हृदयगतदयितानूपुररवमिश्रयेव हंसगद्गदया गिरा कृतसंभाषणो यथा मन्मथः समाज्ञापयति, यथा यौवनमुपदिशति, यथानुरागः शिक्षयति, यथा विदग्धताध्यापयति, तथा तामभिरामां

गभस्तिमान्रविः । पौरंदर्यैन्द्री । दरी खदा । चीनेत्यादि सैकतविशेषणम् । उपमानस्य तु दुगूलकोमल इत्युक्तम् । तरंगिणी प्रतिदिनं क्षीयमाणेन वारिणा कृतलेखे भंगियुक्ते च चन्द्रिका कान्तिरत्र । ललाटालंकारो ललाटिका । चक्रवालं समूहः बालव्यजनं चामरम् । स्तनमध्ये प्रवेशाभावात्तिरश्चीनमित्युक्तम् । यश्च वेत्री प्रवेशनिषेधननिमित्तं वेत्रलतां पातयति स तिरश्चीनं स्तनयोरधिस्तनम् । विभक्त्यर्थेऽव्ययीभावः । कुचपृष्ठ इत्यर्थः । स्तनयन्ती कलयन्ती । स्तनिः शब्दार्थश्चौरादिकः । 'स्तनन्ति' इति वा पाठः । तपस्विनीषु वराकीषु ॥

आजगामेत्यादावाजगामेति संबन्धः । सुरभिगन्धवहो वातः सुरभिगन्धं च यो वहति । धृतिर्धारणम्, प्राणयात्रा च । घनः । सरसं सान्द्रं यच्चन्दनं तेन धवलया तनुलतयाहितत्रप उत्कम्पः कामधर्मो यस्य । अन्यत्र चन्दनांश्च धवांश्च लान्ति श्रयन्ति यास्तन्व्यो लतास्तासामाहित उत्कम्पः कम्पनं येनेति । कृष्यमाण इत्युद्दीपनकारणत्वात् । करा रश्मयः, हस्तश्च करः । हस्तस्य कर्षणं समुचितम् । ग्रहपतिश्चन्द्रः । **यथा मन्मथ इति** । मन्मथस्य प्रभवनशीलत्वेनाज्ञा-

रामामरमयत् । उपजातविस्रम्भा चात्मानमकथयदस्य सरस्वती तया तु सार्धमेकं दिवसमिवानयत्संवत्सरमधिकम् ।

अथ दैवयोगात्सरस्वती बभार गर्भम् । असूत चानेहसा सर्वलक्षणाभिरामं तनयम् । तस्मै च जातमात्रायैव 'सम्यक्सरहस्याः सर्वे वेदाः सर्वाणि च शास्त्राणि सकलाश्च कलाः मत्प्रसादात्स्वयमाविर्भविष्यन्ति' इति वरमदात् । सद्भर्तृश्लाघया दर्शयितुमिव हृदयेनादाय दधीचं पितामहादेशात्समं सावित्र्या ब्रह्मलोकमारुरोह । गतायां च तस्यां दधीचोऽपि हृदये ह्लादिन्येवाभिहतो भार्गववंशसंभूतस्य भ्रातुर्ब्राह्मणस्य जायामक्षमालाभिधानां मुनिकन्यकामात्मसूनोः संवर्धनाय नियुज्य विरहातुरस्तपसे वनमगात् । यस्मिन्नेवावसरे सरस्वत्यसूत तनयं तस्मिन्नवाक्षमालापि सुतं प्रसूतवती । तौ तु सा निर्विशेषं सामान्यस्तन्या शनैः शनैः शिशू समवर्धयत् । एकस्तयोः सारस्वताख्य एवाभवत्, द्वितीयोऽपि वत्सनामाभवत् । आसीच्च तयोः सोदर्ययोरिव स्पृहणीया प्रीतिः ।

अथ सारस्वतो मातुर्महिम्ना यौवनारम्भ एवाविर्भूताशेषविद्यासंभारस्तस्मिन्सवयसि भ्रातरि प्रेयसि प्राणसमे सुहृदि वत्से वाङ्मयं समस्तमेव संचारयामास । चकार च कृतदारपरिग्रहस्यास्य तस्मिन्नेव प्रदेशे प्रीत्या प्रीतिकूटनामानं निवासम् । आत्मनाप्याषाढी, कृष्णाजिनी, वल्कली, अक्षवलयी, मेखली, जटी च भूत्वा तपस्यतो जनयितुरेव जगामान्तिकम् । तपस्यतो ॥

अथ अथ तस्मात्प्रवर्धमानादिपुरुषजनितात्मचरणोन्नतिनिर्गतप्रघोषः, परमेश्वरशिरोधृतः, सकलकलागमगम्भीरः, महामुनिमान्यो

दानमुचितम् । एवं सर्वत्रोपदिशतीत्थमित्थं वर्तस्वेत्युपदेशः । देवताविषयं संभोगशृङ्गारवर्णनमनुचितमिति न तत्र विस्तरः प्रवर्तते । कुमारित्वे च गान्धर्वविवाहो विस्तरेण न तथा वर्णितः शापनिर्वाहणमात्रपरत्वादिति । वृत्तस्यान्यथानिजभर्तृत्यागो दोषावहः किमर्थं कृत इत्यादिकाः कुविकल्पा उत्पद्येरन्निति ।

अनेहसा कालेन । रहस्यं ज्ञानभागः । ह्लादिनी वज्रम् ।

वाक्प्रस्तुता यत्र तद्वाङ्मयम् । 'आषाढसंज्ञो दण्डः स्यात्पालाशो व्रतचारिणाम् । वृक्षत्वङ्निर्मितं वस्त्रं वल्कलं समुदाहृतम् ॥' मेखला मुञ्जतृणादिरचितं कटिसूत्रम् । जटा रूक्षसंहतकेशाः ।

अथेत्यादौ वत्सात्प्रावर्तत विपुलो वंश इति संबन्धः । प्रवर्धमानाः संतानादिना वृद्धिं गच्छन्तो य आदिपुरुषाः पूर्वबान्धवाः शुक्राद्यास्तैः कृताः स्वेषां चरणानां कठा-

अथ — तस्मात् प्रावर्तत वंशः इति संबन्धः प्रवर्धमानेत्यादि वंशस्य विशेषणम्

विपक्षक्षोभक्षमः, क्षितितललब्धायतिः, अस्खलितप्रवृत्तो भागीरथीप्रवाह इव पावनः प्रावर्तत विपुलो वंशः । यस्मादजायन्त वात्स्यायना नाम गृहमुनयः, आश्रितश्रौता अप्यनालम्बितालीकबककाकवः, कृतकुक्कुटव्रता अप्यबैडालवृत्तयः, विवर्जितजनपङ्क्तयः, परिहृतकपटकीरकुचीकूर्चाकूताः, अगृहीतगह्वराः, न्यक्कृतनिकृतयः, प्रसन्नप्रकृतयः, विगतविकृतयः, परपरिवादपराचीनचेतसः, वर्णत्रयव्यावृत्तिविशुद्धान्धसः, धीरधिषणावधूताध्येषणाः, असङ्कसुकस्वभावाः, प्रणतप्रणयिनः, शमितसमस्तशाखान्तरसंशीतयः, उद्घाटितसमग्रग्रन्थार्थग्रन्थयः, कवयः, वाग्मिनः, विमत्सराः, सरसभाषितव्यसनिनः, विदग्धपरिहासवेदिनः, परिचयपेशलाः, नृत्यगीतवादित्रेष्वबाह्याः, ऐतिह्यस्यावितृष्णाः, सानुक्रोशाः, सत्यशुचयः, साधुसंमताः, सर्वसत्त्वसौहार्दद्रवार्द्रहृदयाः, तथा सर्वगुणोपेता राजसेनानभिभूताः, क्षमाभाज आश्रितनन्दनाः,

---

दिशाखाध्यायिनामुन्नतिरुत्कर्षो यस्य सः । अन्यत्र प्रवर्धमानस्तु वामनरूपो य आदिपुरुषो हरिस्तेन जनिता स्वपदोन्नतिर्माहात्म्यं यस्य स इति । किल त्रैलोक्याक्रान्तिकाले ब्रह्मलोकप्राप्ताद्विष्णुपदाद्ब्रह्मणा कमण्डलुजलक्षालिताद्गङ्गा समभवदिति वार्ता। प्रदोषो यशः, शब्दश्च । परमेश्वरो राजा, हरश्च । सकलानां कलानां वृत्ताद्यानामागमस्तेन सह कलकलेन च सकलकलं यदागमनं तु न च । महामुनिर्जह्नुरपि । विपक्षाः शत्रवः, शैलाश्च । वीनां पक्षिणां वा पक्षच्छेदेषु सहिष्णुः । आयतिः । प्रतापः, विस्तारश्च । स्खलितं स्वाचारच्युतिः । प्रवृत्तः प्रकृष्टवृत्तः । अस्खलितं असंरुद्धं कृत्वा गतश्च । श्रौतं वेदभवम्, चिरवृत्तं च । भिन्नो भयाद्वाशोकाद्वा ध्वनिः काकुरुदाहृता' । अत्र च छद्म लक्ष्यते । बकस्य काकुः बकच्छद्म यैश्च चिरवृत्तमाश्रितं ते छद्मचारित्वादाश्रितबककाकवो भवन्त्येव । अमी तु न तथेति विरोधः । कुक्कुटव्रतं नियमविशेषः । यत्र कुक्कुटाण्डप्रमाणग्रासभोजनम् । न बैडाली हिंसावृत्तिर्येषां तैः विरोधे तु कुक्कुटानां व्रतं भक्षणं येन कृतं स कथं बिडालवृत्तिर्न स्यात् । पङ्क्तिर्लोकप्रसिद्धो व्यवहारः, पाको वा । कपटो व्याजवृत्तिः । कूर्चाः स्फुटाः । आत्ममहिम्ना व्यवहारः, समूह इत्यन्ये । एतेष्वाकूतं परिहृतं यैः । गह्वरं पापम् । निकृतिः शाठ्यम् । प्रकृतिः स्वभावः । पराचीनं पराङ्मुखम् । अन्धोऽन्नम् । धीरा स्थिरा । धिषणा बुद्धिः । अध्येषणा याच्ञा । असङ्कसुकः स्थिरः, मृदुर्वा । शाखाः कठाद्याः । संशीतिः संशयः । ग्रन्थिर्दुर्बोधः प्रदेशः । परिहासं विदन्ति, न तु स्वयं कुर्वन्ति । परिचयः संस्तवः । सुकुमाराः अद्वन्द्वकूटा इत्यर्थः । अबाह्याः, न तु तदेकनिष्ठाः । ऐतिह्यमागमः । अनुक्रोशो दया । संमता इष्टाः । सौहार्दं प्रीतिः । सर्वे गुणा धैर्याद्याः । राज्ञां सेनया चानभिभूता ये च सर्वैर्गुणैः सत्त्वरजस्तमोभिर्यु-

अनिस्त्रिंशा विद्याधराः, अजडाः कलावन्तः, अदोषास्तारकाः, अपरोपतापिनो भास्वन्तः, अनुष्मानो हुतभुजः, अकुसृतयो भोगिनः, अस्तम्भाः पुण्यालयाः, अलुप्तक्रतुक्रिया दक्षाः, अव्यालाः, कामजितः, असाधारणा द्विजातयः। 22/6

तेषु चैवमुत्पद्यमानेषु, संसरति संसारे, यात्सु युगेषु, अवतीर्णे कलौ, वहत्सु वत्सरेषु, व्रजत्सु वासरेषु, अतिक्रामति च काले प्रसवपरम्पराभिरनवरतमापतति विकाशिनि वात्स्यायनकुले, क्रमेण कुवेरनामा वैनतेय इव गुरुपक्षपाती द्विजो जन्म लेभे। तस्याभवन्नच्युत ईशानो हरः पाशुपतश्चेति चत्वारो युगारम्भा इव ब्राह्मतेजोजन्यमानप्रजाविस्तारा नारायणबाहुदण्डा इव सच्चक्रनन्दकास्तनयाः। तत्र पाशुपतस्यैक एवाभवद्भूभार इवाचलकुलस्थितिश्चतुरुदधिगम्भीरोऽर्थपतिरिति नाम्ना समग्राग्रजन्मचक्रचूडामणिर्महात्मा सूनुः। सोऽजनयद्भृगुं हंसं शुचिं कविं महिदत्तं धर्मं जातवेदसं चित्रभानुं त्र्यक्षमहिदत्तं विश्वरूपं चेत्येकादश रुद्रानिव सोमामृतरसशीकरच्छुरितमुखान्पवित्रान्पुत्रान्। अलभत च चित्र-

---

क्कास्ते कथं राजसेन गुणेनानभिभूता भवन्तीति विरोधः। एवमुत्तरत्र विरोध उद्भावनीयः। क्षमा क्षान्तिः, भूश्च। आश्रितानां नन्दना नन्दयितारः, देवोद्यानं नन्दनं च। न निस्त्रिंशा अक्रूराः। विद्यां धारयन्तीति विद्याधराः पण्डिताः, निस्त्रिंशाश्च खड्गा एव। ये च विद्याधरा देवभूतास्ते सखड्गा एव। न त्वनिस्त्रिंशा इति मालाखड्गगुलिकाञ्जनादिना भेदेन भिन्नानामपि विद्याधराणां खड्गहस्तत्वं न व्यभिचरति। अजडा अमन्दधियः अशीताश्च। कलावन्तो गीताभिज्ञाः, कलावांश्चन्द्रः स चाजडोऽशीत इति विरोधः। दोषा द्वेषाद्याः, रात्रिश्च। तारयन्तीति तारका आचार्याः, नक्षत्राणि च। उपतापः पीडा, उष्णत्वं च। भास्वन्तस्तेजस्विनः, आदित्याश्च। ते परांस्तापयन्ति। ऊष्मा स्मयः, दाहिका शक्तिश्च। हुताशशब्देन हुतमिष्टमुच्यते। हुतं भुञ्जते हुतभुजः, आहिताग्नयो वह्नयश्च। कुसृतिः शाठ्यम्, कौ भूमौ सृतिः सरणम्। भोगिनः सुखिनः, सर्पाश्च। स्तम्भः स्तब्धता, सात्विको भावभेदश्च, अप्रणतिर्वा, गृहधारणकाष्ठं च। पुण्यालयाः सुकृतिनः, मठादिस्थानानि च। दक्षाश्चतुराः, प्रजापतिभेदश्च दक्षः। स च लुप्तक्रतुक्रियो हररोषजेन वीरभद्रेण। व्यालाः शठाः, सर्पाश्च। कामजितः संतुष्टाः, हरश्च कामजित्। असाधारणाः सर्वोत्कृष्टाः। द्विजातयो विप्राः। येषां च द्वे जाती तेषां कथं नासादृश्यम्।

काल इति। पूर्वोक्ते। अन्यथैतत्पुनरुक्तं स्यात्। पक्षपातो भक्तिर्यस्यास्ति सः पक्षैश्च यो याति सः। द्विजो विप्रः, विधुः, पक्षी च। युगारम्भा अपि चत्वारः। ब्रह्म वेदादि, स्रष्टा च ब्रह्मा। सच्चक्रस्य साधुवृन्दस्य नन्दकास्तोषयितारः। चक्रं

भानुस्तेषां मध्ये राजदेव्यभिधानायां ब्राह्मण्यां बाणमात्मजम्। स बाल एव विधेर्बलवतो वशादुपसंपन्नया व्ययुज्यत जनन्या। जातस्नेहस्तु नितरां पितैवास्य मातृतामकरोत्। अवर्धत च तेनाधिकतरमेधीयमानधृतिर्धाम्नि निजे।

कृतोपनयनादिक्रियाकलापस्य समावृत्तस्य चतुर्दशवर्षदेशीयस्य पितापि श्रुतिस्मृतिविहितं कृत्वा द्विजजनोचितं निखिलं पुण्यजातं कालेनादशमीस्थ एवास्तमगात्। संस्थिते च पितरि महता शोकेनाभीलमनुप्राप्तो दिवानिशं दह्यमानहृदयः कथंकथमपि कतिपयान्दिवसानात्मगृह एवानैषीत्। गते च विरलतां शोके शनैः शनैरविनयनिदानतया स्वातंत्र्यस्य, कुतूहलबहुलतया च बालभावस्य, धैर्यप्रतिपक्षतया च यौवनारम्भस्य शैशवोचितान्यनेकानि चापलान्याचरन्नित्वरो बभूव। अभवंश्चास्य वयसा—समानाः सुहृदः सहायाश्च। स तैरनुगम्यमानो बालतया निम्नतामुपगतो देशान्तरालोकनकौतुकाक्षिप्तहृदयः सत्स्वपि पितृपितामहोपात्तेषु ब्राह्मणजनोचितेषु विभवेषु सति चाविच्छिन्ने विद्याप्रसङ्गे गृहान्निरगात्। अगाच्च निरवग्रहो ग्रहवानिव नवयौवनेन स्वैरिणा मनसा महतामुपास्यताम्।

अथ शनैः शनैरत्युदारव्यवहृतिमनोहृन्ति बृहन्ति राजकुलानि वीक्षमाणः, निरवद्यविद्याविद्योतितानि च गुरुकुलानि सेवमानः, महार्हालापगम्भीरगुणवद्गोष्ठीश्चोपतिष्ठमानः, स्वभावगम्भीरधीर्ध-

---

सुदर्शनं च। नन्दकःखड्गश्च। बाहवोऽपि चत्वारः। अचलकुलस्थितिरभिन्नवर्षमर्यादः। अचलानां गिरीणां कुलैर्वृन्दैः स्थितिर्यस्य। चतुरुदधिवत्तैश्च गम्भीरः। अग्रजन्मानो द्विजाः। सोमस्तृणभेदः, इन्दुश्च। उपसंपन्ना मृता। निजे धाम्नि स्वे गृहे।

उपनयनं मेखलादानम्। समावृत्तो निष्पादितवृत्तः। स्नातक इत्यर्थः। वेदवेदाङ्गपाठक इत्यन्ये। ईषदसमाप्तश्चतुर्दशवर्षश्चतुर्दशवर्षदेशीयः। 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः'। दशामुपेतो दशमीस्थ उदाहृतः, न दशमीस्थः। अपूर्णायुरित्यर्थः। संस्थितो मृतः। आभीलं कष्टम्। इत्वरो गमनशीलः। 'अभवंश्च' इत्यादिनात्मनस्तथाभूतकलावित्संपर्कमैश्वर्यातिशयं दर्शयति। निम्नतामस्वातन्त्र्यम्। कौतुकेति। न पुनरर्थाभिलिप्सया। एतदेव सत्स्वपीत्यादिना प्रकाशयति। निरवग्रहः स्वतन्त्रः। ग्रहवान्भूतगृहीतः। स्वैरिणा स्वतन्त्रेण।

अत्युदारेत्यादिप्रकृतोपयोगी यस्मात्कविना तथाविधवस्तुवेदिनावश्यमेव भवितव्यम्। वीक्षमाण इत्यनेनात्मनः किमपि प्रकृष्टमुत्कर्षातिशययोगित्वमाह। अथ च वीक्षमाणो न तु गुरुकुलवत्सेवमानः। गाहमान इत्यनेन तेजस्वित्वमाहात्मनः। वै-

नानि विदग्धमण्डलानि च गाहमानः, पुनरपि तामेव वैपश्चितीमात्मवंशोचितां प्रकृतिमभजत् । महतश्च कालात्तामेव भूयो वात्स्यायनवंशाश्रयामात्मनो जन्मभुवं ब्राह्मणाधिवासमगमत् । तत्र च चिरदर्शनादभिनवीभूतस्नेहसद्भावैः ससंस्तवप्रकटितज्ञातेयैरासैरुत्सवदिवस इवानन्दिताभिगमनो बालमित्रमण्डलस्य मध्यगतो मोक्षसुखमिवान्वभवत् ।

इति श्रीबाणभट्टकृतौ हर्षचरिते वात्स्यायनवंशवर्णनं नाम प्रथम उच्छ्वासः ।

पश्चितीं विद्वज्जनोचिताम् । संस्तव आदरः । ज्ञातीनां कर्म ज्ञातेयं बन्धुत्वम् । 'कपिज्ञात्योर्ढक्' । **आसैरिति** । बन्धुभिर्योगिभिश्च । योगिपक्षे बाल इव बालो मित्रो रविर्निस्तेजस्त्वात् । उक्तं च—'तपस्यन्तं रविं दृष्ट्वा निस्तेजा जायते रविः । मोक्षमार्गप्रयत्ने तु तेजो नैवास्य विद्यते ॥' इति । मित्रं सखा, सूर्यश्च मित्रः । मण्डलं समूहः । बिम्बम् । मोक्षसुखमपि सूर्यबिम्बगतैरनुभूयत इति । आख्यायिकासु कविभिर्निजवंशवर्णनं कानने तथा वंशः ख्यापितः स्यादिति । आत्मनश्च विटवर्णनम् । सकलकलाकौशलं ममास्तीति । हर्षस्य चरिते च वर्णयितव्ये नाम प्रस्तुतं चैतदिति शिवम् ॥

इति श्रीशंकरकविरचिते हर्षचरितसंकेते प्रथम उच्छ्वासः ।

२९/८



कादम्बरी ।

उत्तरभागः ।

अपि चेदानीमानीतस्यापि कुमारस्य न ददाति तरलतालज्जिता लज्जैव दर्शनम् । मनोभवविकारवेदनाविलक्षं वैलक्ष्यमेव न पुरस्तिष्ठति । अप्रतिपत्तिसाध्वसजडा जडतैव नोपसर्पति । स्वयमुप-

---

अत्र च पूर्वकादम्बर्यां विभावानुभावव्यभिचारिसंयोगात्पुष्टो विप्रलम्भस्तत्र स्मृतिव्यभिचारिभावोदयात् 'आनयामि तं देवम्' इति पत्रलेखोक्तिस्मृतावुत्तरार्धे उत्तरितकादम्बर्या निवेदयति पत्रलेखा चन्द्रापीडाय—**अपि चेत्यादिना** । अपि च अन्यदपि शृणिवत्यर्थः । इदानीमपि तद्दर्शनं विना जीवितावसानकालेऽप्यानीतस्य मल्लोचनगोचरं प्रापितस्य कुमारस्य पृथिव्यां कंदर्पमूर्तेर्दर्शनं साक्षात्कारं प्रतिकूलादृष्टवशात्कुमारीस्वभावो लज्जैवेन्द्रियादिवृत्तीनां स्वच्छन्दचारसंकोचिका त्रपैव न ददाति । वर्तमानसामीप्ये लट् । न दास्यतीत्यर्थः । यद्वा वर्तमान एव वा लट् । प्रथमदर्शनवल्लज्जया तथाकृतमनुभूतमिदानीमपि सैवानुवर्तत इति पूर्वोत्तरावधिशून्यता निषेधस्य द्योत्यते । ननूत्कण्ठा लज्जां दूरीकरिष्यतीत्यत आह—**तरलतेति** । तरलता दर्शनोत्कण्ठारूपं चाञ्चल्यं चक्षुषोस्तेन लज्जिता लज्जां प्राप्ता । मयि विद्यमानायां दर्शनोत्कण्ठा जातेति लज्जाया लज्जोदयात्तत्र लज्जाव्याप्तिर्भूयसीति भावः । तस्यां च सत्यां प्रत्यवयवनिर्निमेषावलोकनं च कथं स्यादिति पुनरपि दिदृक्षादैन्यं च व्यभिचारि व्यज्यते । लज्जितेयं दृष्टिः । तल्लक्षणं तु—'मनागञ्चितपक्ष्मा च किंचित्स्तब्धकनीनिका । संस्रस्तोऽर्धपुटा दृष्टिर्लज्जिता लज्जिते स्त्रियः ॥' इति । यद्वा चिन्तासंतत्युपनीतं भवन्तं विभाव्य 'क्वाकार्यम्' इत्यादिवदुन्मादव्यभिचारिभावाक्रान्ता हे इत्याह—**अपि चेति** । इदानीं भावनासमये । आ ईषदर्थे । ईषत्कालमल्पकालं नीतस्य भावनया पुरः प्रापितस्य तरलतोन्मादो लज्जा वेत्यैवकार एवार्थे संकल्पसमासगमेष्वाभिमुख्यं प्राप्तस्य तरलतौत्सुक्यं दर्शनं न ददाति । अपि तु ददातीत्यर्थ इति वा । ननु तर्हि किमर्थं ताम्यसीत्यत आह—**लज्जितेति** । क्षणमात्रस्थायितया लज्जां प्राप्ता । तिरोभूतेत्यर्थः । औत्सुक्यस्य क्षणिकत्वेन संपूर्णदर्शनफलालाभादिति भावः । यद्वा पत्रलेखां प्रत्युपालम्भोक्तिः कादम्बर्याः । अस्मिन्काले सामस्त्येन नीतस्य देशान्तरं प्रापितस्य । त्वयेति शेषः । कुमारस्य कुत्सितमारस्य । दुर्बलमारस्येति यावत् । अन्यथा मां विहाय देशान्तरं कथं गच्छेदिति भावः । तत्संबन्धिनी तरलतालज्जिता दृष्टिर्लज्जैव । एवकारश्चार्थे । लज्जा च समुच्चयो दर्शनं न ददाति । तरलतागमनानन्तरं पुनरागमरूपा चञ्चलता तस्या

सर्पणलघुलाघवमेव तत्प्रतिपत्तिस्थैर्यं नावलम्बते । बलात्तदानयना-

एवाभावादिति भावः । लज्जिता दृष्टिर्दृष्टेर्लज्जात्वमस्थिरत्वेन फलालाभादिति भावः । कथं निरपत्रपस्तस्यै मुखं प्रदर्शयामीति त्रपापि दर्शनप्रतिबन्धकीभूता जातेति भावः । तथा च तस्य पुनरागमनमसंभावितमिति भावः । औत्सुक्यचिन्ताहर्षादीनां शबलता । तत्र स्थितस्यापि तस्य स्वप्नादिसाक्षात्कारेण चक्षुःफलालाभेन पुनरपि दिदृक्षा दैन्यं च व्यभिचारी व्यज्यते । नन्वसन्तमपि भावमतिचतुराः स्त्रियः स्वाधीनसहजसिद्धचेष्टाविशेषैराविर्भावयन्तीति कथं तरलतादीनां तादृगाशयवत्त्वं निर्णेयमिति मयाक्षिप्ते सैवमाहेत्याह—**मनोभवेति** । मनोभवोऽतिविवेकिप्रभवः कामस्तस्य तत्कर्तृको विकारः कार्श्यपाण्डिमादिस्तज्जनिता वेदनाः संतापादिरूपास्ताभिर्विलक्षं विगतलक्षम् । अप्रतिसंधीयमानमिति यावत् । वैलक्ष्यम् । 'लक्ष्यं वेध्ये च भावे च' इत्यभिधानाद्विविधभावभावो न पुरस्तिष्ठति । न पुरः स्थास्यतीत्यर्थः । तथा च कामविकारकीलिताया मे सहजचेष्टाविर्भावाभावात्तरलतादीनामतिप्राबल्यादिति भावः । विकारपदं च सहजसिद्धस्नेहावलोकनन्यूनतां व्यनक्ति । मनोभवपदं च कामवेदनाबाह्येन्द्रियाविषयत्वं व्यनक्ति । ज्ञानार्थप्रकृतिकवेदनापदेनाज्ञायमानदुःखध्वंसाभावं व्यनक्ति । अत्रापि भविष्यदर्थे लट् । यद्वा दर्शनफलमाह—**मनोभवेति** । वैलक्ष्यमदर्शनजनितकार्श्यपाण्डिमादिवैलक्षण्यं तदेव पुरः । प्रथममिति यावत् । न स्थास्यतीत्यर्थः । एतेन तस्य दुःसहतोक्ता । दुःसहत्वे हेतुगर्भं विशेषणमाह—**मनोभवेति** । उक्त एवार्थः । यद्वा संतापादिविकारवेदनास्थिरत्वेन निर्विण्णाह । वैलक्षण्यं संतापादिकृतं कार्श्यमोहादिकं न बहुकालं स्थास्यतीत्यर्थः । मध्ये स्वप्नसंकल्पसमागमेष्वाश्वासात् । अन्यथा तत्स्थैर्येऽल्पेनैव कालेन मरणसंभवात् । दुःखविमोकादिति भावः । एतदप्यकृतपुण्याया मे कुत इति निर्वेदध्वनिः । तदेव विशेषणद्वाराह—**मनोभवेति** । कंदर्पकृता विकाराः स्वप्नसंकल्पसमागमादयस्तत्कृता वेदना तथा समागमस्यास्थिरत्वेन पुनर्विरहदुःखानुसंधानं तेन विलक्षं मरणलक्षविगमं प्राप्तमित्यर्थः । ननु गाढान्धकाराभिसरणशीलानां कामिनीचक्षुर्विषयाभावेऽपि त्वगिन्द्रियस्य स्पर्शः केन वा वारणीय इति मयोक्ते सैवमुत्तरितवतीत्याह—**अप्रतिपत्तीति** । जडता स्पर्शजन्यः स्तम्भाख्यः सात्त्विकभावः स एव नोपसर्पति । न यास्यतीत्यर्थः । अत्रापि भविष्यदर्थे लट् । यथाकथंचित्त्वयानीतस्यापि गाढान्धकारे दर्शनायोग्यस्य त्वगिन्द्रियस्पर्शसुखानुभवे प्रथमस्पर्शजन्यजडताप्रतिबन्धे चुम्बनाद्यननुष्ठाने स्पर्शस्य निष्फलत्वेन तत्रापि दैववैमुख्येन विरहज्वरोपशान्तिमलभमानायाः स्पर्शो वृथैव भविष्यतीति भावः । ननु शारीरा भावाः क्षणस्थायिनो भवन्ति, उत्पन्नापि जडता न स्थास्यतीत्यत आह—**अप्रतिपत्तीति** । अप्रतिपत्तिः स्पर्शो ज्ञानं साध्वसं भयं मा कदाचित्कश्चिन्मादर्शीति(?)ताभ्यां जडाभावान्तरानुत्पादेन पदात्पदं दातुमस-

पराधभीता भीतिरेव न संमुखीभवति । अथ कथंचिद् गुरुजनत्रपया वा, राजकार्यानुरोधेन वा, चिरावलोकितसहसंवर्धितबन्धुज-

---

मर्था गाढान्धकारसंजातस्पर्शजायमानस्तम्भेन चुम्बनाद्यनुष्ठानेऽसामर्थ्यात्तथा क्रियमाणे दुःखानपगमादिति भावः । यद्वा जडता व्यभिचारिभावोऽपि दैवप्रातिकूल्यान्नापयास्यति । तत्र कारणमाह—अप्रतिपत्तिर्मोहः, साध्वसं भयम्, ताभ्यां जडा । स्थिरेत्यर्थः । तथा च जडतामोहभयव्यभिचारिणां शबलतयान्यापगम एव मया गन्तव्यमिति स्थिरेति भावः । यद्वा नास्ति प्रतिपत्तिर्ज्ञानं यस्यां साप्रतिपत्तिर्मूर्च्छा व्यभिचारिभावः । यावदेव त्वं तमानेष्यसि तावदेव मे मूर्च्छाभिभविष्यति । तदानयनसंभ्रमोत्थिताया मे मूर्च्छापगमानन्तरं यद्भयं बहुकालं स्थित्वा लोको ज्ञास्यतीति ताभ्यां जडा स्तब्धा । आविर्भवितुमशक्येति यावत् । जडता डलयोरैक्याज्जलता । स्वेदसात्त्विकभावो नाविर्भविष्यतीत्यर्थः । मूर्च्छाभयाभ्यां स्थातुमसमर्थया त्वया मयैव सह कुतो नागम्यत इति मयोदिते सैवमाहेत्याह—**स्वयमिति** । स्वयमुपसर्पणं तदननुमत्या स्वयं गमनं तेन लघुलाघवमेव तुच्छ लाघवमेव तत्प्रतिपत्तिस्त्वयैवागन्तव्यमित्युपदेशज्ञानं तत्स्थैर्यं तत्स्थिरतां नावलम्बते । नावलम्बनं करोतीत्यर्थः । अन्यत्र ज्ञानस्य त्रिक्षणावस्थायित्वेऽपि युक्त्यनुपष्टम्भोपहितमिदं ज्ञानं क्षणमात्रमपि न तिष्ठतीति भावः । स्त्रीणां स्वयमुपसर्पणं लघुतापादकं नितरामननुमत्या कृतं नितमां(?) राजकन्यानाम् । किंचैवमौत्सुक्यातिरेकेण कृतेऽपि तेनापि मदीयां निःसारतामाकलय्य विद्याधनसौन्दर्यादिगर्वेणानादरे कृते तव का प्रतिष्ठा, ममापि किं गौरवम्, तदुत्तरकालं च प्रयत्नाभावेन मम मरणमेव शरणं स्यादिति तुषकण्डनमेव फलितमिति शब्दशक्त्युद्भवो ध्वनिः । इह तु वर्तमान एव लट् । तेन पूर्वोत्तरावधिशून्यतां प्रत्यक्षप्रमाणगोचरतां च व्यनक्ति । यद्वा स्वयमुपसर्पणं स्वयंगमनं तेन लघुस्तूलादपि निःसाराहं तस्या मे लाघवमेव लघुभावमेव । दृष्ट्वेति शेषः । तत्प्रतिपत्तिस्तस्य चन्द्रापीडस्य प्रतिपत्तिर्मयि । सर्वोत्कृष्टताबुद्धिः स्थैर्यं स्थिरत्वं नावलम्बते । न स्थिरतां यास्यतीत्यर्थः । अस्मिन्पक्षे भविष्यदर्थ एव लट् । तेन फलितमिदं भविष्यतीति ध्वन्यते । ननु तर्हि मयैव यथाकथंचिदयमानेय इति मयोदिते सैवमाहेत्याह—**[बलेति]** बलात्तदरुच्या यत्तदानयनं त्वत्कृतं चन्द्रापीडानयनं स एवापराधस्तेन भीता या मे भीतिरेव न संमुखीभवति । एतदनुमोदनसांमुख्यं न करोतीत्यर्थः । इदमपि मया कथं वक्तव्यं त्वयानेय इति कदाचित्त्वया मदीयां दशामालोक्य पादपतनादिना बलादानीतस्य तथैव स्थितस्य मदपराधं गृह्णतोऽसन्मुखस्यानयनफलालाभेन लोकोपहास्यतापरितापाधिक्यं च मे भवेदिति भावः । तस्मादेते सर्व एव पक्षाः प्रकृतानुपयुक्तत्वादनादरणीयाः । केवलं मनोवाक्कायकर्मभिस्तत्स्वीकार एव मय्यनुग्रहो गतागतेन च तदभावनिश्चयात्त्वया तथा यतनीयं यथा मदनुग्रहे विलम्बालस्योपेक्षास्तस्य न भवन्ति । भवत्याश्च मत्प्राणत्राणसुकृतादिहलोकः परलोकश्च भवेत् ।

नोत्कण्ठया वा, सुहृन्मुखकमलदर्शनेन वा, पुनरागमनखेदपरिजिहीर्षया वा, निजगृहावस्थानरुच्या वा, जन्मभूमिस्नेहेन वा, अनिच्छया वास्य जनस्योपरि पादपतनेनापि नानेतुमेव पारितो यदा मयि स्नेहात्कृतयत्नयापि प्रियसख्या पत्रलेखया तदा सुतरामेव न किंचित्। किं चाधुनाप्यधिकमुपजातम् । सैवाहं कादम्बरी यानेन कुमारेण

सख्यादीनामुपहासपात्रतां न यायाम्, जन्मसाफल्यं च यायां मित्रादिपारवश्यतां च न लभेयम् । गौरवसंरक्षणं भवेत् । नान्यं शरणमुपयायामित्याद्यत्यन्ततिरस्कृतवाच्याभिधाभिन्नमूलध्वनिः । तेन च प्रबन्धस्योत्तमता सूचिता । तेन चालौकिकरसास्वादनसामग्रीदार्ढ्यं च सूचितम् । अत्र सर्वत्र काव्यलिङ्गं विभावना चालंकारः । यद्वा भीतिरेव बलात्संमुखीभवतीति संबन्धः । एतत्प्राप्तौ पित्रादिभ्यो भयं त्यक्तमित्यर्थः । भीतिप्राप्तौ हेतुमाह—**बलादिति** । बलादरुच्या तदानयनं चन्द्रापीडानयनं स एवापराधो महासाहसिकत्वादिरूपस्तत्र भीता । भयहेतूनुत्प्रेक्षमाणेत्यर्थः । तथा चोत्प्रेक्षाया आरोपविषयत्वेनाहार्यभीतिरङ्गीकारादिति भावः । पूर्वोक्तं सर्वमप्यन्वयन्त्याह—**अथेति** । अथशब्दः पूर्वापरितोषे । स इति प्रकरणाल्लभ्यते । मयि मद्विषये स्नेहात्प्रेम्णो हेतोः । हेतौ पञ्चमी । कृता विहिता यत्ना आनयनोपाया यया सा तया । प्रिया प्रियकर्त्री चासौ सखी चेति तया पत्रलेखयापि यदा यद्यानेतुमानयनाय न पारितो न शक्तः, तदा तर्हि सुतरामेवातिशयेनैव न किंचित् लघुतोत्कर्षः । तदा मम जीवितेन न किंचित्प्रयोजनमिति भावः । अनायनप्रकारमाह—**पादपतनेनापीति** । करणे तृतीया । पादयोश्चरणयोः पतनेन । दण्डवत्प्रणामेनापीत्यर्थः । आनयनाशक्तौ पूर्वपूर्वापरितोषेण तृतीयान्तान्हेतूनाह—**कथंचिदिति** । एतत्पदं सर्वतृतीयान्तेन संबध्यते । गुरुजनाः पितृमातृप्रभृतयस्तेषां त्रपा लज्जा तया वा । वाशब्दः पूर्वापरितोषे । राजकार्यं संधिविग्रहादि तस्यानुरोधोऽनुसरणं तेन वा । चिरेण बहुकालेनावलोकितो दृष्टो यः सहसंवर्धितः पांशुक्रीडनादिभिः सह वृद्धिं प्रापितो बन्धुजनो बान्धवलोकस्तस्योत्कण्ठया विरहासहनेन वा । सुहृदो मित्राणि । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातः । तेषां मुखानि कमलानीवेत्युपमितसमासः । तेषां दर्शनेन सादरावलोकनेन वा । पुनरागमनं पुनरत्रायान्तं तेन यः खेद आयासस्तस्य परिहर्तुमिच्छा त्यागस्पृहा तयेति वा । पुनरपि यातायातश्रमो मा भूदितिविधयेत्यर्थः । निजं स्वकीयं यद्गृहं तत्रावस्थानं सुखवासस्तत्र रुचिः प्रीतिस्तयेति वा । जन्मभूमिर्जन्मस्थानं तत्र स्नेहः प्रेम तेन वा । सर्वमेतत्संभावनामात्रेणोक्तम् । वस्तुतस्त्वस्य मल्लक्षणस्य जनस्य जन्तुमात्रस्योपर्यनिच्छारुचिः । अप्रीतिरिति यावत् । तया वा । किंचेति पक्षान्तरे । सैवाहं कादम्बरी यानेन कुमारेण चन्द्रापीडेन । कुमुदानि विद्यन्ते यस्यां सा कुमुदिनी तस्याः कुमुदिन्याश्चतुरस्रजलक्रीडासरस्याः । पुष्करिण्या इति यावत् । तटे तीरे । सामीप्ये सप्तमी । हिमप्रचुरं गृहं हिमगृहं त-

मुखानि

तुषारकणविकरहारिण्यपि बहिरेव देहदाहमात्रकायहारिणी सर्वरमणीयानां संदोहभूते हिमगृहे कुसुमस्रस्तरावलम्बिनी वीक्षिता ममापि चापुनरुक्ततद्दर्शनस्पृहे ते एवैते लोचने, ययोरालोकनपथमसौ यातः। तदेव चेदमप्रतिपत्तिशून्यं हतहृदयम्, येनान्तः प्रविष्टोऽपि न पारितो धारयितुम्। तदेव चैतच्छरीरम्, येन तत्समीपे चिरमुदासीनेन स्थितम्। स एव चायं पाणिः, योऽलीकगुरुजनापेक्षी नात्मानं परिग्राहितवान्। अनपेक्षितपरपीडश्चन्द्रापीडोऽपि स एव, योऽत्र वारद्वयमागत्य प्रतिगतः। मय्येवोपक्षीणमार्गणतया वाकिंचित्करोऽन्यत्र पञ्चशरोऽपि स एव, यस्त्वयावेदितो मे।

प्रतिज्ञातं च मया महाश्वेतायाः—'त्वयि दुःखितायां नाहमा-

स्मिन्मुक्तावन्निर्मलो मुक्ताखचितो वा यः शिलायाः पट्टः स एव शयनं शय्या तस्मिन्कुसुमानां स्रस्तरस्तमवलम्बत इत्येवंशीला तन्मात्रावलम्बिनी वीक्षिता दृष्टा। अधुना किमधिकमुपजातम्। कीदृशे हिमगृहे। तुषारकणा हिमविप्रुषस्तेषां निकरेण समूहेन हारिण्यपि मनोहरत्वेऽपि बहिरेव बाह्यवृत्त्या देहदाहमात्रेण केवलं शरीरदाहज्वरोत्पादकत्वेन कायं देहं हरतीत्येवंशीलं तत्तथा तस्मिन्। यच्छीतलं तत्कथं दाहकमिति विरोधः। विरहित्वेन तत्परिहारः। अतएव विरोधाभासोऽलंकारः। ममापि च कादम्बर्या अप्यपुनरुक्ता प्रथमा तस्य चन्द्रापीडस्य दर्शनस्पृहावलोकनेच्छा ययोस्त एवैते लोचने नेत्रे। यत्तदोर्नित्याभिसंबन्धात्ते के। ययोर्नेत्रयोरालोकनपथं विलोकमार्गमसौ चन्द्रापीडो यातः प्राप्तः। च पुनरर्थे। इदं प्रत्यक्षं तदेव हतहृदयं दैवेन हतं ताडितं हृदयं चेतः। कीदृशम्। अप्रतिपत्तिरज्ञानं तेन शून्यम्। तत्किम्। येन हृदयेनान्तःप्रविष्टोऽपि मध्यगतोऽपि धारयितुं ग्रहीतुं न पारितः। च पुनरर्थे। एतच्छरीरं तदेव। तत्किम्। येन शरीरेण तत्समीपे चन्द्रापीडसंनिधौ चिरं बहुकालमुदासीनेन तटस्थेन स्थितम्। स एवायं पाणिर्हस्तः। स कः। योऽलीकोऽसत्यो गुरुजनो मातृपित्रादिस्तमपेक्षते इत्येवंशीलः स तथात्मानं स्वं न परिग्राहितवान्। अनपेक्षिता परस्य अर्थान्मम पीडा येनैवंविधश्चन्द्रापीडोऽपि स एव नान्यः। स कः। योऽत्र मत्पार्श्वे वारद्वयं द्विर्वारमागत्यागमनं कृत्वा प्रतिगतो निवृत्तः। मय्येव मयि विषय एव। नान्यत्रेत्यर्थः। उपक्षीणा नष्टा मार्गणा बाणाः शरा यस्य स उपक्षीणमार्गणस्तस्य भावस्तत्ता तया। वाशब्द इवार्थे। तथा चोपक्षीणमार्गणतया इव। अन्यत्र चन्द्रापीडादौ न किंचिद्दुःखादिकं करोतीत्याकिंचित्करः पञ्चशरोऽपि कामोऽपि स एव। स कः। यस्त्वया सख्या [मे] ममावेदितस्तत्स्वरूपज्ञापनपूर्वकं निवेदितः।

महाश्वेताया मयेदं प्रतिज्ञातं न पुनरहं तां महाश्वेतामित्यवदमवादिषम्। इतीति किम्। तदेवाह—**प्रतिज्ञातमिति**। अङ्गीकृतं च तदेव दर्शयन्नाह—**त्वयीति**।

त्मनः पाणिं ग्राहयिष्यामि ' इति तामहं पुनरप्यवदम् । सा तु 'देवि, मैवं स्म मनसि करोः । कुमतिरियम् । अतिदारुणोऽयं पापकारी मकरकेतुः कदाचिददृश्यमाने प्रियजने जनितहृदयानुरागाज्जीवितमप्यपहरति ' इत्यब्रवीत् । तदपि नास्त्येव मे । मदनेन वा, दैवेन वा, विरहेण वा, यौवनेन वा, अनुरागेण वा, मदेन वा, हृदयेन वा, अनेन वा केनापि दत्तः संकल्पमयः कुमारो जनसंनिधावपि केनचिदविभाव्यमानः सिद्ध इव सर्वदा मे ददाति दर्शनम् । अपि चासाविव नायमकाण्डपरित्यागनिष्ठुरहृदयः । अयमेवास्माद्विरहकातरः । नायं

त्वयि महाश्वेतायां दुःखितायां नाहं कादम्बर्यात्मनः स्वस्य पाणिं करं ग्राहयिष्यामि । उद्वाहं न करिष्यामीत्यर्थः । सा तु महाश्वेतेत्यब्रवीत् । इतीति किम् । हे देवि, एवं मनसि चित्ते त्वं मा करोर्मा कार्षीः । 'मेऽटि' इत्यटो लोपः । तदकरणे हेतुं प्रदर्शयन्नाह—**कुमतिरिति** । कुत्सिता मतिः कुमतिरियं न सम्यग्बुद्धिः । कथमित्याह—**अतीति** । अयं पापकार्यधर्मजनको मकरकेतुः कंदर्पोऽतिदारुणोऽतितरां भीषणः कदाचिन्न सर्वदा दृश्यमानेऽवलोक्यमाने प्रियजने वल्लभजने जनितहृदयानुरागादुत्पादितमानसिकस्नेहाज्जीवितमपि जीवनमप्यपहरत्यपाकरोति । प्रियजनस्यादृश्यमानत्वं नास्तीत्याशङ्क्याह—**तदपीति** । तदपि प्रियजनादृश्यमानत्वं मे मम नास्त्येव न विद्यत एव । एतदेव स्पष्टीकुर्वन्नाह—**दैवेनेत्यादि** । मदनेन वा, कंदर्पेण वा, दैवेनादृष्टेन वा विरहेण वियोगेन वा, यौवनेन तारुण्येन वा, अनुरागेण स्नेहेन वा, मदेन मत्ततया वा, हृदयेनान्तःकरणेन वा । अत्र वाशब्दः सर्वत्र विकल्पार्थः । किं विकल्पान्तरेण । अनेनानुद्दिष्टनाम्ना वा केनापि दत्तोऽर्पितः संकल्पमयः कल्पनात्मकः कुमारश्चन्द्रापीडो जनानां लोकानां संनिधावपि समीपेऽपि केनचिदविभाव्यमानोऽज्ञायमानागमनः सिद्ध इवाणिमाद्यष्टगुणोपेत इव मे मम सर्वदा दर्शनं ददाति वितरति । अपि चेति प्रकारान्तरे । असाविव चन्द्रापीड इवायं संकल्पककुमारोऽकाण्डेऽप्रस्तावे यः । परित्यागो मोचनं तस्मिन्निष्ठुरं निर्दयं हृदयं यस्यैवंभूतो न । अयमेव संकल्पकुमार एवास्माकं विरहे वियोगे कातरो भीरुः । एतदर्थमन्यासक्तिप्रतिषेधद्वारा स्पष्टीकुर्वन्नाह—**नायमिति** । अयं पूर्वोक्तो नक्तंदिवमहर्निशं लक्ष्म्या रमया समाकुलो व्याकुलीभूतो न । तथा पृथिव्या वसुंधरायाः पतिः स्वामी न । तथा सरस्वतीं वाणीं नापेक्षते नेहते । तथा कीर्तिशब्दं यशोवादं न वर्धयति न वृद्धिं नयति । सर्वदा तत्स्वरूपमहं पश्यामीत्याशयेनाह—**पश्यामीति** । यथा येन प्रकारेण तं चन्द्रापीडाभिधमज्ञजनो मूर्खजनस्तस्य विडम्बनायां विरहादिरूपायामेकमद्वितीयं हेतुं कारणं विप्रलम्भकं वञ्चकं कुमारमहं कादम्बर्यासीनोपविष्टा, उत्थितोर्ध्वीभूता, भ्राम्यन्तीतस्ततः पर्यटन्ती । विरहादिति शेषः । शयाना स्वापं कुर्वाणा, जाग्रत्यशयाना, निमीलितलोचना मुद्रितनयना,

नक्कंदिवं लक्ष्म्या समाकुलः । न पृथिव्याः पतिः । न सरस्वतीमपेक्षते । न कीर्तिशब्दं वर्धयति । पश्यामि चाहर्निशमासीनोत्थिता भ्राम्यन्ती शयाना जाग्रती निमीलितलोचना चलन्ती स्वप्नायमाना शयने श्रीमण्डपे गृहकमलिनीषूद्यानेषु लीलादीर्घिकासु क्रीडापर्वतके बालगिरिनदिकासु च यथा तमञ्जनविडम्बनैकहेतुं विप्रलम्भकं कुमारं ते तथा कथितमेव मया । तदलमनया तदानयनकथया ' इत्यभिदधानतर्कितागतमूर्छैव निमीलिताक्षी श्यामारुणतामरसमिवाननमुपावेश्य तूष्णीमुत्कीर्णेव तस्थौ ।

अहं तु तच्छ्रुत्वा समचिन्तयम्—' सत्यमेव गरीयः खलु जीवितालम्बनमिदं वियोगिनीनाम्, यदुक्तं संकल्पमयः प्रियो नितरां कुलाङ्गनानां विशेषतः कुमारीणाम् । इत्येवं चिन्तयन्त्या एव मेऽनुरागकथारसप्लावेनेव रक्ततामगाद्दिवसः । तत्क्षणं प्रकटितरागं हृदयमिव कादम्बर्यास्त्रपया पलायमानमदृश्यत रविमण्डलम् ।

चलन्ती स्वेच्छया गच्छन्ती, स्वप्नायमाना स्वप्नं पश्यन्ती, शयने शय्यायाम्, श्रीमण्डपे श्रियोपलक्षितजनाश्रये, गृहकमलिनीषु, सदनपद्मिनीषु, उद्यानेषूपवनेषु, लीलादीर्घिकासु क्रीडावापीषु, क्रीडापर्वतके क्रीडाशैले, बालगिरिः क्रीडार्थं निर्मितः शैलस्तस्य नदिकासु स्वल्पतटिनीषु चाहर्निशमहोरात्रं पश्याम्यवलोकयामि । तथा तेन प्रकारेण मया कादम्बर्या कथितमेव पूर्वं निवेदितमेव । तदिति पूर्वोक्तहेतोरनया मानसिकप्रत्यक्षया । 'इदमः प्रत्यक्षगतम्' इत्युक्तेः । तस्य कुमारस्यानयनम् । उज्जयिन्या मत्समीपानयनमित्यर्थः । तस्य कथा वार्ता तया अलं भूतम् । इत्यभिदधानेति जल्पन्त्यतर्कितासंभाविता मूर्च्छा मोहो यस्याः सेव । सहसा प्राप्तमूर्च्छैवेत्यर्थः । निमीलिते मुद्रिते नेत्रे (अक्षिणी) लोचने यया सा रिभागेषु संपिण्डितं पिण्डीभूतं यन्नयनयोर्जलं तद्वर्षतीत्येवंशीला । तथान्तर्मध्ये जातो मिथ्या किं जीवितेन आननं मुखमुपावेश्य संस्थाप्य तूष्णीं मौनेन तस्थौ स्थितवती ।

अहं त्विति । तु पुनरर्थे । अहं पत्रलेखा तत्पूर्वोक्तसंकल्पमयः कुमारो जनसंनिधावपि ददाति दर्शनमिति श्रुत्वाकर्ण्य समचिन्तयममृशम् । इदं सत्यमेवावितथमेव । इदं किम् । यदुक्तसंकल्पमयः संकल्पस्वरूपः प्रियः, खलु निश्चयेन, वियोगिनीनां विप्रलम्भवतीनां नितरामतिशयेन कुलाङ्गनानां कुलवधूनाम्, विशेषतो विशेषात्कुमारीणाम् । कुमारीति पदमनूढायां रूढम् । अतिशयेन गुरुर्गरीयः । अतिशयार्थे ईयस्प्रत्ययः । जीवितस्य जीवनस्यालम्बनमाधारभूतम् । तदेव दर्शयति—**तत्क्षणमिति** । मद्रागो न्यून इति त्रपया लज्जया पलायमानं नश्यमानं रविमण्डलं सूर्यबिम्बमदृश्यतावीक्ष्यत । जनैरिति शेषः । कीदृशम् । तत्क्षणं

पल्लवशयनमिव सन्ध्यारागमरचयद्यामिनी । परिचारक इव चन्द्रमणिशिलातलतल्पमकल्पयत्प्रदोषः । अत्रान्तरे चागत्य स्वं स्वं नियोगमशून्यं कुर्वाणा दूरतो दीपिकाधारिण्यो गन्धतैलावसिक्तसुरभिगन्धोद्वारिणीभिर्दीपिकाभिर्विरचितचक्रवालिका बालिकाः पर्यवारयन् । अथ निर्मललावण्यलक्षितानि दीपिकाप्रतिबिम्बानि ज्वलितानि मदनसायकस्य शल्यकानीवाङ्गलग्नानि समुद्वहन्तीं नवानिरन्तरकलिकाचितां चम्पकलतामिव तथास्थितां तां पुनर्व्यजिज्ञपम्—'देवि प्रसीद । नार्हस्यखेदार्हा हृदयखेदकारिणं संतापमङ्गीकर्तुम् । संहर मन्युवेगम् । एषाहमादाय चन्द्रापीडमागतैव' इति । अथानेन

तत्कालं प्रकटित आविष्कृतो रागो येन तत्तथा । रक्तत्वसाम्यादाह—कादम्बर्या हृदयमिव स्वान्तमिव । **यामिनीति** । यामिनी रात्रिः संध्यारागमरचयदकरोत् । रक्तत्वसाम्यादाह—**पल्लवेति** । पल्लवानां किसलयानां शयनं शय्या तदिव । **परिचारक इवेति** । परिचारक इव सेवक इव प्रदोषो यामिनीमुखं चन्द्रं शशिनं मणेः शिलातलं मणिशिलातलं तल्पं शय्यामकल्पयदरचयत् । अत्रान्तर एवविधसमये दूरतो दीपिकाधारिण्यो बालिका आगत्य पर्यवारयन्दूरीचक्रुः । अन्धकारमिति शेषः । एकीबभूवुरिति वा । किं कुर्वन्त्यः । निरन्तरं दीपिकाः कर्तव्या इति स्वं स्वं स्वकीयं नियोगमादेशमशून्यमवन्ध्यं कुर्वाणा विदधानाः । किंविशिष्टाः । **विरचितेति** । विरचिता निष्पादिताश्चक्रवालिका मण्डलं याभिस्ताः । काभिः । दीपिकाभिः 'दीवी' इति जनप्रसिद्धाभिः । दीपिकाभिः कीदृशीभिः । गन्धतैलं सुगन्धस्नेहस्तेनावसिक्ताः सिञ्चिताः सुरभिगन्धमुद्गिरन्तीत्येवंशीलाभिः । **अथेति** । दीपिकानामनानन्तरमहं ताम् । पत्रलेखामिति शेषः । पुनर्व्यजिज्ञपं विज्ञप्तिमकार्षम् । कीदृशीं ताम् । समुद्वहन्तीं धारयन्तीम् । कानि । दीपिकानां प्रतिबिम्बानि प्रतिच्छायरूपाणि प्रतिबिम्बानि । कीदृशानि । निर्मलं स्वच्छं यल्लावण्यं लवणिमा तेन लक्षितानि ज्ञातानि । अतिसुन्दरलावण्ये प्रतिबिम्बितानीत्यर्थः । 'मुक्ताफलस्य छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥' उत्प्रेक्षते—मदनसायकस्य कामबाणस्य ज्वलितानि धुषितान्यङ्गलग्नानि शल्यकानीवानिःसृताग्राणि बाणानीव । पुनः कीदृशीं ताम् । चम्पकस्य हेमपुष्पकस्य लतामिव शाखामिव तथास्थिताम् । चम्पकलतां कीदृशीम् । नवाः प्रत्यग्रा निरन्तरा व्यवधानरहिता याः कलिकाः कोरकास्ताभिश्चितां व्याप्ताम् । अत्र सरलत्वसादृश्याच्छरीरस्य चम्पकलतोपमानम् । दीपिकाप्रतिबिम्बानां कोरकाकृतित्वेन कलिकोपमानम् । कां विज्ञप्तिं कृतवतीत्याशयेनाह—**देवीति** । हे देवि कादम्बरि, त्वं प्रसीद प्रसन्ना भव । तथा खेदाभावोऽखेदस्तस्मै अर्हा योग्या त्वं हृदये स्वान्ते खेदं करोतीत्येवंशीलं संतापमङ्गीकर्तुं स्वीकर्तुं नार्हसि न योग्या भवसि । तथा

देवनामग्रहणगर्भेण मद्वचसा विषापहरणमन्त्रेण विषमूर्च्छितेव झटित्युन्मील्य नयने सस्पृहं मामवलोक्य 'कः प्रदेशेऽस्मिन्' इति परिजनमपृच्छत्।

अथ धवलवसनोल्लासितगात्रयष्टयो, वाचालैः कर्णोत्पलमधुकरैः 'समाज्ञापय' इति व्याहरन्त्यः कन्यकाः समधावन्। आज्ञाप्रतीक्षासु च मुखकमलावलोकिनीषु च तासु क्रमेण दृष्टिं पातयन्ती मरकतशिलातले न्यषीदत्, अब्रवीच्च—'पत्रलेखे न खलु प्रियमिति ब्रवीमि। त्वामेव पश्यन्ती संधारयाम्येव जीवितमहम्। तथापि यद्ययं ते ग्रहस्तत्साधय समीहितम्' इत्यभिधाय मां व्यसर्जयत्।

इत्यावेद्य च किंचिदिव नमितमुखी शनैः पुनर्व्यजिज्ञपत्—'देव,

मन्युः क्रोधस्तस्य वेगं रयं संहर त्यज। कोपवृद्धिं मा कुर्वित्यर्थः। एषाहं पत्रलेखाख्या सखी चन्द्रापीडमादाय गृहीत्वागतैव। **अथेति**। तच्छ्रवणानन्तरं विषमूर्च्छिता विषापहरणमन्त्रेणेव। अनेन देवनाम भवन्नामग्रहणं गर्भे यस्मिन्नेवंविधेन मम पत्रलेखाया वचसा वाक्येन झटिति शीघ्रं नयने नेत्रे उन्मील्योद्घाट्य सस्पृहं स्पृहायुक्तं यथा स्यात्तथा मां पत्रलेखामवलोक्य निरीक्ष्येति परिजनं सेवकलोकमपृच्छत्पप्रच्छ। इतीति किम्। अस्मिन्नासन्नप्रदेशे समीपस्थले कः। तिष्ठतीति शेषः।

अथेति। तदनन्तरं कन्यकाः कुमार्यः समधावंस्त्वरितं चेलुः। कन्यका विशेषयन्नाह—**धवलेति**। धवलैः शुभ्रैर्वसनैर्वस्त्रैरुल्लासिताः शोभिता गात्रयष्टयोः देहलता यासां ताः। कर्णोत्पलानां श्रवणकुवलयानां वाचालैर्मधुकरैर्भ्रमरैरिति व्याहरन्त्य इवेति वदन्त्य इव। इतीति किम्। समाज्ञापय। आज्ञां देहीत्यर्थः। **आज्ञेति**। कादम्बरी मरकतशिलातलेऽश्मगर्भदृषदुपरि न्यषीदत्। अतिष्ठदिति क्रियासंटङ्कः। किं कुर्वन्ती। पातयन्ती क्षिपन्ती। काम्। दृष्टिं दृशम्। कासु। तासु कन्यकासु। कथम्। क्रमेणानुपूर्व्या। कथंभूतासु तासु। आज्ञाया निदेशस्य प्रतीक्षा प्रतीक्षणम्—प्रतिपालनमिति यावत्। यासां तास्तथा तासु। पुनः कीदृशीषु। मुखमेव कमलं पद्मम्। स्वामिन्या इति शेषः। तदेवावलोकितुं शीलं यासां तास्तथा तासु। अब्रवीच्चेत्युपवेशनानन्तरमित्यवोचत्। च पुनरर्थे। किमुवाचेत्याह—**पत्रेति**। हे पत्रलेखे। खलु निश्चयेन त्वद्गमनं प्रियमिष्टमितिहेतोरहं त्वां न ब्रवीमि न कथयामि। यतोऽहं त्वामेव। न त्वदन्यमित्यर्थः। पश्यन्ती विलोकयन्ती जीवितं जीवनं संधारयाम्येव दधाम्येव। अतः सर्वथा त्वद्गमनं मम नेष्टम्। तथापि यद्ययं कुमारानयनलक्षणस्ते तव ग्रहो हठः, तत्तर्हि समीहितं वाञ्छितं साधय विधेहि। इत्यभिधाय प्रतिपाद्य मां पत्रलेखां व्यसर्जयदप्रेषयत्।

इति पूर्वोक्तमावेद्य निवेद्य च किंचिदिवेषन्नमितं नम्रीकृतं मुखमास्यं यया सैवं-

प्रत्यग्रदेवीप्रसादातिशयाहितप्रागल्भ्या दुःखिता च विज्ञापयामि। देवेनाप्येतदवस्थां देवीं दूरीकुर्वता किमिदमापन्नवत्सलायाः स्वप्रकृतेरनुरूपं कृतम्' इति। चन्द्रापीडस्तु तथोपालम्भगर्भं विज्ञप्तः पत्रलेखया तं च कादम्बर्याः स्नेहोक्तिपुरःसरम्, गम्भीरं च, सतापं च, सपरिहासं च, साभ्यर्थनं च साभिमानं च, सावलेहं च, सप्रसादं च, सनिर्वेदं च, सानुरागं च, सकोपं च, सनिर्विशेषं च, सावष्टम्भं च, सात्मार्पणं च, सोत्प्रासं च, सोपालम्भं च, सानुक्रोशं च, सस्पृहं च, सावधारणं च, मधुरमपि दुःश्रवम्, सरसमपि शोष-

---

विधा पत्रलेखा शनैर्मन्दं मन्दं पुनर्व्यजिज्ञपद्विज्ञप्तिमकार्षीत । **देवेति**। हे देव हे स्वामिन्, अहं विज्ञापयामि विज्ञप्तिं करोमि । किंलक्षणाहम् । प्रत्यग्रो नवीनो यो देव्याः प्रसादः प्रसन्नता तस्यातिशय आधिक्यं तेनाहितमारोपितं प्रागल्भ्यं महत्त्वं यस्याः सा। परं दुःखिता च संजातदुःखा च सती । अथ विज्ञापनां विशदयति—**देवेनापीति**। देवेनापि स्वामिनापीदं स्वप्रकृतेः स्वस्वभावस्यानुरूपं सदृशं कृतं विहितम् । कथंभूतायाः स्वप्रकृतेः । आपन्नं प्राप्तं वत्सलत्वं हितकारित्वं यया सा तस्याः। किं कुर्वता देवेन । दूरीकुर्वता त्यजता । काम् । देवीं कादम्बरीम् । कीदृशीम् । एषानन्तरोदितावस्था यस्याः सा ताम् । **चन्द्रापीड इति**। चन्द्रापीडस्तु पत्रलेखयोपालम्भगर्भमुपालम्भो गर्भे मध्ये यत्र क्रियायां स्यात्तथा विज्ञप्तो नितरामत्यन्तं पर्याकुलो व्याकुलोऽभवदिति क्रियासंटङ्कः । किंलक्षणः। स्वभावेन निसर्गेण धीरा स्थिरा प्रकृतिः स्वभावो यस्यैवंविधोऽपि । किं कृत्वा । कादम्बर्या देव्यास्तमालापमाकर्ण्य श्रुत्वा । किंलक्षणमालापम् । स्नेहोक्तिः स्नेहस्य प्रीतेरुक्तिः पुरःसरा मुख्या यत्र तम्। चेत्यपरम् । किं कृत्वा । स्तिमिते निश्चले पक्ष्मणी नेत्ररोमराजी ययोस्तयोर्भावस्तत्ता तया दुर्विषहमसह्यं दुःखं तेन यो बाष्पोऽस्रं तेनोपप्लुते व्याप्ते आयते विशाले अक्षिणी यस्य तत्तन्मुखं तस्याः पत्रलेखाया मुखमुत्प्रेक्ष्योत्प्रेक्ष्य दृष्ट्वा दृष्ट्वा। आदरार्थे वीप्सा । अथो आलापं विशेषयन्नाह—**गम्भीरमित्यादि** । अत्र सर्वत्र चकारो वाक्यालंकारार्थः । गम्भीरं महार्थम् । संतापं तापेन सहवर्तमानम् । सपरिहासं परिहासेन सहवर्तमानम् । साभ्यर्थनमभ्यर्थना प्रार्थना तया सहवर्तमानम् । साभिमानं साहंकारम् । सावलेहमवलिह्यत आस्वाद्यत इत्यवलेहो रसस्तेन सहवर्तमानम्। अवज्ञया सहवर्तमानं वा । प्रसादोऽनुग्रहः, गुणो वा, तेन सहवर्तमानम् । निर्वेदः स्वावमाननं तेन सहवर्तमानम् । अनुरागो भक्तिस्तेन सहवर्तमानम् । कोपः क्रोधस्तेन सहवर्तमानम्। सनिर्विशेषं नितरां विशेष उत्कृष्टविशेषविशेषस्तेन सहवर्तमानम् । सावष्टम्भमवष्टम्भः स्तब्धता तेन सहवर्तमानम्, सात्मार्पणं सहात्मार्पणेन वर्तते यः स तम् । सोत्प्रासं सहोत्प्रासेनोत्कण्ठया वर्तमानम् । सोपालम्भं सहोपालम्भेन

हेतुम्, कोमलमपि कठोरम्, नम्रमप्युन्नतम्, पेशलमप्यहंकृतम्, ललितमपि प्रौढमालापमाकर्ण्योत्प्रेक्ष्योत्प्रेक्ष्य च स्तिमितपक्ष्मतया दुर्विषहदुःखबाष्पोपप्लुतायताक्षं तन्मुखं स्वभावधीरप्रकृतिरपि नितरां पर्याकुलोऽभवत्।

अथ कादम्बरीशरीरादिवालापपदैरेव सहागत्य युगपद्गृहीतो हृदये मन्युना कण्ठे जीवितेन, अधरपल्लवे वेपथुना, मुखे श्वसितेन, नासाग्रे स्फुरितेन, चक्षुषि बाष्पेण तुल्यवृत्तिर्भूत्वा कादम्बर्याः क्षरद्बाष्पविक्षेपपर्याकुलाक्षरमुच्चैः प्रत्युवाच—'पत्रलेखे, किं करोमि अनेन दुःशिक्षितेन ज्ञानाभिमानिना पण्डितंमन्येन दुर्विदग्धेन दुर्बुद्धिनालीकधीरेण स्वयंकृतं मिथ्याविकल्पशतसहस्रभरितेनाश्रद्-

---

वर्तमानम्। सानुक्रोशं सहानुक्रोशेनाकर्षेण वर्तमानम्। सस्पृहं सह स्पृहया वाञ्छया वर्तमानम्। सावधारणं विमर्शपूर्वकं च। विरोधाभासेन तमेव विशेषयन्नाह—**मधुरमित्यादि**। अत्र सर्वत्रापिशब्दो विरोधाभासालंकारद्योतनार्थः। मधुरमपि मिष्टमपि। दुःखेन श्रूयत इति दुःश्रवमिति विरोधः। आभासस्तु शृङ्गाराद्युपयुक्तार्थपदत्वलक्षणमाधुर्यस्य विवक्षणात्। सह रसेन वर्तमानमपि शोषस्य हेतुर्निदानमिति विरोधः। आभासस्तु सरसमिति। शृङ्गारादिरसोपयुक्तमित्यर्थात्। कोमलं मृदुमपि कठोरमिति विरोधः। आभासस्तु कोमलमनिष्ठुराक्षरत्वमित्यर्थात्। नम्रं नमनशीलमप्युन्नतमुच्चैस्तरमिति विरोधः। आभासस्तु नम्रं पतत्प्रकर्षमित्यर्थात्। पेशलं सुकुमारमप्यहंकृतमिति विरोधः। आभासस्तु हृद्यमित्यर्थात्। ललितं लघ्वपि प्रौढं महदितिविरोधः। आभासस्तु ललितं सुकोमलबन्धमित्यर्थात्।

अथेति। पर्याकुलतानन्तरं चन्द्रापीडः क्षरन्यो बाष्पो नेत्राम्बु तस्य विक्षेप इतस्ततः पातनं पर्याकुलानि व्याप्तान्यक्षराणि यत्रेति क्रियाविशेषणम्। उच्चैर्बाढस्वरेण। पत्रलेखामिति शेषः। प्रत्युवाच प्रत्यब्रवीदिति क्रियासंटङ्कः। किं कृत्वा। कादम्बर्याः समं तुल्या सदृशी वृत्तिर्यस्य सैवंविधो भूत्वा। किंलक्षणः। उत्प्रेक्षते—कादम्बरीशरीरादिवालापपरैर्दुःखवचनपदैरेव सहागत्य। एभिरेतेष्वित्यध्याहारः। युगपदेकसमये गृहीतः। एभिः कैः, एतेषु केषु, इत्यपेक्षायामाह—**हृदय इत्यादि**। हृदये चित्ते मन्युना क्रोधेन। गृहीत इति पूर्वोक्तं सर्वत्र संबध्यते। कण्ठे निगरणे जीवितेन प्राणितेन। वेपथुना कम्पेनाधर एव पल्लव इति रूपकं तस्मिन्। श्वसितेन निःश्वासेन मुख आनने। स्फुरितेन स्फुरणेन नासाग्रे नासिकान्ते। बाष्पेण रोदनेन चक्षुषि। जातावेकवचनम्। किमुवाच्येत्याह—**पत्रलेखे इति**। हे पत्रलेखे, अहं किं करोमि। किंचित्कर्तुं न समर्थ इत्यर्थः। शृङ्गारश्च नृत्तं च तयोरुज्ज्वलदृक्चालनाद्य आचार्य उपदेष्टा तेन। शृङ्गारस्य नृत्याचार्येण रङ्गाचार्येणेति वा। भगो माहात्म्यमस्यास्तीति भगवांस्तेन। 'भगोऽर्कज्ञानमाहात्म्यवैराग्यादिषु' इति वैजय-

धानेन मूढहृदयेन यद्यदेवानेकप्रकारं शृङ्गारनृत्ताचार्येण भगवता मनोभवेनान्तर्गतविकारावेदनाय मामुद्दिश्य बाला बलात्कार्यते, तत्तदेवादृष्टपूर्वत्वाद्धि दिव्यकन्यकानां रूपानुरूपलीलासंभावनया च तावतो मनोरथानप्यात्मन उपर्यसंभावना च सर्वं सहजमेवैतदस्या इति विकल्पसंशयदोलाधिरूढं मां ग्राहयतैवमीदृशस्य देव्या दुःखस्य तव चोपालम्भस्य हेतुतां नीतोऽस्मि। मन्ये च ममापि मनोव्यामोहकारी कोऽपि शाप एवायम्। अन्यथाप्रबुद्धबुद्धेरपि येषु न सदृह उपपद्यते, तेष्वपि स्फुटेषु मदनचिह्नेषु कथं मे धीर्व्यामुह्येत। तिष्ठन्त्येव तावदतिसूक्ष्मतया दुर्विभाववृत्तीनि तानि स्मितावलोकितकथितविहृतलीलालज्जायितानि, यान्यथापि संभवन्ति

न्ती। मनोभवेन कामेन यद्यदनेकप्रकारं मन्युजीवितवेपथुश्वसितपरितापादिकं बाला योषितो मामुद्दिश्य मदुद्देशेन बलाद्धठात्कार्यते निष्पाद्यते। किमर्थमित्याह—**अन्तरिति**। अन्तर्गतो यो विकारस्तस्यावेदनं ज्ञापनं तस्मै। तादर्थ्ये चतुर्थी। तत्तदनेन प्रत्यक्षेण मूढमज्ञानावृतं यद्धृदयं चित्तं तेन स्वयं कृतमात्मना विहितम्। न तु मयेत्यर्थः। इतो मूढहृदयं विशेषयन्नाह—**दुःशिक्षितेनेत्यादि**। दुर्दुष्टं शिक्षितमभ्यसितं यस्य तत्तथा तेन। ज्ञानेन ज्ञानविषयेऽभिमानोऽहंकारो विद्यते यस्य तत्तथा तेन। पण्डितमात्मानं मन्यते यत्तत्तथा तेन। दुर्दुष्टं। विदग्धत्वं छेकत्वं यस्य तत्तथा तेन। दुर्दुष्टा बुद्धिः प्रतिभा यस्य तत्तथा तेन। अलीकेन मिथ्याभिमानेन धीरं साहसगुणोपेतं तेन मिथ्याविकल्पानामलीकमनोरथानां शतसहस्राणि लक्षास्तैर्भरितमाकीर्णं तेन। न श्रद्दधातीति शास्त्रोक्तं नावधारयतीत्यश्रद्दधानं तेन। कया। अदृष्टपूर्वत्वादनवलोकितपूर्वत्वाद्दिव्या मनोहरा याः कन्यकास्तासां रूपं सौन्दर्यं तस्मानुरूपा योग्या या लीला विलासस्तस्याः संभावनोत्कटकोटिकः संदेहस्तया। पुनः कया। आत्मनः स्वस्योपर्येषा मामिच्छत्येतादृशस्य मनोरथानप्यसंभावनया च। किं कुर्वता मूढहृदयेन। मामेवं ग्राहयतीति (यता)। ग्राहयति द्विकर्मकः। एवं किम्। अस्याः कादम्बर्या एतत्परितापादिकं सर्वं सहजमेव स्वाभाविकमेव। किंलक्षणं माम्। विकल्पसंशययोर्दोलामधिरूढमाश्रितं तथा। तेनैवेति शेषः। मूढहृदयेनैवेदृशस्य पूर्ववर्णितस्य देव्या कादम्बर्या दुःखस्य तवोपालम्भस्य च हेतुतां नीतः प्रापितोऽस्मि। सर्वं यदसम्यक्तन्मूढहृदयेनैव कृतम्। न मयेति भावः। विचारणान्तरं प्रदर्शयन्नाह—**मन्य इति**। अहमिति मन्ये संभावयामि। इतीति किम्। ममायं कोऽप्यनिर्वचनीयो मनसश्चित्तस्य व्यामोहं वैचित्त्यं करोतीत्येवंशीलः शाप एव विरुद्धाशीर्वचनमेव। उक्तवैपरीत्ये आह—**अन्यथेति**। शापाभावेऽप्रबुद्धाजाग्रद्रूपा बुद्धिः प्रतिभा यस्यैवंविधस्य। मूर्खस्यापीत्यर्थः। येषु स्फुटेषु विशदेषु मदनचिह्नेषु कामलक्षणेषु संदेहो द्वापरो नोपपद्यते न जायते। एतानि दुःखजन-

चिरानुभूतात्मकण्ठसंसर्गसुभगं हारमिममकृतपुण्यस्य मे तत्क्षण-मेव कण्ठे कारयन्त्या किमिव नावेदितम्। अपि च हिमगृहकवृत्तान्तस्तु तवापि प्रत्यक्ष एव। तत्किमत्र प्रणयकोपाक्षिप्तयाप्यन्यथा व्याहृतं देव्या। सर्व एवायं विपर्ययान्मम दोषः। तदधुना प्राणैरप्युपयुज्यमानस्तथा करोमि यथा नेदृशमेकान्तनिष्ठुरहृदयं जानाति मां देवी' इत्येवं वदत्येव चन्द्रापीडेऽश्रावितैव प्रविश्य वेत्रहस्ता प्रतीहारी कृतप्रणामा व्यज्ञापयत्—'युवराज, एवं समादिशति देवी विलासवती, कृतजल्पात्परीजनतः श्रुतं मया, यथा किल पृष्ठतः स्थिताद्य पत्रलेखात्र पुनः परागता' इति। 'न च मे त्वय्यस्यां च

कान्येवेति निश्चय एवोत्पद्यत इति भावः। तेष्वपि। मदनचिह्नेष्वपीत्यर्थः। कथं मे मम धीर्बुद्धिर्व्यामुह्येत व्यामोहं व्रजेत्। **तिष्ठन्त्विति**। तावदिदानीं तानि स्मितमीषद्धास्यम्, अवलोकितं वीक्षितम्, कथितं जल्पितम्, विहृतमितस्ततो गतम्, लीलया विलासेन लज्जायितानि त्रपयाचरितानि। एतान्यतिसूक्ष्मतया निकृष्टतया। अतएव दुर्विभावा दुर्ज्ञेया वृत्तिर्येषामेवंभूतानि तिष्ठन्तु। एतादृशनिकृष्टचिन्तयालमित्यर्थः। तानि कानीत्याह—**यानीति**। यानि पूर्वोक्तानि। अन्यथापि स्नेहव्यतिरेकेणापि संभवन्ति। उपपद्यन्त इत्यर्थः। स्वस्मिंस्तस्याः स्नेहं प्रदर्शयन्नाह—**चिरेति**। चिरं चिरकालमनुभूतः प्राप्तो य आत्मनः स्वस्य। अर्थात्कादम्बर्याः। कण्ठसंसर्गो निगरणसंपर्कस्तेन सुभगं मनोहरमिमं प्रत्यक्षगतं हारं मुक्ताप्रालम्बं तत्क्षणमेव तस्मिन्समय एवाकृतमविहितं पुण्यं सुकृतं येनैवंविधस्य मे कण्ठे गले कारयन्त्या प्रक्षेपन्त्या। सखिद्वारेति शेषः। किमिव नावेदितं किं न ज्ञापितम्। अहं त्वदर्थिनीति तदेव ज्ञापितमिति भावः। **अपि चेति**। अपि च प्रकारान्तरे। हिमगृहकस्य नीहारवच्छीतलसद्मनो वृत्तान्त उदन्तस्तवापि भवत्या अपि प्रत्यक्ष एव विदित एव। न केवलं ममैवेति भावः। तदिति हेत्वर्थे। **अत्रेति**। अस्मिञ्जने प्रणयः स्नेहस्तेन तस्माद्वा यः कोपः क्रोधस्तेनाक्षिप्तया प्रेरितया देव्या कादम्बर्या किमन्यथा व्याहृतम्। तदलमनया तदानयनकथयेत्यात्मकमित्यर्थः। **सर्व इति**। अयं सर्व एव समग्र एव विपर्ययादज्ञानान्मम दोषो वैगुण्यम्, न तु तत्त्वतः। **तदिति**। तत्तस्माद्धेतोरधुनाहं तथा करोमि रचयामि यथा देवी कादम्बरीदृशमेकान्तेनातिशयेन निष्ठुरं कठिनं हृदयं चेतो यस्यैवंविधं मां न जानाति। किं कुर्वाणः। प्राणैरप्युपयुज्यमानस्तदीप्सितं कुर्वाणः। इत्येवं चन्द्रापीडे वदत्येव कथयत्येव प्रतीहारी द्वारपालिका कृतः प्रणामो ययैवंभूता मातृपरिजनत्वेन कुमारप्रतीहार्याश्रावितैवानिवेदितैव प्रविश्य प्रवेशं कृत्वा व्यज्ञापयद्विज्ञप्तिमकार्षीत्। कीदृशी। वेत्रं हस्ते यस्याः सा। हे युवराज, देवी विलासवत्येवं समादिशत्याज्ञापयति। एवं किमित्याह—**कृतेति**। कृतो विहितो जल्पोऽन्योन्यालापो येनैवंविधात्परिजनतः सेवकवर्गान्मयेति श्रुतमित्या-

कश्चिदपि स्नेहस्य विशेषो विलसतीति मयैवेयं संवर्धिता। अपि च तवापि कापि महती वेला वर्तते दृष्टस्य। तदनया सहित एवागच्छ। मनोरथशतलब्धमतिदुर्लभं ते मुखकमलावलोकनम्, इति।

चन्द्रापीडस्तु तदाकर्ण्य चेतस्यकरोत्—' अहो संदेहदोलाधिरूढं मे जीवितम्। एवमम्बानिमेषमपि मामपश्यन्ती दुःखमास्ते। पत्रलेखामुखेन चैवमाज्ञापितमागमनाय मे निष्कारणवत्सलेन देवीप्रसादेन। आजन्मक्रमाहितो बलवाञ्जननीस्नेहः, वाञ्छाव्याकुलं हृदयम्, अमोच्यं तातचरणशुश्रूषासुखम्। प्रमाथी मन्मथहतकः, हारिणी गुरुजनलालना, दुःसहान्युत्कण्ठितानि, अनुबन्धिनी बा-

---

कर्णितम्। इतीति किम्। तदेव दर्शयति—**यथेति**। किलेति सत्ये। पृष्ठ इति पृष्ठतः। तस्प्रत्ययस्य सार्वविभक्तिकत्वात्। स्थिता विलम्बिता पत्रलेखाद्यास्मिन्नहन्यत्रास्मिन्प्रदेशे पुनः परागता प्रत्यावृत्य समागता। पुनः किं समादिशतीत्याह—**न चेति**। मे मम त्वयि भवत्यस्यां पत्रलेखायां चेति हेतोः स्नेहस्य प्रेम्णः कश्चिदपि विशेषो न विलसति। न वर्तत इत्यर्थः। इतीति किम्। यत इयं पत्रलेखा मयैव संवर्धिता वृद्धिं प्रापिता। एतेनोभयोरपि मयैव प्रवर्धनात्त्वयि तस्यां च मम स्नेहः समान एवास्तीति ध्वन्यते। पुनः किं समादिशतीत्याह—**अपि चेति**। अपि च प्रकारान्तरे। तवापि भवतोऽपि दृष्टस्यावलोकितस्य कापि महती गुर्वी वेला कालविशेषो वर्तते। तत्तस्माद्धेतोरनया पत्रलेखया सहित एव समन्वित एवागच्छैहि। त्वमिति शेषः। यतस्ते तव मुखमेव कमलं तस्यावलोकनं वीक्षणमतिदुर्लभमतिदुःप्रापम्। कीदृशम्। मनोरथानां समीहितानां शतैर्लब्धं प्राप्तम्।

तु पुनश्चन्द्रापीडस्तत्पूर्वोक्तमाकर्ण्य श्रुत्वा चेतस्यकरोदचिन्तयत्। एवं किमित्यत आह—**अहो इति**। अहो इत्याश्चर्ये। मे मम जीवितं प्राणितं कादम्बरीसमीपे व्रजामि उत मातुः संनिधाविति संशयो द्वापरःस एव दोला दोलनं तामधिरूढमाश्रितम्। कथमित्याह—**अम्बेति**। [एवं] अम्बा विलासवती निमेषमपि निमीलितमात्रमपि मां चन्द्रापीडमपश्यन्त्यनवलोकयन्ती दुःखं यथा स्यात्तथास्ते तिष्ठति। तथा निष्कारणं निर्निमित्तं वत्सलेन हितकारिणा देव्याः कादम्बर्याः प्रसादेनानुग्रहेण पत्रलेखामुखेन च पत्रलेखावाक्येन च मे ममागमनायैवमाज्ञापितम्। **आजन्मक्रमेति**। जनन्या मातुः स्नेहो बलवान्बलिष्ठः। कीदृक्। आजन्मतो जन्म मर्यादीकृत्य क्रमेण मर्यादयाहित आरोपितः। जन्ममर्यादयारोपितत्वमेवास्य विशेषः। विशेषादत्रैव स्थातुमुचितमित्याशयः। हृदयं चेतो वाञ्छाभिरिच्छाभिर्व्याकुलम्। तातस्य पितुश्चरणौ पादौ तयोः शुश्रूषा सपर्या तस्याः सुखममोच्यं न मोक्तुं योग्यम्। [मन्मथहतकः] कंदर्पहतकः प्रमथ्नातीत्येवंशीलः

न्धवप्रीतिः, कुतूहलिन्यभिनवप्रार्थना, मुखावलोकिनः कुलक्रमागता राजानः, जीवितफलं प्रियतमामुखावलोकनम्, अनुरक्ताः प्रजाः, गरीयान्गन्धर्वराजसुतानुरागः, दुस्त्यजा जन्मभूमिः, परिग्राह्या देवी कादम्बरी, कालातिपातासहं मनः विप्रकृष्टमन्तरं हेमकूटविन्ध्याचलयोः' इत्येवं चिन्तयन्नेव प्रतीहार्योपदिश्यमानमार्गः पत्रलेखाकरावलम्बी जननीसमीपमगात्। तत्रैव च तमनेकप्रकारजननीलालनसुखाचिन्तितदुर्विषहहृदयोत्कण्ठं दिवसमनयत्।

तृतीय० सम०

उपनतायां चात्मचिन्तायामिवान्धकारितदशदिशि शर्वर्याम्, मन्दमावातुमारब्धे प्रदोषानिले च, शयनवर्ती निमीलितलोचनोऽप्यप्राप्तनिद्राविनोदो हेमकूटागमनखेदान्निपत्य विश्रान्तेनेव मनसा

प्रमाथी। चित्तोद्वेगकृदित्यर्थः। गुरुजनस्य मात्रादेर्लालना प्रतिपालना हारिणी मनोहरा। दुःसहानि सोढुमशक्यान्युत्कण्ठितान्युत्कण्ठाविषयीभूतानि। बान्धवानां स्वजनानां प्रीतिः स्नेहोऽनुबन्धातीत्येवंशीलानुबन्धिनी। गमनविघ्नकारिणीत्यर्थः। अभिनवस्यादृष्टपूर्वस्य वस्तुनः प्रार्थना वाञ्छा कुतूहलिन्याश्चर्यकारिणी। कुलक्रमेण पट्टपरम्परया आगताः प्राप्ता राजानो भूभुजो मुखमाननमवलोकयन्तीत्येवंशीलाः मुखावलोकिनो वक्रवीक्षकाः। प्रियतमाः स्त्रियस्तासां मुखावलोकनं वक्रवीक्षणं जीवितस्य प्राणितस्य फलं साध्यम्। प्रजा जनवासिनो जना अनुरक्ता अनुरागिणः। गन्धर्वराजसुता कादम्बरी तस्यां तस्या वानुरागः स्नेहो गरीयानतिशयेन गुरुः। दुस्त्यजा दुःखेन मोक्तुं शक्या जन्मभूमिर्जन्मनः स्वोत्पत्तेर्भूमिः स्थलम्। तदुक्तमन्यत्र—'जणणी जम्मुप्पत्ती पच्छिमनिद्दा सुभासियं वयणम्। मणइट्ठं माणुस्सं पञ्च वि दुक्खेहिं मुच्चन्ति॥' [जननी जन्मोत्पत्तिः पश्चिमनिद्रा सुभाषितं वचनम्। मनइष्टो मनुष्यः पञ्चापि दुःखान्मुच्यन्ते] इति। कादम्बरी देवी परिग्राह्या परिणेतुं योग्या। कालस्यानेहसोऽतिपातो विलम्बस्तं न सहतीत्येवंशीलं मनः स्वान्तम्। तदीयमिति शेषः। हेमकूटविन्ध्याचलयोरन्तरं विचालं विप्रकृष्टं दूरम्। इत्येवं चिन्तयन्नेव विमृशन्नेव प्रतीहार्या द्वारनियुक्तयोपदिश्यमानः कथ्यमानो मार्गः पन्था यस्यैवंभूतः पत्रलेखायाः करं हस्तमवलम्बत इत्येवंशीलः स तथा जनन्या मातुः समीपमभ्यर्णमगादगमत्। तत्रैव मातुः समीपे तं दिवसं वासरमनयन्निनाय। कीदृशं दिवसम्। अनेकप्रकारं बहुविधं जनन्या मातुर्लालनसुखं तेनाचिन्तिताविज्ञाता दुर्विषहहृदयोत्कण्ठा यस्मिन्स तथा।

रात्रौ विशेषं प्रदर्शयन्नाह—**उपेति**। उपनतायां च प्राप्तायां च शर्वर्यां रजन्याम्। कृष्णत्वसाम्यादाह—आत्मचिन्तायामिव चन्द्रापीडो मनसा मनोव्यापारेण स्मरस्य कंदर्पस्यायतनभूतं सद्मतां गतं प्राप्तं यत्कादम्बरीरूपं तस्य

सस्मार स्मरायतनभूतस्य कादम्बरीरूपस्य । 29/8

केवलं रात्रौ दिवा चाकृतनिर्वृतिरा—ज्वलताप्यदहनात्मकेन दहताप्यक्षतस्नेहेन्धनेन दुःखानुभवनायैव भस्मसादकुर्वता मदनदहनेनान्तर्बहिश्च क्वाथ्यमानदेहः शोषमगात्, आर्द्रतां पुनः प्रतिक्षणाधीयमानवृद्धिं नात्याक्षीत् । एवं च निष्प्रतिक्रियतयादुस्त्यजतया वातिविसंस्थुलेनोपास्यमानोऽपि मनसिजेनाकारमेव लोकलोचनेभ्योऽरक्षत्, न कुसुमशरसायकेभ्यो जीवितम् । तनोरेव तानवमङ्गीचकार, न लज्जायाः । शरीरस्थितावेवानादरं कृतवान्, न कुलस्थितौ । प्रजा एवान्वरुध्यत, न मन्मथोत्कलिकाः । सुखमेवावधीरयामास, न धैर्यम् । एवंमतिक्रान्तेषु वासरेषु, एकदा

सस्मार । 'स्मृतौ च' इति सूत्रेण कर्मणि षष्ठी ।

केवलमिति । स चन्द्रापीडो मदन एव दहनो वह्निस्तेनान्तर्हृदये बहिरवयवादौ क्वाथ्यमान उत्काल्यमानो देहः शरीरं यस्यैवंविधः शोषं क्षीणत्वमगात्प्राप । किंलक्षणः । एवमेव पूर्ववत् । रात्रौ निश्यपरं दिवा दिवसेऽकृताऽविहिता निर्वृतिर्मनःस्वास्थ्यं येन सः । किंलक्षणेन मदनदहनेन । आ समन्ताज्ज्वलता प्रज्वलता । पुनः कीदृशेन । अदहनात्मकेनावह्निस्वरूपेणापि दहता भस्मीकुर्वता । पुनः कीदृशेन । न क्षतमक्षीणं स्नेहलक्षणमिन्धनमेधो येन स तथा तेन । पुनः किं कुर्वता । दुःखस्यासातस्यानुभवनं साक्षात्करणं तस्मै तदर्थमेव । तादर्थ्ये चतुर्थी । सर्वं भस्म भस्मसादकुर्वताघटयता । शरीरव्यतिरेकेण दुःखानुभवनाभावादिति भावः । शरीरशोष आर्द्रता न भवतीत्याशयेनाह—**न पुनरिति** । न पुनरार्द्रतां मृदुतां स्नेहवत्तां वात्याक्षीत्तत्याज । आर्द्रतां विशेषयन्नाह—**प्रतीति** । प्रतिक्षणं प्रतिसमयमाधीयमानारोप्यमाणा वृद्धिर्यस्यां सा ताम् । **एवं चेति** । स लोकानां जनानां लोचनानि नेत्राणि तेभ्य आकारमिङ्गितमरक्षद्रक्षयामास । परं कुसुमशरः कामस्तस्य सायका बाणास्तेभ्यो जीवितं प्राणितं नारक्षत् । किंविशिष्टः सः । उपास्यमानोऽपि सेव्यमानोऽपि । केन । मनसिजेन कामेन । किंलक्षणेन । अतिविसंस्थुलेनातिव्याकुलेन । वीक्षापन्नेनेति यावत् । तन्निदानमाह—[**निः**] **प्रतीति** । निर्गता प्रतिक्रिया प्रतीकारो यस्यां क्रियायां तस्या भावस्तत्ता तया । दुःखेन त्यजत इति दुस्त्यजस्तस्य भावस्तत्ता तया वा । **तनोरेवेति** । तनोः शरीरस्य तानवं कृशत्वमङ्गीचकार स्वीचक्रे । न लज्जायास्त्रपायाः । लज्जाधिक्यमेवाङ्गीकृतवानिति भावः । **शरीरेति** । शरीरस्य देहस्य स्थितिर्धारणं तस्यामेवानादरणमनाग्रहं कृतवान् । न कुलस्याभिजनस्य स्थितौ मर्यादायाम् । **प्रजा इति** । प्रजा एव प्रकृतिरेवान्वरुध्यत न्यवार्यत । न मन्मथस्य कंदर्पस्योत्कलिका उत्कण्ठाः । **सुखमिति** । स चन्द्रापीडः सुखमेव सौख्यमेवावधीरयामासावगणयामास । न धैर्यं न साहसम् ।

रणरणकसकाशादिवान्तरलब्धावस्थानो निर्गत्य बहिर्नगर्याः सिप्रातटान्यनुसरन्नातिदूरमिव चरणाभ्यामेव बभ्राम । भ्राम्यंश्च रुद्रायतने रयेणागच्छतस्तुरंगमानद्राक्षीत् ।

दृष्ट्वा चोत्पन्नकुतूहलस्तेषां परिज्ञानायान्यतमं पुरुषं प्राहिणोत् । आत्मनाप्यूरुदघ्नेन पयसोत्तीर्य सिप्रां तस्मिन्नेव भगवतः कार्तिकेयस्यायतने तत्प्रतिवार्तां प्रतिपालयन्नतिष्ठत् । तत्रस्थश्च कुतूहलात्तस्मिन्नेव वाजिवृन्दे निक्षिप्तदृष्टिः पार्श्वस्थितां हस्तेनाकृष्य पत्रलेखामवादीत्—' पत्रलेखे, पश्य । य एष पुर एवार्ककिरणनिवारणोल्लासितया प्रेङ्खदालोललम्बशिखया मयूरपिच्छमय्या वंक्रिकया दुर्विभाव्यवदनोऽश्ववारो ज्ञायते; केयूरकोऽयम् ' इति । यावत्तया सहैवं निरूपयत्येव, तावत्तस्मात्प्राहितपुरुषादुपलब्धात्मावस्थानं दृष्टिपथ एवावतीर्य तुरंगमादापतन्तं दूराद्द्रुतागमनधूलिधूसरश्यामी-

---

एवमिति । एवं पूर्वोक्तप्रकारेण वासरेषु दिवसेष्वतिक्रान्तेषु गतेषु सत्सु एकदा एकस्मिन्समये रणरणकसकाशादिवोत्सुक्यपार्श्वादिवान्तर्मध्येऽलब्धमप्राप्तमवस्थानमवस्थितिर्येनैवंभूतो नगर्या अवन्त्या बहिर्निर्गत्य बहिरागत्य दूरादेव दूरत एवातिबहूनिव तुरंगमानश्वानद्राक्षीदपश्यत् ।

दृष्ट्वा चेति । दृष्ट्वा विलोक्योत्पन्नं प्रकटीभूतं कुतूहलमाश्चर्यं यस्यैवंभूतस्तेषां तुरंगमानां परिज्ञानाय कस्येमे इति ज्ञानार्थमन्यतमं पुरुषं प्राहिणोत्प्रहितवान् । ऊरू परिमाणं यस्यैवंभूतेन पयसा जलेनात्मनापि सिप्रानदीमुत्तीर्य तस्मिन्नेव स्थले भगवतो माहात्म्यवतः । कार्तिकेयस्य षण्मुखस्यायतने चैत्ये तस्य प्रहितपुरुषस्य प्रतिवार्तां प्रत्युत्तरं प्रतिपालयन्विलोकयन्नतिष्ठत्तस्थौ । **तत्रस्थ इति** । तत्र चैत्ये स्थितस्य (श्च) कुतूहलात्कौतुकात्तस्मिन्नेव पूर्वप्रतिपादित एव वाजिवृन्देऽश्वसमूहे निक्षिप्ता स्थापिता दृष्टिर्दृग्येनैवंभूतः पार्श्वस्थितां समीपस्थां पत्रलेखां हस्तेन करेणाकृष्याकर्षणं कृत्वावादीदवोचत् । किमवादीदित्याह—**पत्रलेखे इति** । हे पत्रलेखे, पश्यावलोकय । (य) एष पुरोऽग्र एवार्ककिरणाः सूर्यरश्मयस्तेषां निवारणे दूरीकरण उल्लासितयोल्लासं प्राप्तया प्रेङ्खती दीप्यन्ती आलोला चञ्चला लम्बायता शिखाग्रं यस्याः सा तथा तया । मयूरपिच्छैः कलापिबर्हैर्निःपन्नाः मयूरपिच्छमयी । ' प्राचुर्यविकारार्थे ' इति मयट् । तयैवंविधया वंक्रिकया शीकरिण्या दुर्विभाव्यं दुःखेन ज्ञातुं शक्यं वदनमाननं यस्यैवंऽभूतोश्ववारोऽयं केयूरक इति ज्ञायते संभाव्यते। स यावद्यावत्कालं तया सह पत्रलेखया सममेवं निरूपयत्येव कथयत्येव, तावत्कालं तस्मात्प्रहितपुरुषात्प्रेषितनरादुपलब्धं ज्ञातमात्मनः स्वस्यावस्थानमुपवेशनं येनैवंभूतं केयूरकं कादम्बर्या अनुचरमद्राक्षीदपश्यदिति दूरेणान्वयः । किं कुर्वन्तं केयूरकम् । दूरादापतन्तमागच्छन्तम् । किं कृत्वा । अवतीर्यावरोहणं कृत्वा । कस्मात् । तुरंग-

कृतशरीरं परिवर्तितदिवेतराकारणोज्झिताङ्गरागसंस्कारमलिनेन वपुषा विषादशून्येन च मुखेनान्तर्दुःखसंभारपिशुनया च दृष्ट्या दूरत एवापृष्टामपि कष्टां कादम्बरीसमामवस्थामनक्षरमावेदयन्तं केयूरकमद्राक्षीत् । दृष्ट्वा च दर्शितप्रीतिरेह्येहीत्याहूय ससंभ्रमप्रणतोपसृतमतिदूरप्रसारिताभ्यां दोर्भ्यां पर्यष्वजत तम् । अपसृत्य पुनः कृतनमस्कारे तस्मिन्ननामयप्रश्नवचसा संवर्ग्य सर्वानेव तत्सहायान्पुरः स्थितं पुनः पुनः सस्पृहमालोक्य केयूरकमवादीत्—' केयूरक, त्वद्दर्शनेनैव भद्रं देव्याः सपरिवारायाः कादम्बर्या इत्येतदावेदितम् । आगमनकारणमपि विश्रान्तः सुखितः कथयिष्यसि ' इत्युक्त्वा संभ्रान्तागतारोहकढौकितां करिणीमारुह्य ' कुतोऽस्य जनस्य सुखिता ' इत्यभिदधानमेव केयूरकं पृष्ठतः कृत्वा पत्रलेखां चारो-

---

मादश्वात् । कस्मिन् । दृष्टिपथ एव दृग्विलोकन एव । चन्द्रापीडस्येति शेषः । दृष्टेः पन्था दृष्टिपथः । ' ऋक्पूरब्धूःपथामानक्षे ' इत्यच् । इतः केयूरकं विशेषयन्नाह—द्रुत इति । द्रुतं शीघ्रं यदागमनं तेन धूल्या रजसा धूसरमीषत्पाण्डुरभत् । एवं श्यामीकृतं शरीरं यस्य सः । उत्प्रेक्षते—इतरो भिन्नो य आकार आकृतिस्तेन परिवर्तितमिव विनिमयीकृतमिव । उज्झितो दूरीकृतो योऽङ्गरागो विलेपनं संस्कारश्चाधिवासनं ताभ्यां मलिनेन कश्मलेन वपुषा शरीरेण विषादो हर्षाभावस्तेन कृत्वा शून्येन निस्तेजसा मुखेनाननेन चान्तर्मध्ये यद्दुःखजातं तस्य संभारः समूहस्तस्य पिशुनया ज्ञापकया दृष्ट्या च चक्षुषा च दूरत एव दूरप्रदेशादेवापृष्टामप्यप्रश्नविषयीकृतामपि कष्टं विद्यते यस्यां सा कष्टा ताम् । अस्त्यर्थेऽच्प्रत्ययः । एवंविधां कादम्बर्याः (समां) अवस्थां दशामनक्षरं वाग्व्यापाररहितं यथा स्यात्तथावेदयन्तं ज्ञापयन्तमद्राक्षीदिति । अन्वयस्तु पूर्वमेवोक्तः । दृष्ट्वा चेति । दृष्ट्वा च विलोक्य च तं केयूरकं दर्शिता प्रकटिता प्रीतिः स्नेहो येनैवंभूतो दोर्भ्यां भुजाभ्यां पर्यष्वजताश्लिष्यत । किं कृत्वा । एह्येह्यागच्छागच्छेत्याहूयाहानं कृत्वा । कीदृशं केयूरकम् । ससंभ्रमेणादरेण प्रणतश्चासावुपसृतश्च तम् । न त्वपसरन्तमित्यर्थः । कथंभूताभ्यां दोर्भ्याम् । अतिदूरं प्रसारिते विस्तारिते ताभ्याम् । अपसृत्येति । अपसरणं कृत्वा पुनः कृतो विहितो नमस्कारो नतिर्येनैवंभूते तस्मिन्केयूरके सत्यनामयस्य प्रश्नः पृच्छा तस्य वचस्तेन सर्वानेव समग्रानेव तस्य केयूरकस्य सहायान्सहागतान्संवर्ग्य संतोष्य पुरःस्थितमग्रस्थितं पुनः पुनः सस्पृहं साभिलाषमालोक्य समीक्ष्य चन्द्रापीडः केयूरकमवादीदवोचत् । किमवादीदित्याशयेनाह—केयूरकइति । हे केयूरक, तव दर्शनमालोकनं तेनैव सपरिवारायाः सपरिच्छदाया देव्याः कादम्बर्या भद्रं कल्याणमित्येतदावेदितं कथितम् ।

प्य स्वभवनमयासीत् । तत्र च निषिद्धाशेषराजलोकप्रवेशः प्रविश्य वल्लभोद्यानं सपरिवारेण केयूरकेण सहोत्ताम्यता चेतसाचेतितमेव दिवसकरणीयं निवर्तयामास । निर्वर्त्य च पत्रलेखाद्वितीयः सुदूरोत्सारितपरिजनः केयूरकमाहूयाब्रवीत्—' केयूरक, कथय देव्याः कादम्बर्याः समदलेखाया महाश्वेतायाश्च संदेशम् ' इत्यभिहितवति चन्द्रापीडे पुरः सप्रश्रयमुपविश्य केयूरकोऽप्यवादीत्—' देव, किं विज्ञापयामि । नास्ति मयि संदेशलवोऽपि देव्याः कादम्बर्याः समदलेखाया महाश्वेताया वा । यदैव पत्रलेखां मेघनादाय समर्प्य प्रतिनिवृत्य मयायं देवस्योज्जयिनीगमनवृत्तान्तो निवेदितः, तदैवोर्ध्वं

आगमनेति । स चन्द्रापीडः स्वस्य भवनं गृहमयासीदगच्छदित्यन्वयः । किं कृत्वा । आगमनकारणं निदानं तदपि विश्रान्तः कृतविश्रामः सुखितः संजातसुखः स त्वं कथयिष्यसि निवेदयिष्यसीत्युक्त्वा प्रोच्य । क्वचित् ' सुखी नः कथयिष्यसि' इति पाठो दृश्यते । तेन नः अस्माकमिति तस्यार्थः । पुनः किं कृत्वा । संभ्रान्तः ससंभ्रम आगतो य आरोहको हस्तिपकस्तेन ढौकितामानीतां करिणीं हस्तिनीमारुह्यारोहणं कृत्वा । अस्य केयूरकलक्षणस्य जनस्य कुतः कस्मात्सुखिता इत्यभिदधानमिति ब्रुवन्तमेव केयूरकं पृष्ठतः पृष्ठप्रदेशे पत्रलेखां चारोप्यारोपणं कृत्वेत्यर्थः । स्वभवनमयासीदित्यन्वयस्तु प्रागेवोक्तः । **तत्र चेति** । स चन्द्रापीडो दिवसकरणीयं वासरकृत्यं निवर्तयामास कृतवान् । किं कृत्वा । सह परिवारेण परिच्छदेन वर्तते यः स सपरिवारः एवंभूतेन केयूरकेण सह समं वल्लभमुद्यानमारामं प्रविश्य प्रवेशं कृत्वा । किंलक्षणः सः । निषिद्धो निवारितोऽशेषाणां समग्राणां राजलोकानां प्रवेशो येन सः । कीदृशं दिवसकरणीयम् । उत्ताम्यतातिव्याकुलेन चेतसाचेतितमेवाज्ञातमेव । **निवर्त्य चेति** । स चन्द्रापीडः केयूरकमाहूयाह्वानं कृत्वाब्रवीदवोचत् । किं कृत्वा । निर्वर्त्य विधाय — दिवसकरणीयमिति शेषः । चन्द्रापीडं विशेषयन्नाह—**पत्रलेखेति** । पत्रलेखैव द्वितीया यस्य सः । सुदूरं दूर उत्सारितो दूरीकृतः परिजनस्ये (नः से)वकवर्गो येन सः । किमब्रवीदित्याशयेनाह—**केयूरक इति** । हे केयूरक, देव्याः कादम्बर्या समदलेखाया मदलेखाया सह वर्तमानायाः । कादम्बर्या विशेषणम् । महाश्वेतायाश्च संदेशं वाचिकं कथय निवेदयेति चन्द्रपीडेऽभिहितवति कथितवति सति पुरोऽग्रे सप्रश्रयं सविनयमुपविश्य निषद्य केयूरकोऽप्यवादीदुवाच । किमुवाचेत्याह—**देव इति** । हे देवि, किं विज्ञापयामि किं विज्ञप्तिं करोमि । यदादिष्टं तदेव वदेत्याह—**नास्तीति** । मयि विषये देव्याः कादम्बर्याः समदलेखाया महाश्वेताया वा संदेशलवोऽपि वाचिकादेशोऽपि नास्ति न विद्यते । तन्निदानमाह—**यदैवेति** । यदैव यस्मिन्नेव क्षणे पत्रलेखां मेघनादाय समर्प्य समर्पणं कृत्वा प्रतिनिवृत्य परावृत्य मया केयूरकेण देवस्य भवत उज्जयिन्या-

विलोक्य दीर्घमुष्णं च निःश्वस्य सनिर्वेदम् ' एवमेतत् ' इत्युक्त्वोत्थाय महाश्वेता पुनस्तपसे स्वमेवाश्रमपदमाजगाम । देव्यपि कादम्बरी झटिति हृदये द्रुघणेनेवाभिहता, ह्यतर्कितापतिताशनिनेव मूर्ध्नि ताडिता, अन्तःपीडाकूणननिमीलितेन चक्षुषा मूर्च्छितेव, मुषितेव परिभूतेव, वञ्चितेव, चोन्मुक्तेव चान्तःकरणेन, अविदितमहाश्वेतागमनवृत्तान्ता, चिरमिव स्थित्वोन्मील्य नयने, विलक्षेव, लज्जितेव, विस्मृतेव, विस्मयस्तब्धदृष्टिः ' महाश्वेतायाः कथय ' इति सासूयमिव, मामादिश्य मदलेखायां पुनर्वलितमुखी सविलक्षस्मितम् ' मदलेखे, अस्ति केनचिदपरेणैतत्कृतं करिष्यते वा यत्कुमारेण चन्द्रापीडेन ' इत्येवमभिदधत्युत्थाय निवारिताशेषपरिजनप्रवेशा शयनीये निपत्योत्तरवाससोत्तमाङ्गमवगुण्ठ्य निर्विशेषहृदयवेदनां मदलेखामप्यनालपन्तीं सकलमेव तं दिवसमस्थात् । परेद्युश्च प्रातरेवोपसृतं माम् ' एवं दृढतरशरीरेषु म्रियमाणेष्विव भव-

---

मवन्त्यां यद्गमनं तस्य वृत्तान्त उदन्तो निवेदितः कथितः । तदैव तस्मिन्नेव क्षण ऊर्ध्वं विलोक्य निरीक्ष्य दीर्घमायतमुष्णं च निःश्वस्य निःश्वासं मुक्त्वा सनिर्वेदं स्वावमाननसहितं यथा स्यात्तथा । एतदेवमेव निश्चयेन चन्द्रापीडो गत इत्युक्त्वोत्थायोत्थानं कृत्वा महाश्वेता पुनस्तपसे तपोऽर्थं स्वमेवात्मीयमेवाश्रमपदं स्थानमाजगामाययौ । कादम्बर्यपि सकलमेव तं दिवसमस्थादतिष्ठदिति दूरेणान्वयः । इतः कादम्बरीं विशेषयन्नाह—झटिति तत्कालं हृदये स्वान्ते द्रुघणेन घनेनाभिहतेव ताडितेव । अतर्कितमचिन्तितमापतितो योऽशनिर्वज्रं तेन मूर्ध्नि मस्तके ताडितेवाभिहतेव । अन्तःपीडा मानसी व्यथा तया कूणनं क्रन्दनं तेन निमीलितेन मुद्रितेन चक्षुषा नेत्रेण मूर्च्छितेव मोहं प्राप्तेव । मुषितेव गृहीतसर्वस्वेव । परिभूतेव पराभवं प्रापितेव । वञ्चितेव वञ्चनाविषयीकृतेव । अन्तःकरणेन चित्तेनोन्मुक्तेव त्यक्तेव । अविदितोऽज्ञातो महाश्वेताया गमनवृत्तान्तो यया सैवंभूता कादम्बरी चिरमिव बहुकालमिव स्थित्वा नयने नेत्रे उन्मील्योन्मुद्य, विलक्षेव वीक्षापन्नेव, लज्जितेव त्रपितेव, विस्मृतेव विस्मरणं प्राप्तेव, विस्मय आश्चर्यं तेन स्तब्धा दृष्टिर्यस्या एवंभूता महाश्वेतायाः कथय निवेदय । चन्द्रापीडो गत इति शेषः । इति सासूयं सेर्ष्यं मामादिश्य प्रतिपाद्य मदलेखायां विषये पुनर्वलितं मुखं यस्या एवंविधा सती विलक्षं यत्स्मितं तेन सहवर्तमानं यथा स्यात्तथा हे मदलेखे, केनचिदनिर्दिष्टनाम्ना परेणेतरेणैतद्गमनलक्षणं कृतमस्ति । करिष्यते वा यत्कुमारेण चन्द्रापीडेन कृतमिति । एवमभिदधती कथयत्युत्थायोत्थानं कृत्वा निवारितो दूरीकृतोऽशेषपरिजनस्य समग्रसेवकलोकस्य प्रवेशो यया सा शयनीये शय्यायां निपत्य पतनं कृत्वोत्तरवाससोत्तरीयवस्त्रेणोत्तमाङ्गं शिरोऽवगुण्ठ्याच्छाद्य निर्गतो

त्स्वहमीदृशीमवस्थामनुभवामि इत्युपालभमानेव, ' न मे भवद्भिः पार्श्ववर्तिभिः कार्यम् ' इति निर्भर्त्सयन्तीव, ' किं मे पुरस्तिष्ठसि ' इत्यन्तर्मन्युवेगेन तर्जयन्तीव च बाष्पपूरोद्रेकोत्कम्पपर्याकुलया दृष्ट्या चिरमालोकितवती । तथा दृष्टश्च तया दुःखितया देव्यादिष्टमेव गमनायात्मानं मन्यमानोऽहमनिवेद्यैव देव्यै देवपादमूलमुपागतोऽस्मि । तच्च देवैकशरणजनजीवितपरित्राणाकुलमतेः केयूरकस्य विज्ञापनाकर्णनावधानदानेन प्रसादं कर्तुमर्हसि । देव, श्रूयताम् । यदैव ते प्रथमागमनेनामोदिना मलयानिलेनेव चलितं समस्तमेव तत्कन्यकालतावनम्, तदैव सकलभुवनमनोभिरामं भवन्तमालोक्य वसन्तमिव रक्ताशोकतरुलतामिवारूढवान्मकरकेतन-

---

विशेषो यस्या एवंविधा हृदयवेदना चित्तपीडा यस्यास्ताम् । समानदुःखामित्यर्थः । एवंभूतां मदलेखामप्यनालपन्त्यभाषयन्ती सकलमेव तं दिवसमस्थादित्यन्वयस्तु प्रागेवोक्तः । **परेद्युश्चेति** । अपरदिने प्रातरेव प्रभात इवोपसृतमागतं मामित्युपालभमानेवोपालम्भं ददानेव । इतीति किम् । एवं पूर्वोक्तप्रकारेण दृढतरमतिशयेन कठिनं शरीरं येषामेवंभूतेषु भवत्सु केयूरकप्रभृतिषु । उत्प्रेक्षते—श्रि(म्रि)यमाणेष्विव मरणं प्राप्यमाणेष्विवाहं कादम्बरीदृशीमवस्थां दशामनुभवाम्यनुभवविषयीकरोमि । पार्श्ववर्तिभिः समीपस्थायिभिर्भवद्भिर्मे मम न कार्यं न कृत्यमिति निर्भर्त्सयन्तीव निर्भर्त्सनां कुर्वन्तीव । मे मम पुरोऽग्रे किं तिष्ठसीत्यन्तर्मन्युवेगेनान्तःक्रोधरयेण तर्जयन्तीव तर्जनां कुर्वन्तीव । तथा बाष्पो नेत्राम्बु तस्य पूरः प्रवाहस्तस्योद्रेक आधिक्यं तेन य उत्प्राबल्येन कम्पो वेपथुस्तेन पर्याकुला व्याप्ता तया दृष्ट्या दृशा चिरं बहुकालमालोकितवती निरीक्षितवती । तथा दुःखितया तेन प्रकारेण दुःखं प्राप्तया देव्या कादम्बर्या दृष्टोऽवलोकित आत्मानं गमनायादिष्टमेवाज्ञापितमेव मन्यमानोऽहं देव्यै कादम्बर्यै अनिवेद्यैवाननुज्ञाप्यैव देवस्य भवतः पादमूलं चरणसमीपमुपागतोऽस्म्यायातोऽस्मि । **तच्चेति** । तत्तस्मात्कारणादेव एवं भवानेवैकः शरणं यस्यैवंविधो यो जनः कादम्बरीलक्षणस्तस्य जीवितं प्राणितं तस्य परित्राणं रक्षणं तस्मै आकुला मतिर्यस्यैवंभूतस्य केयूरकस्य विज्ञापना विज्ञप्तिस्तस्या आकर्णनं श्रवणं तस्मिन्नवधानदानेन चित्तप्रदानेन प्रसादं कर्तुं त्वं देवोऽर्हसि योग्यो भवसि । हे देव, श्रूयतामाकर्ण्यताम् । विज्ञप्त्यन्तरमिति शेषः । यदैव यस्मिन्नेव क्षणे ते तव प्रथमागमनेनाद्यागमनेन । उत्प्रेक्षते—आमोदिना सुगन्धिना मलयानिलेनेव मलयमारुतेनेव समस्तमेव समग्रमेव तत्कन्यकालतावनं कन्यका एव लतास्तासां वनं चलितं क्षुब्धम्, तदैव तस्मिन्नेव क्षणे सकलं यद्भुवनं जगत्तस्य मनोभिरामं चेतोरुचिरं वसन्तमिव भवन्तं त्वामालोक्य निरीक्ष्य रक्ता याशोकतरुलता तामिव तां कादम्बरीं मकरकेतनः कंदर्प आरूढवान्प्रविष्टवान् ।

स्ताम् । इदानीं तु महान्तमायासमनुभवति त्वदर्थे कादम्बरी । किं करोमि, कथय कथं कथ्यते, कया वृत्त्या वर्ण्यते, कीदृशेनोपायेन प्रदर्श्यते, केन प्रकारेणावेद्यते, कया युक्त्या प्रकाशयते, कतमया वेदनयोपनीयते बलवती । तदुत्कण्ठा इत्यावेदयन्तं च केयूरकम् 'भवतु । संप्रति न शक्नोम्यतः परं श्रोतुम्' इत्यामीलनदत्तसंज्ञेव कादम्बरीव्यथाश्रवणवेदनासंभवानुकम्पयेव चन्द्रापीडमाक्रमन्ती मूर्च्छा न्यवारयत्, न तु पुनरवस्थानिवेदनपरिसमाप्तिः ।

तथा मूर्च्छानिमीलितश्च तामेवानुध्यायन्निव ससंभ्रमप्रतिपन्नशरीरेण केयूरकेण संभावितताल्वृन्तया च पत्रलेखयानुभाव्यार्थसज्जया च नियत्या संज्ञां लम्भितश्चन्द्रापीडः स्वकृतपीडापराधेन भीतमिव लज्जितमिव विलक्षमिव निभृतस्थितं केयूरकमन्तर्बाष्पोपरुध्यमानकण्ठः कथमपि स्खलिताक्षरं प्रत्युवाच--'केयूरक येन प्रकारेणैवमेकान्तनिष्ठुरहृदयमात्मन्यनुत्पन्नरागमेव मां संभाव्य

इदानीं त्विति । सांप्रतं तु तवार्थः प्रयोजनं तस्मिन् । निमित्ते सप्तमी । तथाच त्वन्निमित्तं कादम्बरी महान्तमायासं श्रममनुभवति । करोतीत्यर्थः । **किं करोमीति** । प्रतिदिवसं प्रतिवासरं दृश्यमानोऽपि साक्षात्क्रियमाणोऽपि तामीदृशीं पूर्वव्यावर्णितामवस्थां दशां यन्न पश्यसि यन्न जानासि तत्कथय ब्रूहि । किं करोमि किं कुर्वे । कथं कथ्यते केन प्रकारेण कथ्यते भण्यते । कया वृत्त्या आरभट्यादिकया वर्ण्यते वर्णनाविषयीक्रियते कीदृशेनोपायेन सामादिना प्रदर्श्यते दृग्विषयीक्रियते । केन प्रकारेणावेद्यते निवेद्यते । कया युक्त्या युक्तिरुपपत्तिस्तया केन हेतुना वा प्रकाश्यते प्रकटीक्रियते । कतमया कतरया वेदनया ज्ञानेनोपनीयते प्राप्यते । निश्चयकोटिमिति शेषः । यदा तु 'उपमीयते' इति पाठस्तदा कतमया वेदनया पीडयोपमां प्राप्यत इत्यर्थः । इति पूर्वोक्तप्रकारेणावेदयन्तं कथयन्तम् । **केयूरकमिति** । नेत्रयोरामीलनान्मुद्रणाद्दत्तसंज्ञेव दत्ता संज्ञा संकेतो यया सा विहितचेष्टेव । कयेव । कादम्बर्या व्यथाश्रवणमाकर्णनं तस्माद्वेदनायाः संभवस्तस्मिन्नुकम्पा दया तयेव चन्द्रापीडमाक्रमन्ती मूर्च्छा न्यवारयन्न्यषेधयत् । इतीति किम् । यत्त्वया प्रोक्तं तद्भवत्वस्तु । संप्रतीदानीमतः परं श्रोतुमाकर्णयितुं न शक्नोमि न समर्थो भवामि । न तु पुनरवस्थाया निवेदनं तस्य वेदनायाः परिसमाप्तिः पर्यन्तः ।

तथेति । तेन प्रकारेण मूर्च्छानिमीलितो मौढ्येन मुद्रितश्च तामेव कादम्बरीमेवानुध्यायन्स्मरन्निव सह संभ्रमेण त्वरया प्रतिपन्नं विधृतं स्वीकृतं शरीरं यस्यैवंभूतेन केयूरकेण संभावितम् संगृहीतं तालवृन्तं व्यजनं ययैवंभूतया पत्रलेखयानुभाव्यो योऽर्थस्तत्र सज्जया समर्थया च नियत्याऽदृष्टविशेषेण संज्ञां चेतनां लम्भितः प्रापितश्चन्द्रापीडः स्वयं कृता या पीडा तस्या अपराध आगस्तेन भीतमिव त्रस्तमिव,

देव्या कादम्बर्या दूरीकृतपुनर्मदागमनसंभावनया न त्वमागमनाया-दिष्टः, न संदिष्टं वा किंचिन्महाश्वेतया समुपहृतानुबन्धया मदलेखया वा त्वन्मुखेन नोपालब्धोऽस्मि। तथा मयि पत्रलेखया सर्वमाख्यातम्, तदभिज्ञाततया महानुभावत्वादुदारतया समानशीलतया दक्षिणतया चैकान्तपेशलतया च स्वभावस्यात्मानमात्मना न कलयति देवी कादम्बरी। चन्द्रमूर्तेरालोकेनैव निश्चेतनस्य चन्द्रकान्ताख्यस्य पाषाणखण्डस्यार्द्रभावोपगमनमेवायत्तम्, न पुनस्तत्कराकर्षणम्। नितरां पक्षपातिनोऽपि च मधुकरस्याभिगमनमेवाधीनम्। मकरन्द-लाभे तु कलिकाश्रयिणी जृम्भैव प्रभवति। दिवससंतापक्लान्तेन चोन्मुखता कुमुदाकरेण करणीया विकाशयति पुनस्तम्। ज्योत्स्ना-भिरामा रजन्येव निर्भरमन्तःसरसतायां सत्यामपि मधुमासलक्ष्मी-परिग्रहाद्विना पल्लवानुरागदर्शनस्य कृते किं करोतु पादपः। तत्र

लज्जितमिव त्रपितमिव, विलक्षमिव वीक्ष्यापन्नमिव, निभृतस्थितं निश्चलस्थितं केयूरकमन्तर्बाष्पेणोपरुध्यमानः कण्ठो यस्यैवंविधश्चन्द्रापीडः कथमपि महता कष्टेन स्खलिताक्षरं यथा स्यात्तथा प्रत्युवाच प्रोचिवान्। किमुवाचेत्याह—**केयूरक इति**। हे केयूरक, येन प्रकारेणैवमेकान्तेन निष्ठुरं कठिनं हृदयं चेतो यस्यैवंविधमात्मनि कादम्बरीविषयेऽनुत्पन्नरागमजनितस्नेहं मामेव संभाव्य ज्ञात्वा देव्या कादम्बर्या दूरीकृतः पुनर्द्वितीयवारं यन्मदागमनं तस्य संभावना तया त्वमागमनाय नादिष्टो न कथितः। तथा महाश्वेतया किंचिन्न संदिष्टं न कथितम्। कीदृशया। समुपहृतो दूरीकृतोऽनुबन्धोऽत्याग्रहो यया सैवंविधया। मदलेखया वा त्वन्मुखेन त्वदाननेन नोपालब्धोऽस्मि नोपालम्भं प्रापितोऽस्मि। **तथा मयीति**। मद्विषयकं सर्वं पत्र-लेखयाख्यातं कथितम्। **तदिति**। तत्पूर्वोक्तमभिज्ञा (जा) ततया कुलीनतया महा-ननुभावो माहात्म्यं यस्यास्तस्या भावस्तत्त्वं तस्मादुदारतया रूपानुगुणत्वेन समानं शीलं स्वभावो यस्यास्तस्या भावस्तत्ता तया दक्षिणतया सरलतया। 'दक्षिणे सर-लोदारौ इत्यमरः। स्वभावस्य प्रकृतेरेकान्तेन निश्चयेन पेशलतया हृद्यतया। अत्रा-त्मशब्दः स्वरूपवाची। तेनात्मानं स्वरूपं देवी कादम्बर्यात्मना स्वेनैव न कलयति न जानाति। यादृशं भङ्ग्या भणितं वेश्ययावबुध्यते, न तादृशं कुलस्त्रियेति भावः। तदेव दर्शयन्पुनः प्रकारान्तरेणात्मदोषं दूरीकुर्वन्नाह—**चन्द्रेति**। चन्द्रमूर्तेः शशाङ्क-बिम्बस्यालोकेने(नै)व प्रकाशेने(नै)व निश्चेत [न]स्य चेतनारहितस्य चन्द्रकान्ताख्य-स्य शशिमणयभिधानस्य पाषाणखण्डस्य दृषच्छकलस्यार्द्रभावस्य द्रवीभावस्योपग-मनं प्रापणं [एव] आयत्तं स्वाधीनम्। न पुनस्तत्कराकर्षणं तत्किरणाक्षेपः। **नित-रामिति**। नितरामत्यर्थं पक्षपातिनोऽपि वाजगामिनोऽपि, पक्षे पक्ष-पातिनोऽपि पक्षकारिणोऽपि, मधुकरस्य भ्रमरस्याभिगमनमेव संमुखागमनमेवाधीन-

देव्याः कादम्बर्या एवाज्ञापराधिनी, ययाधरस्पन्दितमात्रप्रतीक्षे पुरःस्थायिनि दासजने निष्करुणतयात्मानमव्यापारयन्त्या सुखप्रतिपन्थिनी दुःखदानैकनिपुणा परहृदयपीडानपेक्षिणी लज्जापेक्षिता न जीवितसंदेहदायिनी देव्याः समाचष्ट। अथवा देव्याः परिजनस्यापि कोऽयमेवंविधो व्यामोहः, यदनिच्छन्त्यपि बलादसौ न व्यापारिता। कीदृशी चरणतलप्रतिबद्धस्य दासजनस्योपरि लज्जा, कीदृशं वा गौरवम्, को वानुरोधः, अविश्वस्तचित्तता वा केयमीदृशी, यदेवमात्मनः शिरीषपुष्पकोमलस्येयमतिदारुणा पीडाङ्गीकृता, न कृतार्थितो मे मनोरथः। अथवा क्रमागतमन्तर्धानं वामलोचनानां विशेषतोऽपरित्यक्तनिःशेषबालभावानामनतिप्रबुद्धमुग्ध-

---

मायत्तम्। तु पुनरर्थे। मकरन्दलाभे तु मकरन्दप्राप्तौ तु कलिका कोरकस्तामाश्रयतीत्येवंशीला। जृम्भैव जृम्भणमेव प्रभवति समर्थीभवति। **दिवसेति**। दिवसस्य वासरस्य संतापस्तप्तिस्तेन क्लान्तेन पीडितेन कुमुदाकरेण कैरवसमुदायेनोन्मुखता संमुखता करणीया कार्या तं पुनर्विकाशयति विकस्वरतां नयति। ज्योत्स्ना कौमुदी तयाभिरामा मनोहरा रजन्येव निशेव। **निर्भरमिति**। निर्भरं यथा स्यात्तथान्तर्मध्ये सरसस्य भावः सरसता तस्यां सत्यामपि मधुमासो वसन्तस्तस्य लक्ष्मीः श्रीस्तस्याः परिग्रहः स्वीकारस्तस्माद्विना पल्लवस्य किसलयस्यानुरागदर्शनं तस्य कृते तदर्थं पादपो वृक्षः किं करोतु। किं कुर्यादित्यर्थः। **तत्रेति**। तस्मिन्प्रदेशे देव्याः कादम्बर्या आज्ञा एव निदेश एवापराधिन्यपराधवती, ययाज्ञया केवलमधरस्पन्दितमधरस्पन्दितमात्रं तस्मिन्प्रतीक्षा विलम्बो यस्य स तस्मिन्। ओष्ठस्फुरणानन्तरमेव कार्यकारिणीत्यर्थः। पुरः स्थायिन्यग्रे दासजने सेवकजने निष्करुणतया निर्दयतयात्मानं स्वमव्यापारयन्त्यानियोजयन्त्या सुखस्य सौख्यस्य प्रतिपन्थिनी वैरिणी दुःखस्यासुखस्य दानं वितरणं तत्रैकाद्वितीया निपुणाभिज्ञा परहृदयस्यान्यचित्तस्य पीडा वेदना तामनपेक्षतेऽसमीहत इत्येवंशीला लज्जा त्रपापेक्षितेहितेयं जीवितसंदेहदायिनी प्राणितसंदेहकारिणीति देव्याः कादम्बर्या न समाचष्ट नाख्यातवती। अथवेति प्रकारान्तरे। देव्याः कादम्बर्या अस्य परिजनस्यापि परिच्छदस्यापि कोऽयमनिर्वचनीयस्वरूप एवंविध एतादृशो व्यामोहो मूढता यदसौ कादम्बर्यानिच्छन्त्यप्यनभिलषन्त्यपि बलाद्धठान्न व्यापारिता न प्रेरिता। **कीदृशीति**। चरणतले प्रतिबद्धस्य लग्नस्य दासजनस्य सेवकलोकस्योपर्युपरिष्टात्कीदृशी लज्जा त्रपा। वाथवा गौरवं गुरुता कीदृशम्। को वानुरोधः प्रतिबन्धः। केयमीदृश्यविश्वस्तचित्तताविश्रम्भमनस्कता। यस्माद्धेतोरेवममुना प्रकारेणात्मनः स्वस्य शिरीषपुष्पवत्कोमलस्य सुकुमारस्येयमतिदारुणात्युग्रा पीडाङ्गीकृता स्वीकृता। मे मम मनोरथोऽभिलाषो न कृतार्थितो न सफलीकृतः। अथवेति युक्त्यन्तरे। वामलोचनानां मन-

मनसि शयानां कन्यकानां लज्जा न पारिता नामास्मिञ्जने स्वयं परित्यक्तुं देव्या। मदलेखा तु द्वितीयं हृदयमस्याः। तया किमेवं कामेन दुरात्मनायास्यमानं देवीशरीरमुपेक्षितम्। किमिति तत्रस्थस्यैव मे कर्णे नावेदितम्। अधुना श्रुत्वापि दिवसक्रमगम्येऽध्वनि किं करोमि। मलयानिलाहतलताकुसुमपातस्याप्यसहं देवीशरीरम्। वज्रसारकठिनहृदयैरस्मद्विधैरपि दुर्विषहाः स्मरेषवः। न ज्ञायते निमेषमात्रेणैव किं वा भवतीति प्रायेण च देव्याप्यनुभवनीय एवायमर्थः। यथा चास्य दुःखैकदानव्यसनिनो दुर्घटघटनापण्डितस्य यत्किंचनकारिणो निष्कारणकुपितस्य हतविधेः सर्वतो विसंस्थुलं समारम्भं पश्यामि, तथा जानामि नैतावता स्थास्यतीति। अन्यथा क्व निष्प्रयोजनाश्वमुखानुसरणेनामानुषभूमिगमनम्, क्व च तत्र तृषितस्याच्छोददर्शनम्, क्व तत्र तीरे विश्रान्तस्यामानुषगीतध्वनेरा-

---

स्विनीनामन्तर्धानं तिरोधानं क्रमागतं परिपाट्या समागतमेव। विशेषतो विशेषादेवापरित्यक्तो निःशेषो बालभावो याभिस्तासाम्। **अनतीति**। नातिप्रबुद्धं यन्मुग्धं मनस्तस्मिञ्शयानां स्थितानां कन्यकानां कुमारीणाम्। नामेति कोमलामन्त्रणे। यद्यस्मिञ्जने चन्द्रापीडलक्षणे स्वयमात्मना देव्या कादम्बर्या लज्जा त्रपा परित्यक्तुं विमोक्तुं न पारिता न शक्ता, तर्ह्यस्या देव्या मदलेखा तु द्वितीयं हृदयम्। तया मदलेखया किमेवं पूर्वोक्तप्रकारेण दुरात्मना कामेनायास्यमानं पीड्यमानं देवीशरीरमुपेक्षितमुपेक्षाविषयीकृतम्। **अधुनेति**। सांप्रतं श्रुत्वाप्याकर्ण्यापि दिवसानां वासराणां क्रमः परिपाटी तेन गम्ये गन्तुं योग्येऽध्वनि मार्गेऽहं किं करोमि। न किमपि कर्तुं समर्थ इत्यर्थः। **मलयेति**। मलयानिलेन मलयवायुनाहतं ताडितं यल्लताकुसुमं तस्य यः पातः पतनं तस्याप्यसहं सोढुमसमर्थं देव्याः कादम्बर्याः शरीरं देहम्। लता पुष्पपातेनापि ग्लानिं प्राप्नोतीत्यर्थः। **वज्रेति**। वज्रं हीरकस्तस्य सारो मध्यं तद्वत्कठिनं हृदयं चेतो येषामेवंविधैरपि स्मरेषवः कंदर्पबाणा दुर्विषहा दुःखेन सोढुं शक्या इति न ज्ञायेत नावबुध्यते। इतीति किम्। निमेषमात्रेणैव निमीलनमात्रेणैव किं भवति किं जायते। **प्रायेणेति**। प्रायेण बाहुल्येन देव्यापि कादम्बर्याप्ययमर्थो दुःखलक्षणोऽनुभवनीय एवानुभवविषयीकरणीय एव। **यथा चेति**। दुःखस्यैकमद्वितीयं दानं तत्र व्यसनमासक्तिर्विद्यते यस्य स तस्य। **दुर्घटेति**। दुःखेन घटितुं योग्या दुर्घटा। एवंविधा या घटना पदार्थानामन्योन्यं सम्बन्धस्तत्र पण्डितस्य विबुधस्य। यत्किंचन यदेव तदेव करोतीत्येवंशीलस्य यत्किंचनकारिणः। निष्कारणं निर्निमित्तं कुपितस्य कोपं प्राप्तस्यास्य हतविधेर्दुष्टविधातुर्यथा सर्वतः सर्वत्र विसंस्थुलं विसदृशं समारम्भं निर्माणं पश्याम्यवलोकयामि। **तथेति**। तेन प्रकारेणेति जानाम्याकल-

कर्णनम्, क्व ताज्जिज्ञासागतस्य महाश्वेतावलोकनम्, क्व तत्र तरलिकया सह तवाभिगमनेन मद्गमनप्रस्तावः, क्व महाश्वेतया सह हेमकूटगमनम्. क्व तत्र देवीवदनदर्शनम्, क्व रागोत्पत्तिरस्मिञ्जने देव्याः, क्व वापरिपूर्णमनोरथस्य मे पितुरलङ्घनीयागमनाज्ञा। तत्सुदूरमारोप्य पातिता वयं खल्वनेनाकार्यकारिणास्मत्कर्मबलनियोगदक्षेण दग्धवेधसा। तथापि देवीं संभावयितुं प्रयतामहे।' इत्यभिदधत्येव चन्द्रापीडे 'नितरामयमनेनैव कादम्बरीवृत्तान्तेन संतापितः तत्किमपरमहमेनमात्मतेजसा संतापयामि' इत्युत्पन्नदय इव भगवांस्तिग्मदीधितिः संजहार करसहस्रम्। क्रमेणैव चन्द्रमस्यपि भगवति सकलभुवनैकातपत्रे सुधारजतकलशे उदयगिरिशिखरमारूढे प्रौढे प्रदोषसमये चन्द्रापीडस्त-

---

यामि। इतीति किम्। नेति। एतावतैतावत्कालं न स्थास्यति नावस्थानं करिष्यति। अन्यथेत्युक्तविपर्यये। निष्प्रयोजनेन निष्कारणेनाश्वमुखाः किंनरास्तेषामनुसरणेनानुगमनेनामानुषभूमिगमनं मनुष्यरहितक्षितौ यानम्। क्व केति महदन्तरे। अ(त)त्रामानुषभूमौ तृषितस्य पिपासितस्याच्छोददर्शनं क्व। तत्रेति। तत्राच्छोदनाम्नस्तीरे विश्रान्तस्य गृहीतविश्रामस्यामानुषाः किंनरास्तेषां गीतध्वनेर्गेयशब्दस्याकर्णनं श्रवणं क्व। तस्य ज्ञातुमिच्छा तज्जिज्ञासा तयागतस्य प्राप्तस्य महाश्वेताया अवलोकनं निरीक्षणं क्व। तत्र महाश्वेतावलोकनस्थले तरलिकया सह तव केयूरकस्याभिगमनेनागमनेन मद्गमनप्रस्तावो मदीययानावसरः क्व। महाश्वेतया सह सार्धं हेमकूटगमनं क्व। तत्र हेमकूटे देवीवदनदर्शनं कादम्बरीमुखावलोकनं क्व। अस्मिन् (जने) देव्याः कादम्बर्या रागोत्पत्तिः क्व। अपरिपूर्णमनोरथस्यापरिपूर्णाभिलाषस्य मे मम पितुर्जनकस्यालङ्घनीयानतिक्रमणीयागमनाज्ञागमननियोगः क्व। तदिति। तत्तस्माद्धेतोः सुदूरमत्युच्चैरारोप्यारोहणं कारयित्वा अनेनाकार्यकारिणाकृत्यकारिणास्माकं यत्कर्म बलं तस्य नियोगो व्यापारणं तत्र दक्षेण विबुधेन दग्धवेधसा ज्वलितधात्रा। खलु निश्चयेन। वयं पातिता अधःस्थलं प्रापिताः। तथापीति। तथाप्येवंसत्यपि देवीं संभावयितुमाश्वासयितुं प्रयतामहे प्रयत्नं कुर्महे। इत्यभिदधत्येवेति कथयत्येव चन्द्रापीडे नितरामतिशयेनायं चन्द्रापीडोऽनेन पूर्वोक्तेनैव कादम्बरीवृत्तान्तेन कुमारिकोदन्तेन संतापितः संतापं प्रापितः। तत्किमेनं चन्द्रापीडमात्मतेजसा स्वकीयवर्चसापरं संतापयामि। इत्युत्पन्नदय इवेति संजातकृप इव भगवांस्तिग्मदीधितिः सूर्यः करसहस्रं संजहारापससार। क्रमेणैवेति भगवति माहात्म्यवति सकलभुवनस्य समस्तलोकस्यैकमद्वितीयमातपत्रं छत्रं तस्मिन्सुधाया रजतकलशे रौप्यकुम्भे उदयगिरिरुदयाचलस्तस्य शिखरं सानुमारुढ आरोहिते सति प्रौढे महति प्रदोषसमये यामिनीमुखक्षणे चन्द्रापीडस्त-

स्मिन्नेव वल्लभोद्याने, चन्द्रमणिशिलातले विमुच्याङ्गानि चरणसंवाहनोपसृतं केयूरकमवादीत्—'केयूरक, किमाकलयसि। यावद्वयं परापतामस्तावत्प्राणान्धारयिष्यति देवी कादम्बरी। पारयिष्यति वा तां विनोदयितुं मदलेखा। आगमिष्यति वा पुनस्तत्समाश्वासनाय महाश्वेता। मत्परिचयो द्वेजिता प्रतिपत्स्यते वा शरीरस्थितये तयोरभ्यर्थनाम्। द्रक्ष्यामि वा पुनस्तस्याः स्मेरसृक्कोपान्तमालोलतारकमुत्त्रस्तहरिणशावकायतेक्षणं मुखम्' इति। स तु व्यज्ञपयत्—'देव, धैर्यमवलम्ब्य गमनाय यत्नः क्रियताम्। तिष्ठतु तावदासन्नवर्ती सखीजनः परिजनो वा। तस्या हि त्वदालोकनेच्छैव स्वेच्छया निमेषितुमपि न ददाति। समागमाशयैवावष्टब्धं हृदयम्। श्वसितमेव सुखे वहितम्। रोमाञ्च एव क्षणमपि शरीरं न मुञ्चति। दिवानिशं बाष्प एव लोचनपथ-

मुखे

स्मिन्नेव पूर्वोक्त एव वल्लभोद्याने वल्लभाभिधाने वने। चन्द्रमणेश्चन्द्रकान्तरत्नस्य शिलातलेऽङ्गानि हस्तपादादीनि विमुच्य संस्थाप्य। एतेन गात्रस्यातिशैथिल्यं सूचितम्। चरणस्य संवाहनं मर्दनं तस्मिन्नुपसृतं समीपागतं केयूरकमवादीदब्रवीत्। हे केयूरक, किं त्वमाकलयस्याकलनां करोषि। [यावत्] यावता कालेन वयं परापतामस्तत्र गच्छामस्तावत्कालं देवी कादम्बरी प्राणानसून्धारयिष्यति प्राणधारणां करिष्यति। अथवा तां कादम्बरीं विनोदयितुं मदलेखा पारयिष्यति समर्था भविष्यति। वेति विकल्पार्थे। महाश्वेता पुनर्द्वितीयवारं तस्याः कादम्बर्याः समाश्वासनायाश्वासनां कर्तुमागमिष्यति यास्यति न वा। **मदिति**। मया सार्धं यः परिचयः परिचितिस्तेनोद्वेजिता उद्विग्ना तयोर्महाश्वेतामदलेखयोरभ्यर्थनां प्रार्थनां शरीरस्थितये देहधारणाय प्रतिपत्स्यते न वाङ्गीकरिष्यति न वा। अङ्गीकरिष्यतीत्यर्थः। **द्रक्ष्यामीति**। वेति पूर्ववत्। पुनर्द्वितीयवारं तस्याः कादम्बर्या मुखमाननं द्रक्ष्यामि दृग्विषयीकरिष्यामि वा। मुखं विशेषयन्नाह—**स्मेरेति**। स्मेरं विनिद्रं सृक्कणोरोष्ठप्रान्तयोरुपान्तं समीपं यस्मिन्। **आलोलेति**। आलोला चञ्चला तारका कनीनिका यस्मिंस्तथा। **उत्त्रस्तेति**। उत्त्रस्तश्चकितो यो हरिणशावको मृगशिशुस्तद्वदायते विस्तीर्णे अक्षिणी यस्मिंस्तत्तथा। **स त्विति**। स केयूरको व्यज्ञपयद्विज्ञप्तिमकरोत्। किं तदित्याह—**देवेति**। हे देव हे स्वामिन्, धैर्यं सत्त्वमवलम्ब्यावलम्बनीकृत्य गमनाय यानाय यत्न उद्यमः क्रियतां विधीयताम्। **तिष्ठत्विति**। तावदादावासन्नवर्ती समीपस्थायी सखीजन आलिवर्गः परिजनो वा परिच्छदो वा तिष्ठतु। अत्रावस्थानं करोत्वित्यर्थः। **तस्याहीति**। हि निश्चितम्। तस्याः कादम्बर्यास्त्वदालोकनेच्छैव त्वन्निरीक्षणवाञ्छैव स्वेच्छया स्वातन्त्र्येण निमेषितुमपि निमेषं कर्तुमपि न ददाति न दत्ते। सर्वदा निमेषरहितैव तिष्ठतीति भावः। समागमो मेलापकस्तस्याशा वाञ्छा तयैवावष्टब्धं

स्थायी । प्रजागर एव रात्रावपि दत्तदृष्टिः । अरतिरेव नैकाकिन्याः क्षाम्यत्यवस्थानम् । जीवितमेव कण्ठस्थानान्नापसरति ' एवं वदन्तं तमादिदेश विश्रान्तये केयूरकम् । आत्मनापि गमनचिन्तां प्राविशत् । यदि तावदकथयित्वानभिपत्य चरणयोरनाघ्रातः शिरस्यगृहीताशीः सहसानुत्संकलित इव तातेनाम्बयोक्तमपक्रम्य गच्छामि । ततो गतस्यापि मम कुतः सुखम्, कुतः श्रेयः, कुतो वोच्चफलावाप्तिः, कीदृशी वा हृदयनिर्वृतिः। अथवा तिष्ठतु तावदियमुत्तरकालागामिनी चिन्ता। अपक्रम्य गत एव कथमहं यत्तातेन स्वभुजादवारोप्य मय्येव राज्यभार आरोपितः, तदनाख्याय पदमपि निर्याते मय्यवश्यमष्टाभ्यो दिग्भ्यो

स्तब्धतां प्राप्तं हृदयं चेतः । अन्यथा स्फुटितं स्यादिति भावः । **श्वसितमिति** । मुख आनने श्वसितमुच्छ्वसितमेव वि(व)हितं प्रवाहरूपतया चलितम् । **रोमाञ्चेति** रोमाञ्च एव रोमोद्गम एव क्षणमपि क्षणमात्रमपि शरीरं देहं न मुञ्चति न त्यजति । सर्वदा तस्या रोमाञ्चलक्षणः सात्त्विकभाव एव तिष्ठतीति भावः । **दिवेति** । दिवानिशमहर्निशं बाष्प एव लोचनपथस्थायी नेत्रमार्गस्थायी । अहोरात्रं रुदनमेव करोतीति भावः । **प्रजागर इति** । प्रजागर एव जागरणमेव रात्रावपि निशायामपि दत्तदृष्टिर्न्यस्तदृग्वर्तते । रात्रावपि निद्रां न गच्छतीति भावः । **अरतिरिति** । एकाकिन्या अद्वितीयाया अवस्थानमरतिरेवाधृतिरेव न क्षाम्यति न सहते । अरतिरेवैकाकिनी न मुञ्चतीति भावः । **जीवितमेवेति** । कण्ठस्थानान्निगरणस्थलाज्जीवितमेव प्राणितमेव नापसरति न दूरीभवति । प्राणाः कण्ठगता एव वर्तन्त इति भावः । एवं वदन्तं जल्पन्तं तं केयूरकं विश्रान्तये विश्रामायादिदेशादेशं दत्तवान् । आत्मनापि स्वेनापि गमनचिन्तां प्राविशत्प्रवेशं कृतवान् । तच्चिन्तां प्रदर्शयन्नाह—यदीति चेदर्थे । तावदादावकथयित्वानापृच्छ्य चरणयोरनभिपत्यापतित्वा प्रणाममकृत्वा शिरस्युत्तमाङ्गेऽनाघ्रातोऽचुम्बितोऽगृहीताशीरनात्ताशीर्वादः सहसैकपदेऽनुत्संकलित इव स्वेच्छाप्रवृत्तपुरुष इव तातेन पित्रा, अम्बया जनन्या, उक्तं प्रतिपादितमपक्रम्योल्लङ्घ्य गच्छामि व्रजामि । ततो हेत्वर्थे । तस्माद्गतस्यापि मम कुतः सुखं सौख्यम्, कुतः श्रेयः कल्याणम्, कुतो वोच्चं महद्यत्फलं साध्यं तस्यावाप्तिः प्राप्तिः । कीदृशी हृदयस्य चित्तस्य निर्वृतिः संतुष्टिः । अथवेति पक्षान्तरे । उत्तरकाल आयतिस्तत्रागामिन्यागमनशीला येयं मानसिकप्रत्यक्षा चिन्तार्तिस्तावत्साम्प्रतं तिष्ठत्वास्ताम् । **अपक्रम्येति** । अपक्रम्य व्यावृत्य गत एव कथमहं तातेन पित्रा स्वभुजात्स्वकीयबाहोरवारोप्योत्तार्य मय्येव मद्विषय एव राज्यभार आधिपत्यवीवध आरोपितो न्यस्तः, तत्तस्माद्धेतोरनाख्यायानापृच्छ्य पदमपि क्रममात्रमपि मयि निर्याते निर्गते सत्यवश्यं निश्चितमष्टाभ्यः पूर्वादिदिग्भ्यो राजभिर्दूतैरनुधावितव्यं मत्पृष्ठे त्वरितगत्या समेतव्यम् । एतेन राज्ञां स्वामिकार्योद्यतत्वं सूचितम् ।

राजभिरनुधावितव्यम् । तिष्ठन्तु तावत्सेवापरा राजानः । सुखपरिभुक्ताः प्रजा अपि तातस्नेहात्परित्यक्तपुत्रदाराः पृष्ठतो लगन्तीति मे चेतसि । अपि च तातस्यापि कोऽपरोऽस्ति, यस्मिन्मदीयं स्नेहं संक्रमय्य मय्यपक्रान्ते यातु किमनेन गतेनागतेन वेत्यविनयकोपितोऽवष्टम्भं कृत्वा स्थास्यति । कस्य चापरस्य मुखमालोकयन्ती सुखायमानहृदया मत्प्रत्यानयनाय कृतार्तप्रलापा न तातमेवाकुलीकरोत्यम्बा । ताते च पृष्ठतो लग्नेऽष्टादशद्वीपमालिनी मेदिन्येव लग्ना भवतीति । तदा मया क्व गतम्, क्व स्थितम्, क्व विश्रान्तम्, क्व यातम्, क्व भुक्तम्, क्वापसृतम्, क्वात्मा मया गोपायितव्यः, समासादितेन चात्र कथं मया वदनं दर्शयितव्यम्, पृष्टेन वा किमुत्तरं दातव्यम् । अथापि कथंचिद्दैवनियोगान्निःसृतोऽस्मि, तथाप्यनायासनीयं तात-

---

तिष्ठन्त्विति । सेवापराः सपर्यायां तत्परा राजानो भूभुजस्तावत्सांप्रतं तिष्ठन्त्वास्ताम् । **सुखेति** । सुखेन प्रतिबन्धकाभावेन परिभुक्तमुपभोगादिकं यासां ता एवंविधाः प्रजा अपि प्रकृतयोऽपि तातस्नेहात्पितुः प्रीतेः परित्यक्तपुत्रदारा उज्झितसुतयोषितः सत्यः पृष्ठतः पृष्ठं लगन्ति लगिष्यन्ति । भविष्यदर्थे वर्तमाना । इति मे मम चेतसि मनसि वर्तत इति शेषः । अपिचेति विचारान्तरे । **तातस्यापीति** । तातस्यापि मत्पितुरपि कोऽपरोऽन्योऽस्ति । यस्मिन्मद्भिन्ने जने मदीयं मद्विषयकं स्नेहं प्रीतिं संक्रमय्य संक्रमणं कृत्वा मय्यपक्रान्ते गते सति यातु व्रजतु । अनेन गतेन, आगतेन वा, किमित्यविनयेन पितृनियोगीकरणलक्षणेन कोपितः क्रोधं प्रापितोऽवष्टम्भं स्थैर्यं कृत्वा स्थास्यत्यवस्थानं करिष्यति । **कस्य चेति** । च पुनरर्थे । अपरस्य मद्भिन्नस्य कस्यचिदनिर्दिष्टनाम्नो मुखं वदनमालोकयन्ती पश्यन्ती सुखं करोतीति सुखायते, सुखायत इति सुखायमानं हृदयं चेतो यस्याः सा तथा मम प्रत्यानयनं पश्चादानयनं तदर्थं कृतो विहित आर्तः प्रलापः पीडितरोदनं यया सैवंविधाम्बा माता न तातमेव न पितरमेवाकुलीकरोति । भविष्यदर्थे वर्तमाना । व्याकुलीकरिष्यतीत्यर्थः । **ताते चेति** । ताते पितरि । पृष्ठत इति सार्वविभक्तिकस्तस् । पृष्ठे लग्ने प्राप्ते सत्यष्टादशसंख्याकानि द्वीपान्यन्तरीपानि मलति धारयतीत्येवंशीला मालिनी मेदिन्येव वसुधेव लग्ना भवतीति । पृष्ठसंचारिणी भविष्यतीत्यर्थः । तदैतस्मिन्काले मया क्व गतं क्व गम्यम्, क्व स्थितं क्व स्थातव्यम्, क्व विश्रान्तं क्व विश्रमितव्यम्, क्व यातं क्व गन्तव्यम्, क्व भुक्तं क्व भोजनं कर्तव्यम्, क्वापसृतं क्वापसरितव्यम्, मयात्मा क्व गोपायितव्यो रक्षितव्यः । समासादितेन च पुनः प्राप्तेन च मया कथं वदनं दर्शयितव्यमन्येभ्यः प्रकाशयितव्यम् । पृष्टेन वा प्रश्नविषयीकृतेन मया किमुत्तरं प्रतिवचो दातव्यं प्रदेयम् । **अथापीति** । अथेति विचारणान्तरे । कथंचिदपि महता कष्टेनापि दैवनियोगाद्विधिनिर्देशान्निःसृतोऽस्मि निर्गतोऽस्मि । अथापि निःसृतेनाप्येवमनायासनीयमखेदनीयं तातं पितरं महीयस्य-

मेवं महीयस्यायासे तातप्रसादादृष्टदुःखामम्बां वा निजापक्रमणशोकार्णवे पातयता किं कृतं भवत्यपुण्यवता । अपि च सुबहुदिवसप्रवासोपतप्तः स्कन्धावारोऽपि मेऽद्यापि न परापतति, तेनापरसंविधानादर्धपथादेव निवृत्य पुनः प्रधावितव्यम् । अथावेद्य तातस्याम्बायाश्च ताभ्यां च विसर्जितः संविधानेन गच्छामि, तत्रापि किमिति कथयामि । मम स्नेहदुःखिता गन्धर्वराजपुत्री कादम्बरी मामुद्दिश्य मकरकेतुनायास्यमाना दुःखं तिष्ठतीति । किं वा बलवान्मे तस्यामनुरागः । न तया विनाहं प्राणान्संधारयामीति । किं तस्या मम च द्वयोरपि जीवितनिबन्धनहेतुभूतया महाश्वेतया तत्परिणयनाय मे संदिष्टमिति । किं वा तद्दुःखमपारयन्सोढुमयं केयूरकस्तद्भक्त्या मामानेतुमागत इति । अपरोऽपि वा कश्चिद्व्यपदेशो न शक्यत एव पुनर्गमनाय कर्तुम् । संप्रत्येव समधिकाद्वर्षत्रयात्प्रसाध्य वसुधां प्रत्यागतोऽस्मि । अद्यापि साधनमेव न परापतति । अकथयित्वा च गमनकारणं कथमात्मानं मोचयामि । कथं

त्यन्तदीर्घ आयासे प्रयासे तातप्रसादात्पितुरनुग्रहादृष्टदुःखामनवलोकितकृच्छ्रामम्बां मातरं वा निजस्य स्वस्यापक्रमणं निर्गमनं तस्माद्यः शोकः शुक्स एवार्णवः समुद्रस्तस्मिन्पातयताक्षिपयतापुण्यवता पापिना मया किं कृतं भवति किमाचरितं स्यात् । **अपि चेति** । अपिच युक्त्यन्तरे । सुबहवश्च ते दिवसाश्च सुबहुदिवसास्तान्यावत्प्रवासो देशान्तरे स्थितिस्तेनोपतप्तो व्याकुलीकृत एतादृशो मे मम स्कन्धावारोऽपि सैन्यनिवेशोऽप्यद्यापीदानीमपि न परापतति नागच्छति । तेन हेतुनार्धपथादर्धमार्गान्निवृत्त्य व्याघुट्यापरसंविधानादपरसैन्यग्रहणाद्धेतोः पुनः कालान्तरे मया प्रधावितव्यम् । त्वरितगत्या गन्तव्यमिति भावः । अथेति विचारान्तरे । तातस्य पितुः, अम्बायाश्च मातुः, आवेद्य निवेद्य ताभ्यां च मातृपितृभ्यां विसर्जितो गमनाय दत्ताज्ञः संविधानेनोत्तमप्रकारेण गच्छामि व्रजामि । **तत्रापीति** । तत्राप्यावेदने । किं किमिति कथयामीति ब्रवीमि। इतिवाच्यमाह—**ममेति** । मम स्नेहेन मत्प्रीत्या दुःखिता दुःखं प्राप्ता गन्धर्वराजपुत्री देवगायनतृपाङ्गजा [कादम्बरी] मां चन्द्रापीडमुद्दिश्याश्रित्य मकरकेतुना कंदर्पेणायास्यमाना खेदं प्राप्यमाणा दुःखं यथा स्यात्तथा तिष्ठति निषीदति । 'किंवा बलवान्' इत्यारभ्य महाश्वेतया [त]त्परिणयनाय मे संदिष्टम्, इत्यन्तं स्पष्टम् । **किंवेति** । किंवा इति कथयामीति पूर्वेण सम्बन्धः । इति किम् । तद्दुःखं कादम्बर्या दुःखं सोढुं तितिक्षितुमपारयन्नशक्नुवन् । अयं प्रत्यक्षः केयूरकस्तस्या गन्धर्वपुत्र्या भक्त्यान्तरस्नेहेन मां चन्द्रापीडमानेतुं तत्र प्रापयितुमागतः । समायातः । **अपरोऽपीति** । अपरोऽप्येतद्भिन्नो-

वा मुञ्चतु तातोऽम्बा वा । तत्सुहृत्साध्येऽस्मिन्नर्थेऽनर्थपतितः किं करोम्येकाकी । वैशम्पायनोऽप्यसंनिहितः पार्श्वे मे । कं पृच्छामि । केन सह निरूपयामि । को मे समुपदिशतु । को वापरो मे निश्चयाधानं करोतु । कस्यापरस्य वा विवेकिनी प्रज्ञा । कस्य वान्यस्य श्रुतं श्रोतव्यम् । को वापरो वेत्ति वक्तुम् । कस्य वापरस्य मय्यसाधारणस्नेहः । केन वापरेण सह समानदुःखो भवामि । को वापरो मयि दुःखिते दुःखी, सुखिते सुखी। को वापरो रहस्यावेदनस्थानम् । कस्यापरस्योपरि कर्तव्यभारमवक्षिप्य निर्वृतात्मा तिष्ठामि । कस्य वापरस्य मत्कार्ये पर्याकुलता । को वापरो मया कोपितं तातमम्बां च परिबोध्य मामानेतुं समर्थः ' इत्येवं चिन्तयत एवास्य सा क्षपा दुःखदीर्घापि क्षयमगमत् ।

ऽपि कश्चिदन्यो व्यपदेशो मिषं पुनर्गमनाय कर्तुं न शक्यत एव न पार्यत एव । **संप्रत्येति** । सांप्रतमेव समधिकात्किंचिदधिकवर्षत्रयात्संवत्सरत्रितयात् । हेत्वर्थे पञ्चमी । वसुधां पृथ्वीं प्रसाध्यात्मसात्कृत्वा प्रत्यागतः पश्चाद्व्यावृत्तोऽस्मि । अद्यापि सांप्रतमपि साधनमेव सैन्यमेव न परापतति न विश्रामं गृह्णाति । **अकथयित्वेति** । गमनकारणं यात्रानिदानमकथयित्वा चानिवेद्यात्मानं कथं केन प्रकारेण मोचयामि मोचनविषयीकरोमि । **कथमिति** । तातोऽम्बा माता वा कथं वा मुञ्चतु त्यजतु । मामिति शेषः । **तदिति** । तत्तस्मात्कारणात्सुहृत्साध्ये मित्रनिष्पाद्येऽस्मिन्नर्थेऽहमनर्थपतितः कष्टगतः सन्नेकाक्यद्वितीयः किं करोमि किं कुर्वे । वैशम्पायनोऽपि शुकनासपुत्रोपि [मे] मम पार्श्वेऽसंनिहितोऽनिकटवर्ती । अतः कं जनं पृच्छामि प्रश्नविषयीकरोमि । केन पुंसा सह निरूपयाम्यात्मस्वरूपं कथयामि । कः पुमान्मे मम समुपदिशतु कथयतु । को वापरोऽन्यो मे मम निश्चयाधानं निर्णयोत्पत्तिं करोतु सृजतु । कस्य [अ]परस्य जनस्य वा विवेकिनी विवेकवती प्रज्ञा प्रतिभा । अन्यस्य कस्य वा जनस्य श्रुतं शास्त्रं श्रोतव्यमाकर्णनीयम् । 'श्रुतं शास्त्रावधृतयोः' इत्यमरः । अपरः को वा पुमान्वक्तुं जल्पितुं वेत्ति जानाति । कस्य वापरस्य मय्यसाधारणस्नेहो निरुपमप्रीतिः । अपरेण केन सहाहं समानदुःखो भवामि । सदृशवेदनः स्यामित्यर्थः । अपरः को वा मयि दुःखिते दुःखी दुःखवान्, मयि सुखिते सुखी सुखवान्स्यात् । अपरः को वा रहस्यावेदनस्थानं गुह्यनिवेदनस्थलम् । कस्यापरस्य जनस्योपरि कर्तव्यभारं कृत्यविवि(वीव) धमवक्षिप्यारोप्य निर्वृतात्मा सुखितात्मा तिष्ठामि निषीदामि । अपरस्य कस्य वा पुंसो मत्कार्ये मत्कृत्ये पर्याकुलता व्याकुलता । अपरः को वा मया कोपितं क्रोधं प्रापितं तातमम्बां च परिबोध्य प्रतिबोध्य प्रतिबोधं दत्त्वा मामानेतुं समर्थः । **क्षपेति** । एवममुना प्रकारेणास्य चन्द्रापीडस्य चिन्तयत एव ध्यायत एव सा क्षपा रात्रिर्दुःखेन कृत्वा दीर्घाप्यायतापि क्षयं नाश-

प्रातरेव च किंवदन्ती शुश्राव, यथा किल दशपुरं यावत्परागतः स्कन्धावार इति । तां च श्रुत्वा समुच्छ्वसितचेताश्चकार चेतसि— 'अहो धन्योऽस्मि । अहो, विधेर्भगवतोऽनुग्राह्योऽस्मि । यस्य मेऽनुध्यानानन्तरमेव परागतो द्वितीयं हृदयं वैशम्पायनः' इति । प्रहर्षपरवशश्च प्रविशन्तमालोक्य दूरत एव कृतप्रणामं केयूरकमवादीत्— 'केयूरक, करतलवर्तिनीं सिद्धिमधुनावधारय । प्राप्तो वैशम्पायनः' इति । स तु तदाकर्ण्य गमनपरिलम्बकृतया चिन्तयान्तःशून्य एव 'भद्रकमापतितम्' महती हृदयनिर्वृतिर्देवस्य जाता' इत्यभिदधदेवोपसृत्योपविश्य पार्श्वे वैशम्पायनागमनालापमेवानुबध्य मुहूर्तमिव संज्ञोत्सारितसमस्तपरिजनं चन्द्रापीडं व्यज्ञपयत्—'देव, सर्वतो विस्फुरन्ती तडिदिव बलाहकोन्नाहम्, उपारूढश्यामिका मेघलेखेव सलिलागमनम्, उपदर्शितपाण्डुच्छविः प्राचीव चन्द्रोदयम्, परिमलग्राहिणी मलयानिलागतिरिव वसन्तमासावतारम्, समुच्छ्व

कृतप्रणामं

मगमज्जगाम ।

प्रातरिति । प्रातरेव प्रभात एव च । इतीति किंवदन्ती जनश्रुतिः शुश्राव श्रुतवान् । इतिद्योत्यमाह—**यथेति** । किलेति सत्ये । दशपुरं यावत्स्कन्धावारः सैन्यं परागतः समायातः । **तां चेति** । तां किंवदन्तीं श्रुत्वाकर्ण्य समुच्छ्वसितमुल्लसितं चेतः स्वान्तं यस्यैवंविधश्चेतसि चित्ते चकार कृतवान् । इतीति शेषः । तदेव दर्शयन्नाह—**अहो इति** । अहो इत्याश्चर्ये । अहं धन्यः कृतपुण्योऽस्मि । अहो इति पूर्ववत् । भगवतो माहात्म्यवतो विधेर्विधातुरनुग्राह्योऽनुग्रहविषयीकरणयोग्योऽस्मि । तन्निदानमाह—**यस्येति** । यस्य मे मम चन्द्रापीडस्यानुध्यानानन्तरमेवानुस्मरणानन्तरमेव द्वितीयं हृदयं वैशम्पायनो मन्त्रिपुत्रः परागतः समायातः । अमुना प्रकारेण प्रहर्षपरवशः प्रमोदपरतन्त्रः । च पुनरर्थे । प्रविशन्तं प्रवेशं कुर्वन्तं दूरत एव दविष्ठप्रदेशादेव कृतप्रणामं विहितनमस्कारं केयूरकमालोक्य निरीक्ष्येत्यवादीदब्रवीत् । इतिवाच्यमाह—**केयूरक इति** । हे केयूरक, अधुना सांप्रतं करतलवर्तिनीं हस्ततलगतां सिद्धिं कार्यनिष्पत्तिमवधारय जानीहि यतो वैशम्पायनः प्राप्तः समागतः । **स त्विति** । स केयूरकस्तत्पूर्वोक्तमाकर्ण्य निशम्य गमनस्य यात्रायाः परिलम्बो विलम्बस्तेन कृतयोत्पादितया चिन्तयार्त्यान्तःशून्य एव भद्रकं कल्याणमापतितं संजातम् । देवस्य भवतो महत्यत्यायता हृदयनिर्वृतिश्चित्तसंतुष्टिर्जाता । इत्यभिदधदेवेति कथयन्नेवोपसृत्योपसरणं कृत्वा पार्श्वेऽन्तिक उपविश्यास्थाय मुहूर्तमिव मुहूर्तमात्रं वैशम्पायनस्यागमनमर्थादभिमुखयानमालापं संलापमनुबध्यारभ्य-संज्ञयोत्सारितो दूरीकृतः समस्तपरिजनः समग्रसेवकजनो येनैवंभूतं चन्द्रापीडं व्यज्ञपयद्विज्ञप्तिविषयीचक्रे । **देव इति** । हे देव हे स्वामिन्, इयमवस्थैव निःसंशयं नि-

सितमकरध्वजा मधुमासलक्ष्मीरिव पल्लवोद्भेदम्, उल्लसितरागा पल्लवोद्गतिरिव कुसुमनिर्गमम्, विकसितकाशकुसुममञ्जरीव शरदारम्भम्, अवस्थैवेयमावेदयति निःसंशयं देवस्य गमनम्। अवश्यं च देवस्य देवीप्राप्त्या भवितव्यम्। केन कदा वावलोकितो ज्योत्स्नारहितश्चन्द्रमाः, कमलाकरो, वा मृणालिकया विना, उद्यानभागो वा लताशून्यः। अपि च न राजत एव सहकारकुसुममञ्जरीपरिग्रहमन्तरेण सर्वजनसुभगोऽपि कुसुममासः, असंभावितदानलेखालक्ष्मीकं वा वदनं यूथाधिपतेः। किंतु यावद्वैशम्पायनः परापतति, यावच्चैतेन सह गमनसंविधानं निरूपयति देवः, तावदवश्यं कालक्षेपेण भाव्यम्। यादृशी चाकालक्षमा देव्याः शरीरावस्था, तादृशी

रारेकं देवस्य भवतो गमनं यानमावेदयति कथयतीति दूरेणान्वयः। केवेत्यपेक्षायामाह—**सर्वत इति**। वलाहकस्य मेघस्योन्नाहमागमनं सर्वतोऽभितो विस्फुरन्ती देदीप्यमाना तडिदिव विद्युदिव। आवेदयतीत्यस्य सर्वत्र संबन्धः। तथा सलिलस्याम्भस आगमनमुपारूढा प्राप्ता श्यामिका यथैवंविधा मेघस्य लेखा पङ्क्तिरिव। तथा चन्द्रस्य शशिन उदयमुद्गमनमुपदर्शिता पाण्ड्वी छविः कान्तिर्यथैवंविधा प्राचीव पूर्वदिगिव। तथा वसन्तमासस्य मधुमासस्यावतारं प्रादुर्भावं परिमलमामोदं गृह्णातीत्येवंशीला मलयानिलस्य मलयाचलवायोरागतिरिवागमनमिव। तथा पल्लवस्य किसलयस्योद्भेदमुद्गमनं समुच्छ्वसितो वृद्धिं प्राप्तो मकरध्वजो मदनो यस्यामेतादृशी मधुमासलक्ष्मीरिव वसन्तमासश्रीरिव। तथा कुसुमस्य पुष्पस्य निर्गमनं(मं) निःसरणमुल्लसित उल्लासं प्राप्तो रागो रक्तता यस्यामेतादृशी पल्लवोद्गतिरिव किसलयोद्भेद इव। तथा शरदारम्भं घनात्ययप्रारम्भं विकसिता विनिद्रिता काशकुसुममञ्जरीव। इयमवस्थैव देवस्य [गमनं] यानमावेदयतीत्यन्वयस्तु प्रागेवोक्तः। **अवश्यं चेति**। देवस्य स्वामिनोऽवश्यं निश्चयेन देवीप्राप्त्याभवितव्यम्। अत्रार्थ उपपत्तिमाह—**केनेति**। केन पुरुषेण कदा वा कस्मिन्काले ज्योत्स्नारहितश्चन्द्रिकावर्जितश्चंद्रमाः कुमुदबान्धवोऽवलोकितो निरीक्षितः। वाथवा मृणालिकया कमलिन्या विना कमलाग(क)रस्तडागः। वाथवोद्यानभागो वनप्रदेशो लताशून्यो वल्लीरहितः। अपि चेति युक्त्यन्तरे। सहकारस्याम्रस्य कुसुममञ्जरी तस्याः परिग्रहमन्तरेण स्वीकारव्यतिरेकेण सर्वजनसुभगोऽपि समग्रलोकप्रियोऽपि कुसुममासो वसन्तमासो न राजत एव न शोभत एव। असंभाविता संभावनाविषयीकृता दानलेखाया मदवीथ्या लक्ष्मीः श्रीर्यस्मिन्नेवंविधं यूथाधिपतेर्यूथनाथस्य वदनम्। न राजत इत्यस्य सर्वत्र संबन्धः। **किंत्विति**। किंतु यावद्यावता कालेन वैशम्पायनो मन्त्रिसुतः परापतत्यागच्छति, यावच्चैतेन सह वैशम्पायनेन साकं गमनसंविधानं यात्राप्रकारं देवो भवान्निरूपयति प्रकाशयति, तावदवश्यं निश्चितं

निवेदितैव मया । सर्वोऽपि प्रत्याशया धार्यते । देव्यास्तु पुनर्देवदर्श-
नेनाद्ययावन्निष्प्रत्याशमेव हृदयं केनाश्वासनेन वर्तताम् । मद्वार्तोप-
लम्भादेतदुत्पत्स्यते चेतसि, यथास्ति कार्यं मे जीवितेन, दुःखान्यपि
सहन्ती धारयाम्येतदिति । अतो विज्ञापयामि, चेतसा त्वग्रतो गत
एव देवः, शरीरेणाप्यनुपदमुच्चलित एव । किमपरं मयात्र स्थितेन
साधनीयम् । तद्देवागमनोत्सवावेदनाय गमनानुज्ञया प्रसादं क्रियमा-
णमिच्छति मे प्रणयप्रसाददुर्ललितं हृदयमिदानीमेव' इति विज्ञापिते
केयूरकेणान्तःपरितोषविकसितया विकचनीलोत्पलपुञ्जमालिकयेव
दृष्ट्या दर्शितप्रसादश्चन्द्रापीडः प्रत्युवाच—'किमुच्यते । कस्या-
परस्येदृशोऽस्मद्दुःखासहिष्णुरनपेक्षितस्वशरीरशक्तिरुत्साहः । कस्या-

---

कालक्षेपेण दिनगमनिकया भाव्यं भवितव्यम् । **यादृशीति** । यादृशी च देव्याः कादम्बर्याः शरीरावस्था देहदशाकालक्षमा समयासहा वर्तते तादृशी मया निवेदितैव विज्ञप्तिविषयीकृत्ये(तै)व । **सर्व इति** । सर्वोऽपि पदार्थः प्रत्याशया प्रतिवाञ्छया धार्यते ध्रियते । **देव्यास्त्विति** । तु पुनरर्थे । देव्याः कादम्बर्याः पुनर्द्वितीयवारं देवदर्शनेन भवदवलोकनेन अद्ययावदेतद्दिवसमारभ्य हृदयं चित्तं निष्प्रत्याशमेव निराशमेव वर्तते, तर्हि केनाश्वासनेन वर्तताम् । **मदिति** । मद्वार्ताया मत्प्रवृत्तेरुपा(प)लम्भात्प्राप्तेरेतच्चेतसि चित्त उपपत्स्यते प्रादुर्भविष्यति । तदेव दर्शयन्नाह—**यथेति** । मे मम जीवितेन प्राणितेन कार्यं कृतमस्तीति हेतोर्दुःखान्यपि कृच्छ्राण्यपि सहन्ती सहमानैतच्छरीरं धारयामि । **अत इति** । अतः कारणादहं विज्ञापयामि विज्ञप्तिं करोमि । किं तदित्याह—**चेतसा त्विति** । देवो भवांश्चेतसा स्वान्तेनाग्रतः पुरतो गत एव, तथा शरीरेणापि देहेनाप्यनुपदं पश्चात्त्वरितमेव । 'अनुपदं क्लीबमव्ययम्' इत्यमरः । उच्चलित एव प्रचलित एव । **किमिति** । मया केयूरकेणात्रस्थितेन भवत्समीपावस्थितेनापि किमपरं पूर्वोक्तादन्यत्साधनीयं करणीयम् । **तदिति** । तत्तस्माद्धेतोर्देवस्य स्वामिनो गमनं यानं तदेवोत्सवो महस्तस्यावेदनं ज्ञापनं तस्मै गमनस्य प्रयाणस्यानुज्ञादेशस्तया क्रियमाणं विधीयमानं प्रसादमिदानीमेव सांप्रतमेव मे मम प्रणयेन स्नेहेन यः प्रसादः प्रसन्नता तेन दुर्ललितमुच्छृङ्खलं हृदयमिच्छत्यभिलषति । केयूरकेणेति विज्ञापिते विज्ञप्तिविषयीकृते सति, अन्तर्मध्ये यः परितोषः संतुष्टिस्तेन विकसितया विनिद्रया दृष्टया दृशा । अत एवोत्प्रेक्षते—विकचा विकस्वरा या नीलोत्पलपुञ्जमालिका नीलकुवलयचयस्रक्क्रयेव दर्शितः प्रकाशितः प्रसादः प्रसन्नता येनैवंभूतश्चन्द्रापीडः प्रत्युवाच प्रत्यब्रवीत् । किं तदित्याह—**किमिति** । किमुच्यते किं कथ्यते । **कस्येति** । कस्यापरस्यान्यस्येदृश एतादृगस्माकं यद्दुःखं

परस्येदृशी देशकालज्ञता । को वापरोऽस्मास्वेवं निर्व्याजभक्तिः। तत्साधु चिन्तितम् । गम्यतां देव्याः प्राणसंधारणाय ममागमनप्रत्ययार्थं च पत्रलेखाप्यग्रतस्त्वयैव सह यातु देवीपादमूलम्। इयमपि प्रसादभूमिरेव देव्याः । इमामप्यालोक्य कियत्यपि धृतिरवश्यमुत्पद्यत इति मे चेतसि । अपि चास्या अपि देव्यामस्त्येव स्नेहो भक्तिश्च' इत्यभिधाय पृष्ठत उपविष्टामेव तां पत्रलेखामद्राक्षीत् । सा तु किंचिदवनतमुखी 'निजाज्ञाक्षराणि प्रयच्छतु देवः' इति व्यज्ञपयत् । कृतप्रस्थितिनिश्चयायां च तस्यां मेघनादाह्वानाय प्रतीहारीमादिदेश । आदेशानन्तरमेव चागतं दूरतः प्रणतमाज्ञाप्रतीक्षं स्वयमेवाहूय सोपग्रहमादिदेश—'मेघनाद, यस्यां भूमौ पत्रलेखानयनाय मया त्वं प्रस्थापितस्तां भूमिमेव पत्रलेखामादाय केयूरकेण सहाग्रतो

तस्यासहिष्णुरसहनशीलोऽनपेक्षितावाञ्छिता स्वशरीरस्य निजदेहस्य शक्तिः सामर्थ्यं यस्मिन्नेवंविध उत्साहः प्रगल्भता । **कस्येति** । कस्यानिर्दिष्टनाम्न ईदृश्यनिर्वचनीया। देशः प्रदेशः, कालः समयस्तयोर्ज्ञता ज्ञातृता । **को वेति** । को वापरो जनोऽस्मास्वस्मद्विषयेष्वेवं पूर्वोक्तप्रकारेण निर्व्याजं निर्दम्भं यथा स्यात्तथा भक्तिर्यस्य स तथोक्तः । तदिति हेत्वर्थे । तस्माद्धेतोः साधु यथा स्यात्तथा चिन्तितमालोचितम् । चिन्तितस्य विशेषणं वा । साधु शुभं चिन्तितम् । चिन्ताविषयीकृतमित्यर्थः । **गम्यतामिति** । देव्याः कादम्बर्याः प्राणसंधारणायासुधृतये ममागमनं तत्र यानं तस्य प्रत्ययो विश्वासस्तदर्थं च त्वया गम्यतां व्रज्यताम् । देव्याः कादम्बर्याः पादमूलं चरणसमीपं पत्रलेखापि त्वयैव सहाग्रतः पुरतो यातु व्रजतु **इदमिति** । इयमपि पत्रलेखापि देव्याः कादम्बर्याः प्रसादभूमिरेवानुग्रहस्थानमेव । **इमामिति** । इमां पत्रलेखामप्यालोक्य निरीक्ष्य कियत्यपि कियन्मात्रा नतु समग्रा धृतिः संतुष्टिरवश्यं निश्चयेन । कादम्बर्या भाविनीति शेषः । इति मे मम चेतसि चित्त उत्पा(त्प)द्यत उद्भाव्यते । बुद्ध्येति शेषः । **अपि चेति** । अपि चेति प्रकारान्तरे । अस्याः पत्रलेखाया अपि देव्यां कादम्बर्यां स्नेह आभ्यन्तरप्रीतिर्भक्तिश्चाराध्यत्वेन ज्ञानमस्त्येव । एवकारोऽयोगव्यवच्छेदार्थः । इति पूर्वोक्तमभिधाय कथयित्वा पृष्ठतः पृष्ठे । सार्वविभक्तिकस्तस् । उपविष्टां स्थितामेव पत्रलेखामद्राक्षीद्व्यलोकयत् । **सा त्विति** । सा पत्रलेखा । तु पुनरर्थे । विलोकनानन्तरमित्यर्थः । किंचित्स्वल्पमवनतं नम्रं मुखमाननं यस्या एवंविधा सती निजस्यात्मीयस्याज्ञाया निर्देशस्याक्षराणि वचनानि देवो भवान्प्रयच्छतु ददातु । त्वं व्रजेति स्वमुखेन कथयेत्यर्थः । इति व्यज्ञपयद्विज्ञप्तिमकार्षीत् । **कृतेति** । कृतो विहितः प्रस्थितेर्गमनस्य निश्चयो यस्या एवंविधायां च तस्यां पत्रलेखायां सत्यां मेघनादस्यात्मसेवकस्याह्वानमाहूतिस्तस्मै प्रतीहारीं द्वारपालिकामादिदेशादिष्टवान् ।

3/90

गच्छ । अहमपि वैशम्पायनमालोक्यानुपदमेव ते तुरङ्गमैः परागतः' इत्यादिश्य, 'यदाज्ञापयति देवः' इति कृतनमस्कृतौ त्वरितगमन-संविधानाय निष्क्रान्ते मेघनादे 'देव, किमतःपरं विलम्बेन' इत्य-भिधाय, मेघनादनिर्गमानन्तरं गमनप्रणामोत्थितं केयूरकं सस्नेह-माहूय, सबाष्पया दृष्ट्या पुनःपुनरालोक्य, परिष्वज्य च सपुलका-भ्यां दोर्भ्याम्, आत्मकर्णादपनीयानेकवर्णरुचिरं संदेशमिव कर्णाभरणमस्य कर्णे कृत्वा कण्ठागतबाष्पगद्गदिकागृह्यमाणाक्षर-मवादीत्—'केयूरक, त्वया तु मे देवीसंदेशो नानीत एव । तत्किं तव हस्ते तदनुरूपं संदिशाम्यपूर्वम् । विज्ञापयितव्या देवी । तत्रापि किमलीकलज्जाजालभारोद्वहनेन त्वामायासयामि । यात्येव पत्रलेखा देवीपादमूलम् । इयं विज्ञापयिष्यति' इत्यभिदधदेवातर्कितोपन-

---

आदेशानन्तरमेव नियोगाव्यवहितमेवागतं च दूरतः प्रणतं प्रविष्टप्रदेशान्नतमाज्ञां यावत्प्रतीक्षा विलम्बो यस्यैवंभूतं स्वयमेवात्मनैवाहूयाह्वानं कृत्वा सोपग्रहं सादर-मादिदेशादिष्टवान् । हे मेघनाद, यस्यां भूमौ पत्रलेखाया आनयनायानयनकृते मया त्वं पूर्वं स्थापितो न्यस्तस्तां भूमिं यावत्पत्रलेखामादाय गृहीत्वा केयूरकेण सह सार्धमग्रतो गच्छ व्रज । अहमपि वैशम्पायनमालोक्य निरीक्ष्य ते तवानु-पदमि(मे)वानुचरणन्यासमेव तुरङ्गमैर्वाजिभिः । करणे तृतीया । परागतः समागत इति यदाज्ञापयत्याज्ञां ददाति देव इत्यादिश्य कथयित्वा कृता नमस्कृतिः प्रणामो येनैवंभूते त्वरितं शीघ्रं यद्गमनं यानं तस्य संविधानं करणं तस्मै निष्क्रान्ते बहि-र्निर्गते मेघनादे, हे देव, अतःपरं विलम्बेन किमित्यभिधायोक्त्वा मेघनादनिर्गमा-दनन्तरमव्यवहितं गमनाय यात्रायै यः प्रणामः प्रणतिस्तस्मा उत्थितं केयूरकं सस्नेहं सप्रीति यथा स्यात्तथाहूयाह्वानं कृत्वा सबाष्पया सरोदनया दृष्ट्या दृशा पुनःपुनर्वारंवारमालोक्य निरीक्ष्य सपुलकाभ्यां सरोमाञ्चाभ्यां दोर्भ्यां भुजाभ्यां परिष्वज्य चालिङ्ग्य चात्मकर्णात्स्वकीयश्रवणादपनीय दूरीकृत्यानेकवर्णै रक्त-पीतादिभी रुचिरं मनोहरम् । अत एवोत्प्रेक्षते—विविधवर्णैरक्षरै रुचिरं संदेशमिव वाचिकमिव । एवंविधं कर्णाभरणं श्रवणभूषणमस्य केयूरकस्य कर्णे श्रोत्रे कृत्वा कण्ठागतो यो बाष्पो रोदनं तस्माद्या गद्गदिका गद्गदेत्यव्यक्तध्वनिस्तया गृह्यमाणा-न्युच्चार्यमाणान्यक्षराणि यथा स्यात्तथावादीदवोचत् । किं तदित्याह—**केयूरक इति** । हे केयूरक, त्वया भवता । तु पुनरर्थे । मे मम देव्याः कादम्बर्याः संदेश उदन्तो नानीत एव न प्रापित एव । तत्तस्माद्धेतोस्तव हस्ते तस्याः कादम्बर्या अनुरूपं योग्यमपूर्वं नवीनं किं संदिशामि प्रतिवाचिकं यच्छामि । देवी कादम्बरी त्वया विज्ञापयितव्या विज्ञप्तिविषयीकार्या । तत्राप्यपूर्वविज्ञापनेऽलीका या लज्जा त्रपा तस्या जालं समूहस्तस्य भारो वीवधस्तस्योद्वहनेन त्वामायासयामि

तात्मविरहपीडाम्, अमङ्गलशङ्कया कृतयत्नापि बाष्पवेगमपारयन्तीं संधारयितुम्, उत्प्लुतावद्धलक्षशून्यदृष्टिसंचारणां चरणपाताभिमुखीं पत्रलेखां प्रणयेनाभिमुखो भूत्वा बद्धाञ्जलिरभाषत—'पत्रलेखे, साञ्जलिबन्धेन शिरसा प्रणम्य मदीयेन विज्ञाप्या देवी कादम्बरी, येन सर्वखलानां धुरि लेखनीयेन तथा प्रथमदर्शनेऽपि, वत्सलत्वात्स्वभावस्य दर्शितप्रसादातिशयां देवीं प्रणामेनाप्यसंभाव्य गच्छता प्रज्ञा जडतया, ज्ञानं मौढ्येन, धीरता तरलत्वेन, स्नेहलता रौक्ष्येण, गौरवं लघुतया, प्रियंवदता पारुष्येण, मृदुहृदयता नैष्ठुर्येण, स्थैर्यं चञ्चलतया, दयालुता निस्त्रिंशत्वेन, आर्जवं मायाजालेन, सत्यवादितालीककाकुसंपादनेन, दृढभक्तितावज्ञानेन, पेशलता कौटिल्येन, लज्जा धार्ष्ट्येन, औदार्यं क्षुद्रतया, दाक्षिण्यममहानुभावतया, प्रश्रयोऽभिमानेन, कृतज्ञता कृतघ्नतया, शीलं पौरोभाग्यतया, सर्वगुणा

परिश्रममुत्पादयामि । पत्रलेखा देवीपादमूलं कादम्बरीचरणसमीपं यात्येव व्रजत्येव । अत इयमेव विज्ञापयिष्यति विज्ञप्तिं करिष्यति । इत्यभिदधदेवेति कथयन्नेव प्रणयेन स्नेहेनाभिमुखो भूत्वा संमुखीभूय बद्धाञ्जलिः पत्रलेखामभाषताब्रवीदित्यन्वयः । पत्रलेखां विशेषयन्नाह—**अतर्कितेति** । अतर्किताचिन्तितोपनता प्राप्तात्मनः स्वस्य विरहपीडा वियोगव्यथा यस्याः सा ताम् । पुनः किं कुर्वन्तीम् । अमङ्गलशङ्कयाशुभारेकया कृतयत्नामपि विहितोद्यमामपि बाष्पवेगं नेत्राम्बुप्रवाहं संधारयितुं संस्थापयितुमपारयन्तीमशक्नुवन्तीम् । उत्प्लुतावद्धलक्ष्या(क्षा) विषयीकृतविषयात एव शून्या या दृष्टिर्दृक्तस्याः संचारणं यस्याः सा ताम् । चरणपातोऽभिवादनं तं प्रत्यभिमुखीं संमुखीम् । किमुवाचेत्याह—**पत्रलेखे इति** । हे पत्रलेखे, मदीयेन मामकीनेन साञ्जलिबन्धेनाञ्जलिबन्धेन सह वर्तमानेन शिरसोत्तमाङ्गेन प्रणम्य नमस्कृत्य देवी कादम्बरी विज्ञाप्या विज्ञप्तिविषयीकार्या । किं तदित्याह **येनेति** । स्वभावस्य प्रकृतेर्वत्सलत्वाद्धितकारित्वात्प्रथमदर्शनेऽप्याद्यावलोकनेऽपि तथा तेन प्रकारेण दर्शितः प्रकाशितः प्रसादातिशयः प्रसन्नताधिक्यं ययैवंविधां देवीं कादम्बरीं प्रणामेनापि नमस्कृत्याप्यसंभाव्यासंभावनाविषयीकृत्य गच्छता व्रजता येन सर्वखलानां समग्रदुर्जनानां धुर्यादौ लेखनीयेन गणनीयेन मया सर्वगुणा ऐश्वर्यादयो दोषैर्वैगुण्यैः परिवृत्ताः । स्वस्वरूपमापादिता इत्यर्थः । तदेव दर्शयन्नाह—**प्रज्ञेति** । प्रज्ञा प्रतिभा जडतया मूर्खतया, ज्ञानं मौढ्येन मूढतया, धीरता धैर्यं तरलत्वेन तरलतया, स्नेहलता रौक्ष्येण रूक्षतया, गौरवं गुरुता लघुतया लघुत्वेन, प्रियवदंता मिष्टभाषित्वं पारुष्येण काठिन्येन, मृदुहृदयता सुकुमारचित्तता नैष्ठुर्येण निष्ठुरत्वेन, स्थैर्यं स्थिरता चञ्चलतया चाञ्चल्येन, दयालुता कृपालुता निस्त्रिंशत्वेन निष्कृपत्वेन, आर्जवमृजुत्वं मायाजालेन निकृतेर्जालतया, सत्यवादितानलीकभाषित्वमलीकासत्या या काकुर्वक्रोक्तिस्तस्याः

एव दोषैः परिवृत्ताः । स कमिवापरं गुणमवलम्ब्य पुनः परिग्रहाय विज्ञापयतु । केन चाङ्गीकरोतु देवी । किमुपदर्शितालीकात्मार्पणेन न प्रतारितं देव्या हृदयमिति किं प्रकृतिपेशलं हृदयमपहृत्य नापक्रान्तोऽस्मीति, किमियं प्राणसंदेहकारिणी निष्करुणेन शरीरावस्था नोपेक्षितेति, किमहमस्याः न कारणमित्येतत्सर्वदोषाश्रयेणाप्यनुवृत्त्या चरणावाराधिताविति वा । तदेवमात्मना सर्वगुणहीनस्यापि मे देवीगुणा एवावलम्बनम् । इयमेव ते स्वभावसरसा दूरस्थमपि मदनहुतभुजा दह्यमानं रक्षत्येव सरलता । मुहुर्मुहुराह्वयत्येव स्नेहलता, आनयत्येव स्थिरप्रतिज्ञता, ढौकयत्येव दक्षिणता, अभिपद्यत एव वत्सलता, चरणपतितं न निर्भर्त्सयत्येव मृदुहृदयता, उत्थाप्य

संपादनेन निष्पादनेन, दृढभक्तिता स्थिराराध्यतावज्ञानेनावगणनेन, पेशलता हृद्यता कौटिल्येन कुटिलतया, लज्जा त्रपा धार्ष्ट्येन धृष्टतया. औदार्यमुदारता क्षुद्रतया तुच्छतया, दाक्षिण्यं सरलत्वममहानुभावतयामाहात्म्यतया, प्रश्रयो विनयोऽभिमानेनाहं(लं)कृत्या कृतज्ञता कृतवि(त्त्व)ता कृतघ्नतयाकृतज्ञतया, शीलमाचारः पौरोभाग्यतया दोषैकदृक्तया । 'दोषैकदृक्पुरोभागी निकृतस्त्वनृजुः शठः' इत्यमरः । सर्वगुणा एव दोषैः परा[रि]वृत्ता इत्यन्वयस्तु प्रागेवोक्तः । स इति । स चन्द्रापीडः कमिव कथमिव कथमपरं पूर्वोक्तगुणेभ्यो भिन्नं गुणमवलम्ब्यावलम्बनीकृत्य पुनर्द्वितीयवारं परिग्रहाय स्वीकाराय विज्ञापयितुं (यतु) विज्ञप्तिं कारयतु । केन च गुणेन देवी कादम्बर्यङ्गीकरोतु । स्वीकरोतु मामिति शेषः । **किमिति** । उपदर्शितं यन्मिथ्यात्मार्पणम्, अलीकं मिथ्यात्मनोऽर्पणं प्रदानं तेन देव्याः कादम्बर्या हृदयं चेतः किं न प्रतारितं न वञ्चितमिति । प्रकृत्या स्वभावेन पेशलं हृद्यं हृदयमपहृत्याहृत्य किं नापक्रान्तोऽस्मि न गतोऽस्मीति । इयं प्राणसंदेहकारिणी शरीरावस्था देहदशा निष्करुणेन निष्कृपेण किं नोपेक्षितोपेक्षाविषयीकृता । अहं किमस्या अवस्थाया न कारणं न निदानमित्येतत्सर्वदोषाश्रयेणापि सर्ववैगुणा(ण्या)धारभूतेनाप्यनुवृत्त्यानुकूल्येन चरणौ पादावाराधितौ सेविताविति वा । तदेवात्मना सर्वप्रकारेण सर्वगुणहीनस्यापि समग्रगुणरहितस्यापि मे मम देवीगुणा एव कादम्बरीगुणा एवावलम्बनमाश्रयः । **इयमिति** । इयमेव ते तव स्वभावेन प्रकृत्या सरसा स्निग्धा दूरस्थमपि दविष्ठमपि मदनहुतभुजा कंदर्पाग्निना दह्यमानं ज्वलमानं सरलता ऋजुता रक्षत्येव पालयत्येव । मुहुर्मुहुर्वारंवारं स्नेहलता स्नेहलस्य भावः स्नेहलताह्वयत्येव निमन्त्रयत्येव । स्थिरप्रतिज्ञता दृढसंगरतानयत्येव प्रापयत्येव । दक्षिणता चातुर्यता ढौकयत्येव प्राभृतीकरोत्येव । वत्सलता हितकारिताभिपद्यत एवाङ्गीकरोत्येव । मृदुहृदयतार्जवचित्तता चरणपतितं पादप्रणतं जनं न निर्भर्त्सयत्येव न तिरस्करोत्येव महानु-

संभावयत्येव महानुभावता, आलपत्येव प्रियवादिता, ददात्येव हृदये-ऽवकाशमत्युदारता। यच्च तथापि गत्वा निर्लज्जहृदयः पुनर्वदनदर्शनदानसाहसमङ्गीकरोमि। अत्रापि सत्प्रकृतयो देवीप्रसादा एव कारणम्। एते हि विशदत्वादुदारभावात्संगतत्वाच्च क्षणपरिचिता अपि समारोपितजीवितप्रत्याशा न किंचिन्न कारयन्ति। स्मारयन्ति सेव्यताम्, देव्याश्चरणपरिचर्यायै समुत्साहयन्ति, शिक्षयन्ति सेवाचातुर्यम्, उपदिशन्त्याराधनोपायान्, चाटुकारो भवेत्यसकृदाज्ञापयन्ति, एवं स्थीयतामिति स्वयमेवोपदर्शयन्ति, मुखावलोकिनामकालोपसर्पणकोपेऽनुनयन्ति, परितोषावसरेऽनुगृह्णन्ति गुणानुवादेन, लज्जापसृतं हठादाकृष्योपसर्पयन्ति, नान्यत्र क्षणमपि ददत्यवस्थातुम्। अपि चैतेऽनुग्राहकत्वादेवापरित्याज्याः, गुरुत्वादेव कृतावष्टम्भाः, विस्तीर्णत्वादेवालङ्घनीयाः, प्रभूतत्वादेवापरिहार्याः।

भावता साधुस्वभावतोत्थाप्योत्थानं कारयित्वा संभावयत्येव प्रीणयत्येव प्रियवादिता मिष्टवक्तृतालपत्येव संभाषयत्येव। अत्युदारतातिवितरणता हृदये चित्तेऽवकाशमन्तरं ददात्येव प्रयच्छत्येव। **यच्चेति**। यत्तथा गत्वापि निर्लज्जहृदयो निस्त्रपचेताः पुनर्द्वितीयवारं वदनदर्शनस्य दानं तस्मिन्साहसं धैर्यमङ्गीकरोमि स्वीकरोमि। अत्रापि वदनदर्शनेऽपि सत्प्रकृतयः शोभनस्वभावा देव्या गन्धर्वपुत्र्याः प्रसन्नता लक्षे(क्ष्ये)णानुग्रहा एव कारणं निमित्तम्। **एते हीति**। हीति निश्चितम्। एते प्रसादा विशदत्वान्निर्मलत्वादुदारभावात्सरलत्वेन संगतत्वाच्च मिलितत्वाच्च क्षणं समयमात्रं परिचिता अपि परिचितिविषयीभूता अपि समारोपिताः स्थापिता जीवितस्य प्राणितस्य प्रत्याशा वाञ्छा यैरेवंविधाः किंचिन्न कारयन्ति न, अपि तु कारयन्त्येव। तदेवाह—**स्मारयन्तीति**। सेव्यतां सपर्यायोग्यताभावं स्मारयन्ति स्मरणविषयीकारयन्ति। देव्याः कादम्बर्याश्चरणपरिचार्यायै क्रमसेवायै समुत्साहयन्त्युत्साहं कारयन्ति। सेवाचातुर्यं सपर्यादक्षतां शिक्षयन्ति पाठयन्ति। आराधनोपायान्समाराधनहेतूनुपदिशन्ति कथयन्ति। चाटुकारश्चटुकृत्त्वं भवेत्यसकृद्वारंवारमाज्ञापयन्त्याज्ञां ददति एवममुना प्रकारेण स्थीयतामास्यताम् [इति] स्वयमेवात्मनैवोपदर्शयन्ति प्रकाशयन्ति। मुखावलोकिनामास्य निरीक्षकाणामकालेऽप्रस्तावे अ(उ)पसर्पणमागमनं तज्जनितो यः कोपस्तस्मिन्ननुनयन्ति प्रसादयन्ति। परितोषावसरे संतुष्टिक्षणे गुणानुवादेन गुणकथनेनानुगृह्णन्त्यनुग्रहं कुर्वन्ति। लज्जया त्रपयापसृतं पश्चाद्गतं हठाद्बलादुपसर्पयन्ति समीप आनयन्ति। अन्यत्रान्यस्मिन्स्थले क्षणमप्यवस्थातुमवस्थानं कर्तुं न ददति न प्रयच्छन्ति। **अपि चेति**। अपि च प्रकारान्तरेण (ए) ते देवीप्रसादा अनुग्र (ग्रा) हकत्वादेवानुग्रहकारित्वादेवापरित्याज्या अप-

तदेभिरहं विनाप्यागमनाज्ञया सुदूरमपक्रान्तोऽपि बलादेवाकृष्य देवीपादमूलमानीये ' इति । यया वानपेक्षितगमनाज्ञया नियन्त्रणत्वाद्गतोऽहमिति विज्ञप्तम्, सैव वाणी विज्ञापयति । यथा च मे न निष्फलमागमनं भवति, जगद्वा शून्यम्, तथा देव्यात्मसंधारणायात्मनैव यत्नः कार्य इति संदिश्य पुनराह—'पत्रलेखे, त्वयापि यान्त्याध्वनि न मद्विरहपीडा भावनीया, न शरीरसंस्कारेऽनादरः करणीयः, नाहारवेलातिक्रमणीया, न येनकेनचिदज्ञातेन पथा यातव्यम्, न यत्रतत्रैवानिरूप्यावस्थातव्यम्, उषितव्यं वा । न यस्यकस्यचिदपरिज्ञायमानस्यान्तरं दातव्यम्, । सर्वदा शरीरेऽप्रमादिन्या भाव्यम् । किं करोमि । त्वत्तोऽपि मे वल्लभतरा देवीप्राणाः येनैवमेकाकिनी तेषां संधारणाय विसर्जितासि । अपि च मम जीवितमपि तवैव हस्ते वर्तते । तन्नियतं त्वयात्मा यत्नेन परिरक्षणीयः,

---

रिमोच्याः । गुरुत्वादेव गरीयस्त्वादेव कृतो विहितोऽवष्टम्भ आधारो यैस्ते तथोक्ताः । विस्तीर्णत्वादेव विशालत्वादेवालङ्घनीया अनतिक्रमणीयाः । प्रभूतत्वादेव बाहुल्यादेवापरिहार्या अत्याज्याः । एतेषां द्वितीयोऽर्थः स्वयमूह्यः । तदिति हेत्वर्थे । एभिः प्रसादैरहमागमनस्याज्ञा निदेशस्तां विनापि सुदूरं दविष्ठमपक्रान्तोऽपि गतोऽपि बलाद्धठादि (दे) वाकृष्याकर्षणं कृत्वा देव्याः कादम्बर्याः पादमूलं चरणसमीपमानीय इति । **ययेति** । अपेक्षितानीहिता गमनस्य यात्रा आज्ञा नियोगो ययैवविधया वाण्या नियन्त्रणत्वादहं गतः इति विज्ञप्तं कथितम्, सैव वाणी विज्ञापयति विज्ञप्तिं करोति । किं तदित्याह—**यथेति** । तथा मे ममागमनं निष्फलं निःप्रयोजनं न भवति । जगद्वा शून्यमुद्वसितं न स्यात् । तथा देव्याः कादम्बर्यात्मसंधारणायात्मरक्षणायात्मनैव स्वेनैव यत्नः परिश्रमः कार्यः । इति संदिश्य कथयित्वा पुनर्द्वितीयवारमाह—हे पत्रलेखे, त्वयापि भवत्यापि यान्त्या व्रजन्त्याध्वनि मार्गे मम विरहो वियोगस्तस्य पीडा व्याधिर्न भावनीया न भावनाविषयीकार्या । न विचारणीयेत्यर्थः । शरीरस्य संस्कारे परिकर्मणि नानादरोऽनुद्यमः करणीयो विधातव्यः । आहारवेला भोजनसमयो नातिक्रमणीया नोल्लङ्घनीया । अज्ञातेनानाकलितेन येनकेनचित्पथा मार्गेण न यातव्यं न गन्तव्यम् । यत्रतत्रैव यस्मिंस्तस्मिन्वा स्थलेऽतिगम्यं नानिरूप्यानवलोक्यावस्थातव्यमासितव्यमुषितव्यं वा वसितव्यं वा । न यस्यकस्यचिदपरिज्ञायमानस्यानुपलक्षितस्यान्तरमवकाशो हार्दं वा दातव्यं प्रदेयम् । सर्वदा सर्वप्रकारेण शरीरे तनावप्रमादिन्यानालसिन्या भाव्यं भवितव्यम् । अहं किं करोमि किं कुर्वे । त्वत्तोऽपि भवत्या अपि मे मम देवीप्राणाः कादम्बर्यसवो वल्लभतरा अतिशयेन

इत्युक्त्वा सस्नेहं परिष्वज्य केयूरकं पुनस्तदवधानदानाय संविधाय 'महाश्वेताश्रमं यावत्पुनस्त्वयैव सहानया मन्नयनायागन्तव्यम्' इत्यादिश्य व्यसर्जयत्। निर्गतायां च केयूरकेण सह पत्रलेखायाम् 'किं शीघ्रमेते यास्यन्ति न वेति, अन्तरा वा गच्छतां परिलम्ब उत्पत्स्यते न वेति, कियद्भिर्वा दिवसैः परापतिष्यन्ति' इत्यनयैव चिन्तया शून्यहृदयः क्षणमिव स्थित्वा स्कन्धावारवार्तास्फुटीकरणाय वार्ताहरं विसर्ज्य बहुदिवसान्तरितदर्शनस्य वैशम्पायनस्य प्रत्युद्गमनायात्मानं मोचयितुं पितुः पादमूलमयात्। तत्र चोभयतः ससंभ्रमापसृतप्रतीहारमण्डलवितीर्णविस्तीर्णालोकनमार्गो दूरादेवापसव्यजानुकरतलावलम्बितविमलमणिकुट्टिमोदरसंक्रान्तप्रतिमो द्विगुणायमानायतकुन्तलकलापः पितुः प्रणाममकरोत्।

प्रियाः। येनैवमिति। येन करणेनैवममुना प्रकारेण तेषां प्राणानां संधारणाय रक्षणाय त्वमेकाकिन्यसहाया विसर्जिता प्रहितासि। अपि च युक्त्यन्तरे। मम जीवितं प्राणितमपि तवैव भवत्या एव हस्ते वर्तते। नान्यस्येत्यर्थः। अत्रैवकारोऽन्ययोगव्यवच्छेदार्थः। तत्तस्मान्नियतं त्वयात्मा प्राणी यत्नेनोद्यमेन परिरक्षणीयो रक्षितव्यः। इत्युक्त्वा कथयित्वा सस्नेहं सहार्दं परिष्वज्यालिङ्ग्य केयूरकं पुनस्तस्याः पत्रलेखाया अवधानं समाधानं तस्य दानं वितरणं तदर्थं संविधाय कृत्वा महाश्वेताया आश्रमं मुनिस्थानं यावत्, अनया पत्रलेखया त्वयैव भवतैव सह मन्नयनाय मदाकारणायागन्तव्यं समेतव्यमित्यादिश्येत्युक्त्वा व्यसर्जयदप्रैषीत्। केयूरकेण सह पत्रलेखायां निर्गतायां सत्यां किमेते केयूरकप्रभृतयः शीघ्रमाशु यास्यन्ति गमिष्यन्ति न वा। अथवा गच्छतां व्रजतामन्तरा मध्ये परिलम्बि विलम्ब उत्पत्स्यते भविष्यति न वा। कियद्भिः कियन्मात्रैर्दिवसैर्वासरैः परापतिष्यन्त्यागमिष्यन्ति। अनयैव चिन्तयार्त्या शून्यं मूढं हृदयं यस्यैवंभूतः क्षणमिव क्षणमात्रं स्थित्वा स्कन्धावारस्य सैन्यस्य वार्ता प्रवृत्तिस्तस्याः स्फुटीकरणं प्रकटीकरणं तस्मै वार्ताहरं संदेशहारकं विसर्ज्य गमनायादेशं दत्त्वा बहुदिवसैरन्तरितं व्यवधानीकृतं दर्शनमवलोकनं यस्यैवंविधस्य वैशम्पायनस्य प्रत्युद्गमनायाभिमुखयानायात्मानं स्वं मोचयितुमुत्कलीकर्तुं पितुस्तारापीडस्य पादमूलं चरणसमीपमयाद्गतवान्। तत्रेति। उभयत उभयपार्श्वे ससंभ्रमेणापसृतं किंचित्पश्चाद्गतं यत्प्रतीहारमण्डलं द्वारपालसमूहं तेन वितीर्णो दत्तो विस्तीर्णो विशाल आलोकनमार्गो निरीक्षणपन्था यस्य सः। दूरादेवेति। दूरादेव दविष्ठादेवापसव्यो दक्षिणो जानुर्नलकीलकः करतलं हस्ततलं ताभ्यामवलम्बितमालम्बनीकृतं विमलं निर्मलं यन्मणिकुट्टिमस्य मणिबद्धभूमेरुदरं मध्यं तत्र संक्रान्ता प्रतिबिम्बिता प्रतिमा मूर्तिर्यस्य सः, अत एवोभयत्र दृश्यमानत्वाद्द्विगुणायमानो द्विगुणवदाचरमाण आयतो विस्तीर्णः कुन्त-

अथ तारापीडस्तथा दूरत एव कृतप्रणामं चन्द्रापीडमालोक्य निर्भरस्नेहगर्भेण सलिलभरमन्थरेणेव जलधरध्वाननिभेन स्वरेण सधीरम् 'एह्येहि' इत्याहूय ससंभ्रमप्रधावितमपि संभावितशुकनासप्रणाममुपसृत्य पार्श्वे भूमावुपविशन्तमाकृष्य हठात्पादपीठे समुपवेश्यापरिसमाप्तावलोकनस्पृहेण चक्षुषा सुचिरमालोक्यास्योपारूढयौवनभराभिरामतरारुण्यङ्गप्रत्यङ्गानि पाणिना स्पृष्ट्वा दर्शयञ्शुकनासमवादीत्—'शुकनास, पश्येयमायुष्मतश्चन्द्रापीडस्योत्सर्पिणी महानीलमणिप्रभेव कनकशिखरिणः, गण्डमण्डलोद्भासिनी मदलेखेव गन्धद्विपस्य, उपहितकान्तिपतिपरभागा लक्ष्मच्छायेव चन्द्रमसः, विकाशशोभापेक्षिणी मधुकरावलीव कमलाकरस्य, रूपाले-

---

लकलापः केशसमूहो यस्यैवंभूतश्चन्द्रापीडः पितुस्तारापीडस्य प्रणामं नमस्कारमकरोदसृजत्। 'कुट्टिमोऽस्त्री निबद्धा भूः' इत्यमरः।

अथेति। प्रणामानन्तरं तारापीडस्तथा तेन प्रकारेण दूरत एव दविष्ठादेव कृतप्रणामं विहितनमस्कारं चन्द्रापीडमालोक्य निरीक्ष्य निर्भरं यथा स्यात्तथा स्नेहो हार्दं गर्भे मध्ये यस्मिन्नेतादृशेन सलिलभरः पानीयभरस्तेन मन्थरेणेव स्निग्धेनेव जलधरस्य मेघस्य ध्वानो ध्वनिस्तस्य निभेन सदृशेन स्वरेण शब्देन सधीरं यथा स्यात्तथा एह्येह्यागच्छागच्छेत्याहूयाह्वानं कृत्वा ससंभ्रमं सादरं सचकितं वा प्रधावितमपि त्वरितगत्या चलितमपि संभावितः संभावनाविषयीकृतः शुकनासस्य प्रणामो नमस्कारो येन स तमुपसृत्योपसरणं कृत्वा पार्श्वे भूमौ पृथिव्यामुपविशन्तं निषीदन्तं हठादाकृष्याकर्षणं कृत्वा पादपीठे पदासने समुपवेश्योपवेशनं कारयित्वा-परिसमाप्तापरिपूर्णालोक(न)स्य निरीक्षणस्य स्पृहा वाञ्छा यस्यैवंविधेन चक्षुषा नेत्रेण सुचिरं चिरकालं यावत्, आलोक्य निरीक्ष्यास्य चन्द्रापीडस्योपारूढं प्राप्तं यद्यौवनं तारुण्यं तस्य भरः संभारस्तेनाभिरामतरारुण्यतिमनोहरारुण्यंगप्रत्यङ्गानि हस्तांगुलिप्रभृतीनि पाणिना हस्तेन स्पृष्ट्वा स्पर्शं कृत्वा शुकनासं मन्त्रिमुख्यं दर्शयन्नवलोकनं कारयन्नवादीदब्रवीत्। हे शुकनास, पश्यावलोकय। आयुष्मतो जीवितवतः चन्द्रापीडस्येयं प्रत्यक्षोपलभ्या श्मश्रुराजिः कूर्चश्रेणिस्तस्या लेखा रेखा समन्तात्सर्वतः समुद्भिन्ना प्रकटिता। श्यामत्वसाधर्म्यादुत्प्रेक्षते—कनकशिखरिणः सुवर्णाचलस्योत्सर्पिण्यूर्ध्वगामिनी महानीलमणीनां स्थूलेन्द्रनीलरत्नानां प्रभेव कान्तिरिव। गन्धद्विपस्य गन्धेभस्य गण्डमण्डल उद्भासितुं शीलं यस्यां एवंविधा मदलेखेव दानलेखेव। उपहितआच्छादितः कान्तिपतिना सूर्येण परभागो गुणोत्कर्षो यस्याः सैवंविधा चन्द्रमसः कुमुदबान्धवस्य लक्ष्मच्छायेव कलङ्कप्रभेव। 'परभागो गुणोत्कर्षः' इत्यमरः।

ख्योन्मीलनकालाञ्जनवर्तिका, तारुण्यभरजलधरोत्तानश्यामिका, उज्ज्वलत्कन्दर्पदीपकज्जलशिखा, स्फुरत्प्रतापानलधूमराजी, मकरध्वजोपवनतमालवल्ली, मनोभवदोषारम्भवालतिमिरोद्गतिः, उद्वाहमङ्गलभ्रूसंज्ञा श्मश्रुराजिलेखा समन्तात्समुद्भिन्ना । विवाहमङ्गलयोग्यां दशामारूढोऽयम् । तद्देव्या विलासवत्या सह समेत्याभिजनरूपा निरूप्यतां काचिज्जगति राजकन्यका । दृष्टं हि दुर्लभदर्शनं वत्सस्य वदनम् । संप्रति वधूमुखकमलदर्शनेनानन्दयाम आत्मानम्' इत्युक्तवति तारापीडे शुकनासः प्रत्युवाच—'साधु चिन्तितं देवेन । अनेन तु सहृदयेन हृदये समारोपिता एव सर्वविद्याः, संभाविता एव सर्वाः कलाः, स्वीकृता एव सर्वप्रजाः, गृहीता एव सर्वदिग्वधूनां कराः, स्थापितैव निश्चला कुटुम्बिनीपदे राजलक्ष्मीः, ऊढैव चतुरुदधिमेखलाकलापभूषणा भूः । किमतः परमवशिष्यते, येनानेन न

विकाशशोभां विकस्वरलक्ष्मीमपेक्षत इत्येवंशीला कमलाकरस्य मधुकरावलीव भ्रमरपङ्क्तिरिव । रूपालेख(ख्य)स्य रूपचित्रस्योन्मीलनं प्रकाशनं तत्र कालाञ्जनस्य कृष्णकज्जलस्य वर्तिकेव वर्तिका लेखिनी । तारुण्यभरो यौवनातिशयः स एव जलधरो मेघस्तस्योत्तान(ना) अतिशायिनी श्यामिकेव श्यामिका । उज्ज्वलन्दीप्यन्यः कन्दर्पः कामः स एव प्रदीपः स्नेहप्रियस्तस्य कज्जलमञ्जनं तस्य शिखेव शिखा । स्फुरन्नुल्लसन्यः प्रतापः कोशदण्डजं तेजः स एवानलो वह्निस्तस्य धूमराजीव धूमराजी । मकरध्वजस्य मनोभवस्योपवनमरण्यं तस्य तमालवल्लीव तमालवल्ली । त(म)नोभवः कंदर्पः स एव दोषारम्भो यामिनीप्रारम्भस्तस्य बालान्यपरिपक्वानि यानि तिमिराण्यन्धकाराणि तेषामुद्गतिरिवोद्गतिः । उद्वाहस्य पाणिपीडनस्य मङ्गलं शुभक्रिया तस्य भ्रूसंज्ञेव भ्रूसंज्ञा । हे शुकनास, त्वं पश्येत्यन्वयस्तु प्रागेवोक्तः । तत्तस्माद्धेतोर्विवाहमङ्गलयोग्यामुद्वाहक्रियायोग्यां दशामारूढोऽयम् । चन्द्रापीड इत्यर्थः । तत्तस्मात्कारणादभिजनरूपा प्रशस्ताकृतिः काचिदनिर्दिष्टनाम्नी जगति पृथिव्यां राजकन्यका राजकुमारिका विलासवत्या देव्या सह समेत्य मिलित्वा निरूप्यतां कथ्यताम् । **दृष्टमिति** । हीति निश्चयेन । दुर्लभं दुःप्रापं दर्शनमवलोकनं यस्यैवंविधं वत्सस्य सूनोर्वदनमाननं दृष्टमवलोकितम् । संप्रतीदानीं वध्वा मुखकमलं तस्य दर्शनेन निरीक्षणेनात्मानं स्वमानन्दयामः प्रीणयामः । इति तारापीडे उक्तवति कथितवति सति शुकनासः प्रत्युवाच प्रत्यब्रवीत् । किमुवाचेत्याह—**साध्विति** । साधु शोभनं चिन्तितं विचारितं देवेन स्वामिना । सहृदयेन सज्जनेनानेन तु चन्द्रापीडेन हृदये सर्वविद्याः कलं(ला)दिकाः समारोपिता एव प्राप्ता एव । सर्वाः कला विज्ञानानि संभाविता एव ज्ञाता एव सर्वप्रजाः समग्रप्रकृतयः स्वीकृता एवाङ्गीकृता एव । सर्वदिग्व-

परिणीयते' इत्यभिहितवति शुकनासे लज्जावनम्रवदनश्चन्द्रापीडश्चकार चेतसि—'अहो संवादः, येन मे कादम्बरीसमागमोपायचिन्तासमकालमेवेदृशी तातस्य बुद्धिरुत्पन्ना । तद्यदुच्यते—अन्धकारे प्रविष्टस्यालोकः, वनगहनप्रविष्टस्य देशिकदर्शनम्, महार्णवपतितस्य यानपात्राभ्यागमनम्, म्रियमाणस्योपर्यमृतवृष्टिरिति, तदेतदापतितं मयि । सर्वथा वैशम्पायनदर्शनमात्रकान्तरिता वर्तते मे कादम्बरीप्राप्तिः' इत्येवं चिन्तयत्येव चन्द्रापीडे क्षितिपतिरुत्तस्थौ । उत्थाय च तमेव विनयावनतपूर्वकायं समवलम्ब्यांसदेशे सकलमेदिनीभारोद्वहनगुरुणा दोर्दण्डेन शनैः शनैः संचरञ्शुकनासेनानुगम्यमानो विलासवतीभवनमगमत् । गत्वा च ससंभ्रमकृताभ्युत्थानामिन्दूदयावलोकनविलोलामिव समुद्रवेलां विलासवतीमूर्ध्वस्थित

धूनां समग्रककुभनारीणां कराः पाणयो गृहीता एव ग्रहणविषयीकृता एव । कुटुम्बिनीपदे जायास्थाने राज्यलक्ष्मीर्निश्चला स्थिरा स्थापितैव न्यस्तैव । चतुरुदधयश्चतुःसमुद्रास्त एव मेखलाकलापो भूषणं यस्यामेवंविधा भूः पृथ्वी ऊढैव परिणीतैव अतोऽपरमन्यत्किमवशिष्यत उद्ध (र्व) रितं भवति, येनानेन न परिणीयते न पाणिग्रहणं क्रियते । इत्यभिहितवतीत्युक्तवति शुकनासे लज्जया त्रपया अवनम्रं नतं वदनं यस्यैवंविधश्चन्द्रापीडश्चेतसि चित्ते चकाराकरोत् । अहो संवादो विसंवादाभावः । येन कारणेन मे मम कादम्बर्याः समागमोपायचिन्तासमकालमेव तातस्य पितुरीदृशी बुद्धिरुत्पन्ना । तद्यदुच्यते प्रतिपाद्यते जनैस्तदेतन्मय्यापतितमागतम् । तत्किमित्याह—**अन्धकार इति** । अन्धकारे तिमिरे प्रविष्टस्य निविष्टस्यालोकः प्रकाशः । वनस्यारण्यस्य गहनं गह्वरं तत्र प्रविष्टस्य देशिकदर्शनं स्वदेशोत्पन्नजनावलोकनम् । महार्णवः समुद्रस्तस्मिन्पतितस्य यानपात्रस्य पोतस्याभ्यागमनं प्राप्तिः । म्रियमाणस्य मरणं व्रजत उपर्यमृतवृष्टिः सुधासेक इति । सर्वथा सर्वप्रकारेण वैशम्पायनस्य दर्शनमात्रकमवलोकनमात्रकं तेनान्तरिता व्यवहिता मे मम कादंबरीप्राप्तिः [वर्तते] इत्येवं चिन्तयत्येव विचारयत्येव चन्द्रापीडे क्षितिपतिस्तारापीड उत्तस्थावुत्थितवान् । उत्थाय चोत्थानं कृत्वा । **तमेवेति** । सकला समग्रा या मेदिनी वसुधा तस्या भारो वीवधस्तस्योद्वहनेन धारणेन गुरुणा गरिष्ठेन दोर्दण्डेन भुजदण्डेन विनयेनावगतो नम्रीभूतः पूर्वकायो देहादिभागो यस्यैवंभूतं तमेव चन्द्रापीडमेवांसदेशे स्कन्धप्रदेशे समवलंब्यालम्बनीकृत्य शनैः शनैर्मन्दं मन्दं संचरन्व्रजञ्शुकनासेनानुगम्यमानोऽनुयायमानो विलासवतीभवनं पट्टराज्ञीसदनमगमज्जगाम । **गत्वा चेति** । गत्वा च गमनं कृत्वा च ससंभ्रमेण सहसा कृतं विहितमभ्युत्थानमुत्थानं ययैवंविधाम् । अत एवोत्प्रेक्षते—इन्दूदयस्य चन्द्रोदयस्यावलोकनं निरीक्षणं तेन विलोलां चञ्चलां समुद्रस्य जलधे-

एवावादीत्—'देवि, पश्यैषा त्वमपि वधूमुखावलोकनसुखस्य कृते न ताम्यसीत्युपालभमानेव देवीं, वत्सस्य यौवनारम्भसूत्रपातरेखा, आवयोस्तारुण्यदुर्विलसितानिवर्तनाज्ञा, विजृम्भमाणा श्मश्रुरागशोभा विवाहमङ्गलसंपादनायादिशति। त्वमपरं किमादिशसीति प्रष्टव्या। तदादिशतु देवी कथ्यमानेऽपि किमपरम्। अद्याप्यपहरसि वदनमन्यतो व्रीडया। पृष्टा वा कर्तव्यं नाज्ञापयसि। वरमातासि संवृत्ता। जानामि चन्द्रापीडस्योपर्यप्रीतिरेषा, यदेवमेतत्कार्येष्वनादरोऽवधीरणा च' इत्येवंविधैर्नर्मप्रायैरालापैः सुखायमानचेताश्चिरमिव स्थित्वा शरीरस्थितिसंपादनाय निरगमत्।

कादम्बरीसमागमत्वरादानाय स्मरसर्वास्त्रमोक्षमिव कुर्वद्भिश्चन्द्रपादैर्द्विगुणीकृतमन्मथोत्साहो गमनसंज्ञाशङ्खनादायादिदेश।

अथ गगनतललब्धविस्तारः, विजृम्भमाण इव दिक्कुञ्जेषु, आवर्त-

वेलामिवाम्भसो वृद्धिमिव विलासवतीमूर्ध्वस्थित एव शुकनासोऽवादीदब्रवीत्। किमवादीदित्याह—देव(वि) इति। हे देवि हे स्वामिनि; पश्य विलोकय। एषा विलासवती त्वमपि भवत्यपि वधूमुखस्यावलोकनसुखं निरीक्षणसौख्यं तस्य कृते न ताम्यसि न खेदं करोषि। इति देवीं विलासवतीमुपालभमानेवोपालम्भं ददानेव वत्सस्य चन्द्रापीडस्य यौवनारम्भस्य सूत्रपातरेखेव रेखा। नवीनप्रारम्भे शिल्पिभिः सूत्रपातरेखा क्रियते इति सर्वसंमतम्। आवयोः शुकनासराज्ञोस्तारुण्यस्य यौवनस्य दुर्विलसितानि दुश्चेष्टितानि तेभ्यो निवर्तनस्य दूरीभवनस्याज्ञेव आज्ञा। अत्र सर्वत्र रूपकम्। एवंविधा विजृम्भमाणा विस्तारं प्राप्यमाणा श्मश्रुरागशोभा कूर्चरागच्छविर्विवाहलक्षणं यन्मङ्गलं शुभक्रिया तस्य संपादनाय करणायादिशति कथयति। त्वं विलासवत्यपरमन्यत्किमादिशसि कथयसीति प्रष्टव्या पृच्छाविषयीकार्या। तत्तस्माद्धेतोः कथ्यमानेऽप्युच्यमानेऽपि मय्यपरमन्यद्देवी किमादिशतु किं कथयतु। अद्यापि व्रीडया लज्जयान्यतो वदनं मुखमपहरसि तिर्यग्मुखं स्थापयसि। पृष्टा वा पृच्छाविषयीकृता वा कर्तव्यं कृत्यं नाज्ञापयसि नाज्ञां ददासि। त्वं वरमाता संवृत्ता जातासि। अहं जानाम्याकलयाम्येषा चन्द्रापीडस्योपर्यप्रीतिररुचिः, यदेवमेतत्कार्येषु पूर्वोक्तकृत्येष्वनादरोऽनुत्साहोऽवधीरणावज्ञा च। एवंविधैरेतादृशैर्नर्मप्रायैर्बर्करसदृशैः। 'बर्करः पशुनर्मणोः' इति हैमानेकार्थः। आलापैः संभाषैः सुखायमानं सुखकृच्चेतो यस्यैवंविधश्चिरमिव चिरसदृशं स्थित्वा शरीरस्थितेर्देहस्थितेः संपादनं करणं तस्यै निरगमन्निर्ययौ।

कादम्बर्याः समागमो मेलापस्तस्य त्वरादानाय स्मरस्य कंदर्पस्य सर्वास्त्राणि समग्रशस्त्राणि तेषां मोक्षं कुर्वद्भिरिव सृजद्भिरिव।

अथेति। शङ्खनादादेशानन्तरं शङ्खध्वनिर्जलजनिनाद उदतिष्ठदुत्थितो बभूव। इतः शङ्खनिनादं विशेषयन्नाह—गगनतलेति। गगनतले व्योमतले लब्धः

मान इवाभ्रंलिहनगरीप्राकारमण्डलाभ्यन्तरे, समारोहन्निवोत्तुङ्गगोपुराट्टालकशिखराणि, चलन्निव हर्म्यान्तरालेषु, विकसन्निव चतुष्कचत्वरेषु, प्रसरन्निव राजमार्गेषु, परिभ्रमन्निव भवनसंकटेषु, प्रविशन्निवोद्याननगवनगह्वरेषु, संमूर्च्छन्निव प्रासादकुक्षिषु, तत्क्षणप्रतिबोधितानां गृहसरोजिनीसारसानामनुवर्त्यमान इव तारतरदीर्घेण रणितेन, विच्छिद्यमान इव मुहुर्मुहुः स्वभावगद्गदेन भवनहंसानां कलरवेण, तारदीर्घतरः शङ्खध्वनिरुदतिष्ठत्। अनन्तरं प्रणम्यमानो राजपुत्रसहस्रैः प्रसुप्तपुरजनतयासंबाधेनापि राजवर्त्मना बहुत्वात्तुरङ्गमबलस्य कृच्छ्रलब्धसंचारः कथंकथमपि निर्जगाम नगर्याः। निर्गत्य दशपुरगामिना मार्गेण प्रावर्तत गन्तुम्।

अथोद्यमानैरिव रयवाहिना सकलदिङ्मुखप्रसृतेन ज्योत्स्नाजल-

प्राप्तो विस्तारो येन सः। दिक्कुञ्जेषु ककुब्निकुञ्जेषु विजृम्भमाण इव कोशं प्राप्यमाण इव। अभ्रंलिहो व्योमव्यापी यो नगर्याः प्राकारमण्डलं वप्रपरिधिस्तस्याभ्यन्तरे मध्य आवर्तमान इव भ्रममाण इव उत्तुङ्गान्यत्युच्चानि यानि गोपुराणां प्रतोलीनामट्टालकानि तदुपरिवर्तिसदनानि तेषां शिखराणि शृङ्गाणि तानि समारोहन्निव समारोहणं कुर्वन्निव। हर्म्याणि भवनानि तेषामन्तरालेषु विचालेषु चलन्निव गच्छन्निव। चतुष्काणि संजवनानि चत्वराङ्गनानि चतुर्मार्गाणि वा तेषु विकसन्निव विकाशं प्राप्नुवन्निव राजमार्गेषु श्रीपथेषु प्रसरन्निव विस्तरन्निव। भवनसंकटेषु गृहसंकीर्णस्थानेषु परिभ्रमन्निव भ्रमणं कुर्वन्निव। उद्यानस्य वनस्य नगाः पर्वतास्तेषां वनान्यरण्यानि तेषां गह्वराणि गहनान्युद्यानानि च नगाश्च गह्वराणि च। इतरेतरद्वंद्वो वा। तेषु प्रविशन्निव प्रवेशं कुर्वन्निव। प्रासादानां देवभूपसद्मनां कुक्षिष्वभ्यन्तरप्रदेशेषु संमूर्च्छन्निव। समर्थीभवन्निव। तत्क्षणं तत्कालं प्रतिबोधितानां जागरितानां गृहसरोजिन्यः सदननलिन्यस्तासां सारसा लक्ष्मणास्तेषामतिशयेन तारोऽत्युच्चध्वनिस्तारतरस्तेन दीर्घेणायतेन रणितेन शब्दितेनानुवर्त्यमान इवानुगम्यमान इव स्वभावेन प्रकृत्या गद्गदेन गद्गदरूपेण भवनहंसानां गृहसितच्छदानां कलरवेण मनोज्ञशब्देन मुहुर्मुहुर्वारंवारं तारोऽत्युच्चध्वनिस्तेन दीर्घतरोऽत्यायतः। **अनन्तरं चेति**। राजपुत्रसहस्रैर्नृपसुतसहस्रैः प्रणम्यमानो नमस्क्रियमाणः प्रसुप्तो यः पुरजनस्तस्य भावस्तत्ता तयासंबाधेनाप्यसंकटेनापि राजवर्त्मना राजमार्गेण तुरङ्गमबलस्याश्वसाधनस्य बहुत्वात्कथंकथमपि कृच्छ्रेण कष्टेन लब्धः प्राप्तः संचारः संचरणं येनैवंभूतो नगर्या अवन्त्या निर्जगाम निर्ययौ। निर्गत्य च निर्गमनं कृत्वा च दशपुरगामिना दशपुरानुयायिना मार्गेणाध्वना गन्तुं प्रावर्तत प्रवृत्तोऽभूत्।

[अथ] रयवाहिना रयसा वेगेन वहति स तथा तेन सकलदिङ्मुखप्रसृतेन

स्रोतसा वैशम्पायनालोकनत्वरितस्य चन्द्रापीडमनस इव तुल्यं वहतो जङ्घानिलेनेन्द्रायुधस्याकृष्यमाणैरिव वाजिभिस्तावत्येवापररात्रवेलया योजनत्रितयमेवालङ्घयत् । अथाध्वश्रमापहरणायेव प्रवृत्ते वातुमाह्लादकारिणि मातरिश्वनि, क्रमेण पाण्डुतां गतवति चन्द्रबिम्बे, गलति चन्द्रिकालोके, नश्यन्तीषु तारकापङ्क्तिषु, पुनर्विभाव्यमानसहजश्यामकान्तिषु सलिलादिवोन्मज्जत्सु तरुलताविटपेषु, अर्कावलोकेनेव सह विस्तीर्यमाणम्, आयासितायततरदृष्टिभिरप्यदृष्टपर्यन्तम्, अनुजीविभूभृच्छतसहस्रकल्पितावष्टम्भम्, संचारिणं द्वितीयमिव मेदिनीसंनिवेशम्, अजलवाहिनीप्रवेशगम्भीरं प्राणिमयमपरपारमष्टममिव महासमुद्रम् मन्दमन्दरास्फालनलुलित-

---

सकलदिङ्मुखानि समग्रककुभाननानि तेषु प्रसृतेन विस्तृतेन ज्योत्स्नैव जलं पानीयं तस्य स्रोतः प्रवाहस्तेनोह्यमानैरिव वहनं प्राप्यमाणैरिव वैशम्पायनस्यालोकनं निरीक्षणं तत्र त्वरितस्योत्सुकस्य चन्द्रापीडमनस इवेन्द्रायुधस्य तुल्यं सदृशं वहतश्चलतोऽस्य जङ्घानिलेनाकृष्यमाणैरिवाकृष्टैरिव वाजिभिरश्वैः । योऽत्युत्कृष्टगामी भवति स मन्दचारिणमाकर्षत्येव । तावत्या एवापररात्रवेलयापररात्र उच्चन्द्रस्तस्या वेलावसरस्तया योजनत्रितयमेव द्वादशक्रोशानेवालङ्घयन्नुल्लङ्घितवान् । **अथेति** । योजनत्रितयोल्लङ्घनानन्तरमध्वश्रमो मार्गक्लमस्तस्यापहरणायेव दूरीकरणायेव मातरिश्वनि वायौ वातुमितस्ततश्चलितुं प्रवृत्ते सति । इतो वायुं विशेषयन्नाह— **आह्लादेति** । आह्लादः प्रमोदस्तं करोतीत्येवंशीलः स तथा तस्मिन् । **क्रमेण चेति** । क्रमेण परिपाट्या पाण्डुतां शुक्लतां चन्द्रबिम्बे शशिमण्डले गतवति प्राप्तवति सति । शशांकलग्ने चन्द्रसंबद्धे चन्द्रिकालोके चन्द्रगोलिकाप्रकाशे गलति क्षरतिसति । तारकापङ्क्तिषु नक्षत्रश्रेणिषु नश्यन्तीषु विलयं गच्छतीषु सत्सु । **पुनरिति** । पुनर्विभाव्यमाना पुनर्ज्ञायमाना सहजा स्वभावजा श्यामा कान्तिर्येषामेवंभूतेषु तरुलताविटपेषून्मज्जत्सूपर्यागच्छत्सु । अर्कावलोकेनेव सूर्यावलोकेनेव सह विस्तीर्यमाणं विस्तारं प्राप्यमाणम् । आयासिता आयासं प्रापिता आयततरा दीर्घतरा या दृष्टयस्ताभिरप्यदृष्टोऽनवलोकितः पर्यन्तः प्रान्तो यस्य तत्तथा । अनुजीविनां सपर्याकारिणां भूभृतां राज्ञां पर्वतानां च यच्छतसहस्रं लक्षं तेन कल्पितोऽवष्टम्भ आश्रयो यस्य तत्तथा । संचारिणं संचरणशीलं द्वितीयमपरं मेदिन्या वसुधायाः संनिवेशमिव रचनाविशेषमिव । न विद्यते जलं यस्यामेवंविधा वाहिनी सेना तस्याः प्रवेशेनागमनेन गम्भीरं गभीरं प्राणिमयं प्राणिभिर्निष्पन्नं न विद्यते परः पारो यस्य तत्तथा । अत एवोत्प्रेक्षते—अष्टमं महासमुद्रमिव । महाजलधिमिव । मन्दं शनैर्यन्मन्दरस्य मेरोरास्फालनमासमन्ताद्भ्रमणं तेन लुलितमेकीभूतं

कल्लोलजालाकुलस्य महाजलधेर्लीलया निविशमानं स्कन्धावारमद्राक्षीत्। दृष्ट्वा चाकरोच्चेतसि—'अहो भद्रकं भवति, यद्यचिन्तितागमन एव प्रविश्य वैशम्पायनं पश्यामि' इति। एवं चिन्तयित्वा छत्रचामरादिभिः स्वचिह्नैः सह निवारिताशेषराजपुत्रलोको जवविशेषग्राहिभिस्त्रिचतुरैस्तुरङ्गमैरनुगम्यमानो मूर्धानमावृत्योत्तरीयेण रयविशेषग्राहिणेन्द्रायुधेन नानाव्यापारव्यग्रसकललोकमचिन्तित एव स्कन्धावारमाससाद। प्रविशंश्च प्रत्यावासकं वहन्नेव 'कस्मिन्प्रदेशे वैशम्पायनावासः' इति पप्रच्छ। ततस्तत्संनिहिताभिः स्त्रीभिरितरत्वादप्रत्यभिज्ञाय यथारब्धकर्मव्यग्राभिरेवोद्बाष्पशून्यवदनाभिः 'भद्र, किं पृच्छसि। कुतोऽत्र वैशम्पायनः' इत्यावेद्यमाने 'आः पापाः, किमेवमसंबद्धं प्रलपथ' इति शून्यहृदय एव ताः प्रतारयन्नन्तर्भिन्नहृदयत्वान्नापराः पृच्छन्नेवोत्रस्त इव हरिणशावकः, यूथपरिभ्रंशविलोल इव करिकलभः, धेनुविरहादुत्कर्ण

कल्लोलजालं तरंगपटलं तेनाकुलस्य व्याकुलीभूतस्य महाजलधेर्महासमुद्रस्य लीलया क्रीडया निविशमानं स्थाप्यमानं सैन्यमद्राक्षीदित्यन्वयस्तु प्रागेवोक्तः। दृष्ट्वा च विलोक्य च चेतसि चित्तेऽकरोत्। अहो इत्याश्चर्ये। भद्रकं क्षेमं भवति जायते, यद्यचिन्तितमतर्कितमागमनं यस्यैवंभूतोऽहं प्रविश्य प्रवेशं कृत्वा वैशम्पायनं पश्याम्यवलोकयामि। एवममुना प्रकारेण चिन्तयित्वा मनसिकृत्वा छत्रचामरादिभिरातपवारणवालव्यजनप्रमुखैः स्वचिह्नै राजलक्ष्मभिः सह सार्धं निवारितः प्रतिषिद्धोऽशेषराजपुत्रलोको येनैवंभूतो जवविशेषग्राहिभिर्गतिविशेषगामिभिस्त्रयश्च चत्वारश्च त्रिचतुरास्तैस्तुरङ्गमैरश्वैरनुगम्यमानोऽनुयायमान उत्तरीयेणोपरिवस्त्रेण मूर्धानमुत्तमाङ्गमावृत्याच्छाद्य रयविशेषग्राहिणा जवविशेषगामिनेन्द्रायुधेनाश्वेन नानाव्यापारेण व्यवहारेण व्यग्रो व्याकुलः सकललोको यस्मिन्नेवंभूतं स्कन्धावारं सैन्यनिवेशमचिन्तित एवाससाद प्राप्तवान्। प्रविशंश्च प्रवेशं कुर्वंश्च प्रत्यावासकं प्रत्यावासं वहन्नेव व्रजन्नेव कस्मिन्प्रदेशे वैशम्पायनावास इति पप्रच्छेति पृष्टवान्। ततस्तदनन्तरं यथारब्धं यत्कर्म क्रिया तेन व्यग्राभिरेवोद्बाष्पेण शून्यं वदनं यासां ताभिस्तस्य वैशम्पायनावासस्य संनिहिताभिः समीपवर्तिनीभिः स्त्रीभिरितरत्वाद्भिन्नत्वादप्रत्यभिज्ञायानुपलक्ष्य हे भद्र हे शुभवन्, किं पृच्छसि किं प्रश्नं करोति(षि)। अत्र वैशम्पायनः कुतः। इत्यावेद्यमान इति ज्ञाप्यमाने आः पापाः पापिष्ठाः, किमसंबद्धमसमञ्जसं प्रलपथेति शून्यहृदय एव विमनस्कचित्त एव ताः स्त्रियः प्रतारयन्वञ्चयन्नन्तर्मध्ये भिन्नं हृदयं यस्य तस्य भावस्तत्त्वं तस्मादपरा अन्या न पृच्छन्न पृच्छां कुर्वन्नेवोत्रस्तश्चकितो हरिणशावक इव मृगबाल इव। यूथात्स्वजातिसमुदायाद्यः परिभ्रंशो भिन्नीभावस्तेन विलोलश्चञ्चलः करिकलभ इव हस्तिनिस्त्रिंशदब्दकरिपोत इव। 'कलभस्त्रिंशदब्दकः' इति हैमः। धेनुविरहात्सुरभिवियोगादुत्कर्ण उच्चश्रवणस्तर्णक इव वत्सक इव। न

इव तर्णकः, न किंचिद्वदन् न किंचिदाकर्णयन्, न किञ्चिन्निरूपयन्, न क्वचित्तिष्ठन्, न कंचिदाह्वयन्, क्वागतोऽस्मि, किमर्थमागतोऽस्मि, क्व चलितोऽस्मि, क्व गच्छामि, किं पश्यामि, किमारब्धं मया, किं वा करोमि, इति सर्वमेवाचेतयमानोऽन्ध इव, बधिर इव, मूक इव, जड इव, आविष्ट इव, कटकमध्यदेशं यावत्तादृशेनैव वेगेनावहत्।

अथेन्द्रायुधप्रत्यभिज्ञानाद्वार्तयैवानुप्रधावितराजपुत्रदर्शनाच्च देवश्चन्द्रापीड इति समन्तात्ससंभ्रमप्रधावितानामचेतितोत्तरीयस्खलनानामुद्बाष्पशून्यदृष्टीनां दूरादेव लज्जया प्रणामक्रियया च सममेवावनमतां राजन्यसहस्राणां मुखान्यवलोक्य 'क्व वैशम्पायनः, इत्यपृच्छत्। ततश्च ते सर्वे सममेव 'अस्मिंस्तरुतलेऽवतरतु तावद्देवः। ततो यथावस्थितं विज्ञपयामः' इति न्यवेदयन्। चन्द्रापीडस्य तेन तेषां स्फुटाख्यानादपि कष्टतरेण वचसान्तःशल्यगर्भं स्फु-

---

किंचिद्वदन्ब्रुवन्, न किंचिदाकर्णयञ्शृण्वन्, न किंचिन्निरूपयन्कथयन्, न क्वचित्तिष्ठन्गतिनिवृत्तिं कुर्वन्, न किं (कं) चिदाह्वयन्नाह्वानं कुर्वन्, क्वागतोऽस्म्यायातोऽस्मि, किमर्थं किंप्रयोजनमागतोऽस्मि, क्व कुत्र चलितोऽस्मि, क्व गच्छामि व्रजामि, किं पश्यामि किमवलोकयामि, किं मयारब्धं प्रारब्धम्, किं वा करो[मि] सृजामीति पूर्वोक्तं सर्वमेवाचेतयमानानोऽज्ञायमानः, अन्ध इव गतात्त इव, बधिर इवाकर्ण इव, मूक इवावागिव, जड इव चेतनारहित इव, आविष्ट इव भूतग्रस्त इव, कटकमध्यदेशं यावत्, तादृशेनैव वेगेन जवेनावहद्बभ्राम।

अथेति। सैन्यान्तःप्रवेशानन्तरमिन्द्रायुधस्य प्रत्यभिज्ञानाच्चिह्नाद्वार्तयैव किंवदन्त्यैवानुप्रधाविताः पृष्ठे त्वरितगत्या चलिता एवंविधा राजपुत्रा नृपसूनवस्तेषां दर्शनाच्चावलोकनाच्च देवश्चन्द्रापीड इति कृत्वा समन्ताद्युगपत्ससंभ्रमेणादरेण प्रधावितानां त्वरितगत्या चलितानाम्, अचेतितमज्ञातमुत्तरीयस्खलनमुपरिवस्त्रपतनं यैस्तेषाम्, उद्बाष्पेण रोदनेन शून्या रिक्ता दृष्टयो येषाम्, तैर्दूरादेव दविष्ठादेव लज्जया त्रपया प्रणामक्रियया नमस्क्रियया च सममेव युगपदेवावनमतां प्रणामं कुर्वतां राजन्यसहस्राणां क्षत्रियसहस्राणां मुखान्याननान्यवलोक्य निरीक्ष्य क्व वैशम्पायन इत्यपृच्छदिति प्रश्नमकार्षीत्। ततः पृच्छानन्तरं ते च सर्वे जनाः सममेव युगपदेव विचार्य विमृश्यास्मिंस्तरुतले वृक्षाधोऽवतरतूत्तरतु तावद्देवो भवान्। तत उत्तरणानन्तरं यथावस्थितं यथाभूतं विज्ञापयामो न्यवेदयाम इति न्यवेदयन्कथयामासुः। चन्द्रापीडस्य तेषां जनानां स्फुटं प्रकटमाख्यानं कथनं तस्मादपि तेन कष्टतरेणातिकृच्छ्रेण वचसा वाक्येनान्तःशल्यं गर्भं यस्यैतादृशं हृदयं स्फुटितमिव विघटितमि-

टितमिव हृदयमासीत् । केवलं तत्कालप्रणयिनी मूर्च्छा सा धारणमकरोत् । तुरगादवतारितं च कुथोपविष्टं च पितुः समवयोभिरनतिक्रमणीयैर्मूर्धाभिषिक्तपार्थिवैर्धृतमात्मानं न वेदितवान् । उपलब्धसंज्ञोऽपि च वैशम्पायनस्यादर्शनात् 'किमेतत् । क्वाहं वर्ते । किं वा मयैतच्चरितम्' इति भ्रमारूढ इव मुह्यद्भिरिवेन्द्रियैः सर्वमेवानुत्प्रेक्षमाणः केवलं स्कन्धावारागमनेनैव तस्याभावादन्यदसंभावयन्, दुर्विषहपीडाभिहतेनेव चेतसा 'किमारटामि, किं हृदयमवष्टभ्य तूष्णीमासे, किमात्मानमाहत्य हृदयात्प्राणैर्वियोजयामि, किमेकाकी कांचिद्दिशं गृहीत्वा प्रव्रजामि' इति कर्तव्यमेव नाध्यगच्छत् । अन्तर्द्रवन्निव दह्यमान इव स्फुटन्निव सहस्रधा दुःखेन चकार चेतसि—'अहो मे रम्योऽप्यरमणीयः संवृत्तो जीवलोकः । वसन्त्यपि शून्यीभूता पृथिवी । सचक्षुषोऽप्यन्धाः ककुभो जाताः । सुनिष्पन्नमपि हतं जन्म । सुरक्षितमपि

वासीदभवत् । तत्काले तदात्वे प्रणयः स्नेहो विद्यते यस्या एवंविधा सा मूर्च्छा केवलं धारणमकरोत् । तुरगादश्वादवतारितमुत्तारितं च कुथोपविष्टं परिस्तोमोपविष्टम् । 'प्रवेणयास्तरणं वर्णः परिस्तोमः कुथो द्वयोः' इत्यमरः । पितुः समं सदृशं वयोऽवस्था येषां तैरनतिक्रमणीयैरनुल्लङ्घनीयैर्मूर्धाभिषिक्तपार्थिवैः कृतराज्याभिषेकनृपैर्धृतमात्मानं स्वं न वेदितवान्न ज्ञातवान् । उपलब्धा प्राप्ता संज्ञा संज्ञानं चेतना येनैवंभूतोऽपि वैशम्पायनस्यादर्शनादनवलोकनादात्मतत्त्वं स्वस्वरूपं तस्य दर्शनान्निरीक्षणात्किमेतत्, क्वाहं वर्ते कुत्र स्थलेऽहमस्मि, किं वा मयैतच्चरितमेतच्चेष्टितमिति भ्रमारूढ इव संशयापन्न इव मुह्यद्भिरिव मोहं प्राप्नुवद्भिरिवेन्द्रियैः करणैः सर्वमेव समग्रमेवानुत्प्रेक्षमाणोऽनालोकमानः केवलं स्कन्धावारागमनेनैव केवलसैन्यस्यैवागमनेन तस्य वैशम्पायनस्याभावादन्यत्तद्भिन्नमसंभावयन्नसंभावनाविषयीकुर्वन्दुर्विषहा दुःसहा या पीडा तयाभिहतेनेव ताडितेनेव चेतसा मनसा किमारटामि पूत्करोमि, किं हृदयं चेतोऽवष्टभ्यावष्टम्भनं कृत्वा तूष्णीमासे मौनेन तिष्ठामि, किमात्मानं स्वमाहत्याहननं कृत्वा हृदयात्प्राणैरसुभिर्वियोजयामि विभिन्नो भवामि । किमहमेकाक्यसहायः कांचिद्दिशं ककुभं गृहीत्वा समादाय प्रव्रजामि गच्छामीति कर्तव्यमेव कृत्यमेव नाध्यगच्छन्न प्राप्तवान् । अन्तर्मध्ये द्रवन्निव द्रवीभवन्निव, दह्यमान इव प्रज्वाल्यमान इव, सहस्रधा सहस्रप्रकारेण दुःखेन स्फुटन्निव द्विधाभवन्निव, चेतसि चित्ते चकार कृतवान् । अहो इत्याश्चर्ये । मे मम रम्योऽपि रुचिरोऽपि जीवलोको जीवाधारक्षेत्रमरमणीयोऽमनोहरः संवृत्तो निष्पन्नः । वसन्त्यपि लोकसमाकुलापि पृथिवी वसुधा शून्यीभूतोद्वसीभूता । सचक्षुषोऽपि सनेत्रस्यापि ककुभो दिशोऽन्धा गतचक्षुषो

मुषितं जीवितफलम् । कं परं पश्यामि । कमालपामि । कस्मै विश्रम्भं कथयामि । केन सह सुखमासे । किमद्यापि मे जीवितेन कादम्बर्यापि च, वैशम्पायनस्य कृते क्व कं पृच्छामि । कमभ्यर्थये । को मे ददातु पुनस्तादृशं मित्ररत्नम् । कथं मया तातस्य शुकनासस्य चात्मा वैशम्पायनेन विना दर्शयितव्यः । किमभिधाय च तनयशोकविह्वलाम्बा मनोरमा वा संस्थापयितव्या । किं भूमिः काचिदसिद्धा तां साधयितुं पश्चात्स्थितः । उत नरपतिः कश्चिदसंघटितस्तत्संघटनाय पश्चात्परिलम्बितः । आहोस्वित्काचिद्विद्यागृहीता तां गृहीतुमयोत्संकलितः' इत्येतानि चान्यानि चान्तरात्मना चिरमधोमुख एव विकल्प्य हृदयास्फुटनाद्विलक्ष्यमिवापराधिनमिव महापातकिनमिवात्मानं मन्यमानो वदनमदर्शयञ्शनैः शनैः कृच्छ्रादिव तानप्राक्षीत्—'मय्यागते किं कश्चिदेवंविधोऽन्तरे सङ्ग्राम उत्पन्नः,

---

जाताः । सुष्ठु निष्प[न्न]मपि संजातमपि जन्म हतं व्यापादितम् । निरर्थकं जातमित्यर्थः । सुष्ठु यथा स्यात्तथा रक्षितमपि गोपितमपि जीवितस्य फलं साध्यं मुषितं लुण्ठितम् । कं परं पश्यामि कमन्यमवलोकयामि । कमालपामि कं व्याहरामि । कस्मै विस्रम्भमाशयं कथयामि निवेदयामि । केन सह सुखं यथा स्यात्तथास उपविशामि । अहमिति अहमिति शेषः । किमद्याप्यद्यप्रभृति मे मम जीवितेन प्राणितेन कादम्बर्यापि च । वैशम्पायनस्य कृतेऽहं क्व कं पृच्छामि कं प्रश्नं करोमि । कं पुरुषमभ्यर्थये प्रार्थये । कः पुरुषः पुनस्तादृशं मित्ररत्नं सुहृन्मणिं [मे] ददातु प्रयच्छतु । मया चन्द्रापीडेन तातस्य पितुः शुकनासस्य मन्त्रिमुख्यस्य च वैशम्पायनेन विना कथमात्मा दर्शयितव्यो दर्शनीयः । तनयशोकविह्वला सुतशोचनविधुराम्बा माता मनोरमा वा मन्त्रिपत्नी वा किमभिधाय किं कथयित्वा संस्थापयितव्या संस्थाप्या । किं भूमिः काचिदनिर्दिष्टनाम्न्यसिद्धासाधिता तां साधयितुमात्मसात्कर्तुं पश्चात्पृष्ठे स्थितः । उतेति पक्षान्तरे । कश्चिन्नरपतिर्भूधनोऽसंघटितोऽमिलितस्तस्य संघटनाय मेलापककृते पश्चात्पृष्ठे परिलम्बितो विलम्बितः । आहोस्विदिति वितर्के । काचिद्विद्या मन्त्रतन्त्रादिरूपा गृहीता स्वीकृता तां गृहीतुं स्वीकर्तुं मया सहोत्संकलितो दूरीभूतः । इत्येतानि पूर्वोक्तान्यन्यानिचान्तरा मध्य आत्मना मनसा चिरं बहुकालमधोमुख एव नीचैर्मुख इ(एव)व विकल्प्य विकल्पनां कृत्वा हृदयस्य वक्षसोऽस्फुटनाद्द्वैधीभावाद्विलक्ष्यमिव वीक्ष्यापन्नमिवापराधिनमिव सागसमिव महापातकिनमिव महापापकारिणमिवात्मानं स्वं मन्यमानो ज्ञायमानो वदनं सुखमदर्शयन्नप्रकाशयञ्शनैः शनैर्मन्दं [मन्दं] कृच्छ्रादिव कष्टादिव ताञ्जनानप्राक्षीदपृच्छत् । मय्यागतेऽत्रायाते कश्चिदेवंविधोऽन्तरे विचाले सङ्ग्रामः समितिः किमुत्पन्नः संजातः । अथवा कश्चिदनिर्दिष्टनामको व्याधिरामय आशु शीघ्रमर्थादन्तं करोतीत्येवंशीलः स तथा भेषजादिभिः साधयितुं

व्याधिर्वा कश्चिदाशुकार्यसाध्यरूपः समुपजातः, येनैतदतर्कितमेव महावज्रपतनमुपनतम्' इति। ते त्वेवं पृष्टाः सर्वे सममेव करद्वयापिहितश्रुतयो व्यज्ञपयन्—'देव, शान्तं पापम्। देवशरीरमिव साग्रं वर्षशतं ध्रियते वैशम्पायनः' इत्येतदाकर्ण्य चोज्जीवित इवानन्दबाष्पनिर्भरः संभाव्य तान्सर्वानेव कण्ठग्रहेणावादीत्—'जीवतो वैशम्पायनस्यान्यत्र क्षणमप्यवस्थानमसंभावयता मयैवं पृष्टा भवन्तस्तज्जीवतीत्येतानि तु तावत्कर्णे कृतान्यक्षराणि अधुना किं वृत्तमस्य, येनासौ नागतः, क्व वा स्थितः, केन वा प्रसङ्गेन, कथं वा तमेकाकिनमुत्सृज्यायाता भवन्तः, कथं वा भवद्भिर्बलादपि नानीतोऽसाविति तदवगन्तुमुत्ताम्यति मे हृदयम्' इति। ते चैवं पृष्टा व्यज्ञपयन्—'देव, श्रूयतां यथावृत्तम्। पृष्ठतः स्कन्धावारमनुपालयद्भिः शनैः शनैर्वैशम्पायनेन सह भवद्भिरागन्तव्यमित्यादिश्य गतवति देवे

निवारयितुमशक्यमसाध्यं रूपं स्वरूपं यस्य स तथा समुपजातः समुत्पन्नः। येन कारणेनैतदतर्कितमेवाविचारितमेव महावज्रपतनं पविपतनमुपनतं प्राप्तमिति। ते तु जना एवममुना प्रकारेण पृष्टाः कृतप्रश्नाः सममेव युगपत्सर्वे करद्वयेन हस्तद्वयेनापिहिता आच्छादिताः श्रुतयः श्रोत्राणि यैरेवंभूता व्यज्ञपयन्विज्ञप्तिं चक्रुः। **देवेति**। हे देव, पापममङ्गलं शान्तं विलयं गतम्। वैशम्पायनः साग्रं वर्षशतं पञ्चविंशत्यधिकहायनशतं ध्रियते। आयुः कर्मणेति शेषः। किमिव देवशरीरमिव। इत्येतत्पूर्वोक्तमाकर्ण्य श्रुत्वा चोज्जीवित इवोत्प्राणित इवानन्दस्य हर्षस्य बाष्पो नेत्राम्बु तस्य निर्भरो यस्मिन्नेवंभूतस्तान्सर्वानेव कण्ठग्रहेण गलालिङ्गितेन संभाव्य संतुष्टान्कृत्वावादीदब्रवीत्। किमवादीदित्याशयेनाह—**जीवत इति**। जीवतः प्राणान्धरतो वैशम्पायनस्यान्यत्रान्यस्मिन्प्रदेशे क्षणमप्यवस्थानमसंभावयतासंभावनां कुर्वता मया चन्द्रापीडेनैवं पूर्वोक्तप्रकारेण भवन्तो जनाः पृष्टाः प्रश्नितास्तज्जीवतीत्येतानि त्वक्षराणि वर्णास्तावदादौ कर्णे श्रोत्रे कृतानि। अधुना सांप्रतमस्य वैशम्पायनस्य किं वृत्तं जातम्, येन हेतुनासौ वैशम्पायनो नागतो नायातः। **क्व वेति**। कुत्र वा स्थितोऽवस्थानं कृतवान्, केन वा प्रसङ्गेन संबन्धेन स्थितः, कथं वा केन प्रकारेण तं वैशम्पायनमेकाकिनमुत्सृज्य त्यक्त्वा भवन्त आयाता आगताः। कथं वा भवद्भिर्युष्माभिर्बलादपि हठात्कारेणासौ मन्त्रिसुतो नानीतः। इत्येतदवगन्तुं ज्ञातुं मे मम हृदयमुत्ताम्यति। उत्पीडयतीत्यर्थः। तं चैवममुना प्रकारेण पृष्टाः प्रश्नविषयीकृताः सन्त इति व्यज्ञपयन्निति विज्ञप्तिं चक्रुः। एतद्दर्शयन्नाह—हे देव हे स्वामिन्, यथावृत्तं यथाभूतं श्रूयतामाकर्ण्यताम्। पृष्ठतः पश्चाद्भागे स्कन्धावारं सैन्यं शनैः शनैर्मन्दं मन्दमनुपालयद्भिरनुरक्षद्भिर्वैशम्पायनेन सह भवद्भिर्युष्माभिरागन्तव्यमित्यादिश्य

तस्मिन्दिवसे सुगृहीतत्वाद्घासेन्धनादिकस्योपकरणजातस्य न दत्तमेव प्रयाणं स्कन्धावारेण । अन्यस्मिन्नहन्याहतायां प्रयाणभेर्यां सज्जीक्रियमाणे साधने प्रातरेवास्मान्वैशम्पायनोऽभ्यधात् । अतिपुण्यं ह्यच्छोदाख्यं सरः पुराणे श्रूयते । तदस्मिन्स्नात्वा प्रणम्य चास्यैव तीरभाजि सिद्धायतने भगवन्तं भवानीप्रभुं महेश्वरं शशाङ्कशकलशेखरं व्रजामः । दिव्यजनसेविता केन कदा पुनः स्वप्नेऽपि भूमिरियमालोकिता ' इत्यभिधाय चरणाभ्यामेवाच्छोदसरस्तीरमयासीत् । तत्र चातिरम्यतयैव सर्वतो दत्तदृष्टिः संचरन्नमरकामिनीश्रोत्रशिखरारोहणप्रणयोचितैस्तरंगानिलाहतिविलोलवृत्तिभिः किसलयैरविरलकुसुममकरन्दलोभपुञ्जितानां च मत्तमधुलिहां मञ्जुना सिञ्जितरवेण दूरादाह्वयन्तमिव तटलतामण्डपमद्राक्षीत् ।

कथयित्वा देवे चन्द्रापीडे गतवति चलिते सति तस्मिन्दिवसे देवप्रयाणकदिने घासो यवसमिन्धनमिध्म । आदिशब्दाद्धस्त्यश्वादीनां भक्ष्यम् । एतत्प्रभृतेरुपकरणजातस्य सामग्रीसमूहस्य सुगृहीतत्वात्सुलभत्वात्स्कन्धावारेण न दत्तमेव न कृतमेव प्रयाणं चलनम् । अन्यस्मिन्नहनि तद्व्यतिरिक्तदिने प्रयाणभेर्यां गमनदुन्दुभावाहतायां ताडितायामश्वादिके साधने सज्जीक्रियमाणे सत्यारोहणार्थमारोप्यमाणपर्याणादिके सति प्रातरेव प्रत्यूष एवास्मान्वैशम्पायन इत्यभ्यधादित्यूचिवान् । इतिद्योत्यमाह—**अतीति** । अतिपुण्यमतिपवित्रं ह्यच्छोदाख्यमच्छोदाभिधानं सरस्तटाकं पुराणे श्रूयत आकर्ण्यते । तस्माद्धेतोरस्मिन्सरसि स्नात्वा स्नानं कृत्वास्यैव सरसस्तीरभाजि तटभाजि सिद्धायतने चैत्ये शशाङ्कस्य चन्द्रस्य शकलं खण्डं तदेव शिखरो मुकुटो यस्यैवंभूतं भगवन्तं माहात्म्यवन्तं भवान्याः पार्वत्याः प्रभुं स्वामिनम् । क्वचित् 'भवाभवप्रभुम्' इति पाठोऽपि दृश्यते । तेन तत्र नित्यानित्यस्वामिनमित्यर्थः । महेश्वरं रुद्रं प्रणम्य नमस्कृत्य च व्रजामो गच्छामः । दिव्यजनसेविता केनास्मत्पक्षपातिना स्वप्नेऽपि स्वापदशायामपि कदा कस्मिन्काले पुनः पूर्वं पुनर्विशेषयोरियं भूमिरियं वसुधालोकितावलोकितेत्यभिधायेत्युक्त्वा चरणाभ्यामेव । पादचारिणेत्यर्थः । अच्छोदसरस्तीरमयासीदाययौ । तत्र च तस्मिन्नच्छोदसरस्यतिरम्यतयातिमनोहरतयैव सर्वतो दत्ता न्यस्ता दृष्टिर्दृग्येनैवंभूतो वैशम्पायनः संचरन्गच्छन्नन्यतमं यत्तटं तीरं तत्र लतामण्डपमद्राक्षीद्दृष्टवानीदिति दूरेणान्वयः । इतो लतामण्डपं विशेषयन्नाह—**अमरेति** । अमराणां देवानां कामिन्यः स्त्रियस्तासां श्रोत्रशिखराणि कर्णाग्राणि तेष्वारोहणे यः प्रणयः स्नेहस्तत्रोचितैर्योग्यैस्तरंगानां कल्लोलानामनिलो वायुस्तस्याहत्या हननेन विलोला चञ्चला वृत्तिर्येषां तैरेवंभूतैः किसलयैः पल्लवैरविरलो निबिडो यः कुसुमानां पुष्पाणां मकरन्दो मरन्दस्तस्य लोभस्तृष्णा तेन पुञ्जितानामेकीभूतानां च मत्तमधुलिहां क्षीब-

दृष्ट्वा च तमतिचिरान्तरितदर्शनं भ्रातरमिव तनयमिव सुहृदमिव चानन्यदृष्टिर्विस्मृतनिमेषेण चक्षुषा विलोकयन्स्तम्भित इव, मूर्च्छयोन्मुच्यमान इवेन्द्रियैः, झगित्युन्मुक्ताङ्गः समुपविश्य भूमौ किमप्यन्तरात्मना स्मरन्निवानुध्यायन्निव निर्विकारवदनो गलितलोचनपयोधारासंतानस्तूष्णीमधोमुखस्तस्थौ । तथावस्थितं तमवलोक्यास्माकमुदपादि चेतसि चिन्ता, येन केनचिदपह्रियन्त एव रसिकहृदयाः परिणामधीरमतयोऽपि, किं पुनः कुतूहलास्पदे प्रथमे वयसि वर्तमानाः तस्मान्नियतमियमस्येमामतिमनोहरां भूमिमालोक्य भावयतो हृदयविकृतिरीदृशी जातेति । न चिराच्च तमेवमवदाम वयम् । दृष्टा दर्शनीयानामवधिरेषा । तदुत्तिष्ठ । संप्रति निवर्तयामः स्नानविधिम् । अतिमहती वेला । सज्जीभूतं साधनम् । प्रयाणाभिमुखः सकलः स्कन्धावारस्त्वां प्रतिपालयन्नास्ते । किमद्यापि विल-

---

भ्रमराणां मञ्जुना रुचिरेण सिञ्जितं ध्वनितं तस्य रवेण शब्देन करणभूतेन दूरादाह्वयन्तमिवाहूतिं कुर्वन्तमिव । **दृष्ट्वा चेति** । अतिचिरकालेनान्तरितं व्यवहितं दर्शनमवलोकनं यस्यैवंभूतं तं लतामण्डपं दृष्ट्वा विलोक्य च भ्रातरमिव सहोदरमिव, तनयमिव सुतमिव, सुहृदमिव मित्रमिव, न विद्यतेऽन्यस्मिन्दृष्टिर्यस्यैवंभूतो विस्मृतो विस्मरणं प्राप्तो निमेषो निमीलनं यस्यैवंभूतेन चक्षुषा विलोकयन्पश्यन्स्तम्भित इव स्तब्धतां नीत इव, मूर्च्छया मोहेनेन्द्रियैः करणैरुन्मुच्यमान इवोत्प्राबल्येन त्यज्यमान इव, झगिति शीघ्रमुन्मुक्तान्यङ्गानि येन सः । अतिशैथिल्यादिति भावः । भूमौ पृथिव्यां समुपविश्योपवेशनं कृत्वान्तरात्मना मनसा किमप्यनिर्वचनीयं स्मरन्निव स्मृतिगोचरीकुर्वन्निव, अनुध्यायन्निवानुचिन्तयन्निव, निर्विकारं निर्विकृतिकं वदनमाननं यस्य सः । गलिता स्रस्ता लोचनाभ्यां या पयोधाराश्रुधारा तस्याः संतानं यस्मिन्नेवंभूतस्तूष्णीं मौनेनाधोमुखो नीचैर्मुखस्तस्थौ स्थितवान् । तथावस्थितं तदवस्थाप्राप्तं च तं वैशम्पायनमवलोक्य निरीक्ष्यास्माकं चेतसि चित्ते चिन्तार्तिरुदपाद्युत्पन्ना । परिणामेऽवसाने धीरा स्थिरा मतिर्बुद्धिर्येषां ते तथा । एवंविधा अपि रसिकहृदयाः कामिजना येनकेनचित्प्रकारेणापह्रियन्त एव वशीक्रियन्त एव । किं पुनः कुतूहलास्पदे कौतुकस्थाने प्रथम आद्ये वयस्यवस्थायां वर्तमानाः स्थिताः । जना इति शेषः । तस्मादिति हेत्वर्थे । नियतं निश्चितमिमामतिमनोहरामतिरमणीयां भूमिं वसुधामालोक्य निरीक्ष्यास्य वैशम्पायनस्येति भावयतश्चिन्तयत ईदृशी हृदयविकृतिश्चित्तविप्लुतिर्जातोत्पन्ना । न चिराच्च चिरकालेन तं वैशम्पायनमेवं वयं अवदाम जल्पाम । दर्शनीयानां विलोकनीयानामेषां भूरवधिः सीमा दृष्टावलोकिता । तदिति हेत्वर्थे । उत्तिष्ठोत्थानं कुरु । संप्रतीदानीं स्नानविधिमाप्त-

म्बितेन ' इति स त्वेवमुक्तोऽप्यस्माभिरश्रुतास्मदीयालाप इव, जड इव, मूक इव, अशिक्षित इव, वक्तुं न किंचिदपि प्रत्युत्तरमदात् । तमेव केवलमनिमेषपक्ष्मणा निश्चलस्तब्धतारकेण संततास्रुस्रोतसा लिखितेनेव चक्षुषा लतामण्डपमालोकितवान् । पुनः पुनश्चास्माभिरागमनायानुरुध्यमानस्तद्ग्रथितदृष्टिरेवास्मान्परिच्छेदनिष्ठुरमाह स्म—' मया तु न यातव्यमस्मात्प्रदेशात् । गच्छन्तु भवन्तः स्कन्धावारमादाय । न युक्तं भवतां चन्द्रापीडभुजबलपरिरक्षितं गते तस्मिन्महासाधनं गृहीत्वास्यां भूमौ क्षणमप्यवस्थानं कर्तुम् ।' इत्युक्तवन्तं च तमकस्मान्नाम किंचिदस्य दैवादेव वैराग्यकारणमुत्पन्नमित्याशङ्क्य सानुनयमागमनाय पुनः पुनः प्रतिबोध्य तादृशासंबद्धानुष्ठानेन जातपीडा निष्ठुरमप्यभिहितवन्तो वयम् । एवं न

वनविधिं निवर्तयामो निष्पादयामः । अतिमहत्यतिगरीयसी वेला वारा । जातेति शेषः । साधनं सैन्यं सज्जीभूतं सज्जं जातम् । सकलः समग्रः स्कन्धावारः सैन्यलोकः प्रयाणाभिमुखो गमनाभिमुखस्त्वां वैशम्पायनं प्रतिपालयन्निरीक्षमाणस्ते तिष्ठति । अद्यापि सांप्रतमपि किं विलम्बितेन । किं कालक्षपणेनेत्यर्थः । स तु वैशम्पायन एवं पूर्वोक्तप्रकारेणास्माभिरुक्तोऽपि कथितोऽप्यश्रुतोऽनाकर्णितोऽस्मदीय आलापो येन स इव, जड इवाचेतन इव, मूक इव एड इव, अशिक्षित इवापाठित इव वक्तुं जल्पितुं न किमपि प्रत्युत्तरं प्रतिवचोऽदाद्दौ । तमेव लतामण्डपमेव केवलमेकमनिमेषं निमीलनरहितं पक्ष्म यस्मिंस्तत्तेन, निश्चला स्थिरात एव स्तब्धा तारका कनीनिका यस्मिंस्तत्तेन, संततं निरन्तरमश्रुस्रोतो नेत्राम्बुप्रवाहो यस्मिंस्तत्तेन, लिखितेनेव चित्रितेनेव चक्षुषा नेत्रेण लतामण्डपमालोकितवान्निरीक्षितवान् । पुनः पुनश्चास्माभिरागमनायात्रानयनकृतेऽनुरुध्यमानोऽनुरोधं क्रियमाणः । तस्मिंल्लतामण्डपे ग्रथिता लग्ना दृष्टिर्यस्यैवंभूत एवास्मान्परिच्छेदनिष्ठुरं निश्चयपरुषमाह स्म कथयामास । मया त्वस्मात्प्रदेशान्न यातव्यं न गन्तव्यम् । भवन्तो यूयं स्कन्धावारं सैन्यमादाय गृहीत्वा गच्छन्तु व्रजन्तु । तस्मिंश्चन्द्रापीडे गते सति चन्द्रापीडस्य राज्ञो भुजबलेन बाहुवीर्येण परिरक्षितं महासाधनं महासैन्यं गृहीत्वादायास्यां भूमौ क्षणमप्यवस्थानं कर्तुं भवतां युष्माकं न युक्तं न न्याय्यम् । इति पूर्वोक्तप्रकारेणोक्तवन्तं कथितवन्तं च तं वैशम्पायनम् । नामेति कोमलामन्त्रणे । अकस्मान्निष्कारणतोऽस्य वैशम्पायनस्य दैवादेव विधेरेव वैराग्यकारणं विरक्ततानिदानं किंचिदुत्पन्नं संजातम् । इत्याशङ्क्येत्यारेक्य सानुनयं सविनयं पुनःपुनरागमनायात्रानयनकृते प्रतिबोध्य प्रतिबोधं दत्त्वा तादृशं तथाविधं यदसंबद्धानुष्ठानमनुचिताचरणं तेन जातपीडा उत्पन्नबाधा वयं निष्ठुरमपि परुषमप्यभिहितवन्तः कथितवन्तः । एवमस्माकं स्थातुं न युक्तं न युक्तिमत् । तारपीडस्य राज्ञोऽनन्तरा-

युक्तमस्माकं स्थातुम् । भवतः पुनर्देवस्य तारापीडस्यानन्तरादार्यशुकनासाल्लब्धजन्मनो देव्या विलासवत्याङ्कलालितस्य देवेन चन्द्रापीडेन सहैकत्र संवृद्धस्य तथा विद्यागृहे महता यत्नेनैव शिक्षितस्य युक्तमिदम्, यज्ज्येष्ठे भ्रातरि सुहृदि वत्सले भर्तरि जगन्नाथे च गुणवति च भवति सर्वमर्पयित्वा गते तत्परित्यागेनात्रावस्थानं कस्यापरस्येदृशो युक्तायुक्तपरिच्छेदः । तिष्ठतु तावदस्माकं तवोपरि स्नेहो भक्तिर्वा । अस्मिंस्तु शून्यारण्ये भवन्तमेकाकिनमुत्सृज्य गताः सन्तो देवेन चन्द्रशीतलप्रकृतिना चन्द्रापीडेनैव किं वक्तव्या वयम् । किमन्यो देवश्चन्द्रापीडोऽन्यो वा भवान् । तदुन्मुच्यतामयं संमोहः । गमनाय धीराधीयताम् ' इत्यभिहितोऽस्माभिरीषदिव विलक्षहासेन वचनेनास्मानवादीत्—' किमहमेतावदपि न वेद्मि, यद्गमनाय मां भवन्तः प्रबोधयन्ति । अपि च चन्द्रापीडेन विना क्षणमप्यहमन्यत्र न पारयामि स्थातुम् । एषैव मे गरीयसी परिबोधना ।

दव्यवहितात् । तत्सदृशादित्यर्थः । आर्यशुकनासाल्लब्धं प्राप्तं जन्मोत्पत्तिर्येन स तस्य देव्या, विलासवत्या अङ्कः क्रोडस्तेन लालितस्य पालितस्य, देवेन चन्द्रापीडेन सहैकत्रैकस्मिन्स्थले संवृद्धस्य वृद्धिं प्राप्तस्य, तथा विद्यागृहे विद्याभ्यसनसद्मनि महता यत्नेनैव गरीयसा प्रयासेनैव शिक्षितस्य शिक्षां ग्राहितस्य भवतस्तव न्याय्यमिदं युक्तम् । यद्यस्मात्कारणाज्ज्येष्ठे वृद्धे भ्रातरि सहोदरे सुहृदि मित्रे वत्सले हितकारके भर्तरि पोषके जगन्नाथे विश्वनायके च गुणवति च भवति वैशम्पायने सर्वं समग्रमर्पयित्वा वितीर्य गते सति तत्परित्यागेन तद्राहित्येनात्राच्छोदसरस्यवस्थानं कस्यापरस्य त्वदभिन्नस्येदृशो युक्तायुक्तयोर्न्याय्यान्याय्ययोः परिच्छेदो निर्मीयते । अस्माकं तवोपरि स्नेहः प्रीतिर्भक्तिर्वा आराध्यत्वेन ज्ञानं तावत्तिष्ठत्वास्ताम् । अस्मिंस्तु शून्यारण्ये जनरहिताटव्यामेकाकिनमसहायं भवन्तमुत्सृज्य त्यक्त्वा गताः सन्तो वयं चन्द्रवच्छीतलप्रकृतिना शिशिरस्वभावेन देवेन चन्द्रापीडेनैव किं वक्तव्याः किं कथनीयाः । किमन्यस्त्वदितरः (देवः) चन्द्रापीडोऽन्यो वा चन्द्रापीडाद्भिन्नो भवांस्त्वम् । तदिति हेत्वर्थे । अयं संमोहोऽज्ञानमुन्मुच्यतां त्यज्यताम् । गमनाय धीर्बुद्धिराधीयतां स्वीक्रियताम् । इति पूर्वोक्तप्रकारेणास्माभिरभिहितः कथित ईषदिव मनागिव विलक्षं वीक्षापन्नं हासो हास्यं यस्मिन्नेवंविधेन वचनेनास्मानवादीदब्रवीत् । अहमेतावदप्येतावन्मात्रमपि किं न वेद्मि न जानामि, यद्यस्मात्कारणाद्भवन्तो मां गमनाय प्रबोधयन्ति प्रबोधं कुर्वन्ति । अपि चेति प्रकारान्तरे । चन्द्रापीडेन विनान्यत्रा (न्य) स्मिन्प्रदेशेऽहं क्षणमपि स्थातुं न पारयामि न समर्थो भवामि । एषैव पूर्वोक्तैव मे मम गरीयसी गरिष्ठा परिबोधना प्रतिबोधः । **तथापीति** । अहं किं करोमि किं कुर्वे । अनेनैव क्षणेन

तथापि किं करोमि । अनेनैव क्षणेन सर्वत्र विगलितं मे प्रभुत्वम् । तथाहि स्मरन्निव किमपि मनो नान्यत्र प्रवर्तते, पश्यन्तीव किमपि न दृष्टिरन्यतो वलति, आसक्तमिव क्वापि हृदयं किमपि न जानाति, निगडिताविव पदमपि दातुं न चरणावुत्सहेते । कीलितेव चास्मिन्नेव स्थाने तनुः । तदात्मना त्वहमसमर्थो यातुम् । अथ बलाद्भवन्तो मां निनीषवः, तत्रापि चलितस्यास्मात्प्रदेशादात्मनो जीवितधारणं न संभावयामि । अत्र तु पुनस्तिष्ठतो यदेतदन्तर्हृदये किमप्यनवसीयमानं विपरिवर्तते मे । येनैव विधृतोऽस्मि तेनैवावश्यं धार्यन्ते प्राणा इति चेतसि मे । तदलं निर्बन्धेन । गच्छन्तु भवन्तः । भवतु यावज्जीवमातृप्तेश्चन्द्रापीडदर्शनसुखम् । अल्पपुण्यस्य तु तन्मे प्राप्तमपि करतलादेवैवमाच्छिद्य दैवेन नीतम्' इत्यभिदधानश्च कौतुकात् 'किमेतत्, येनैवं भाषसे । नायासि देवस्य चन्द्रापीडस्य समीपम्' इत्यस्माभिः पुनःपुनः पृष्टोऽप्यभ्यधात्—'लज्जेऽहमेवं

समयेन मे मम प्रभुत्वं सामर्थ्यं सर्वत्र सर्वस्मिन्स्थले विगलितं विनष्टम् । तदेव दर्शयन्नाह—**तथाहीति** । मनोऽन्यत्र किमपि न प्रवर्तते । अत उत्प्रेक्षते—स्मरन्निव स्मृतिं कुर्वन्निव । दृष्टिर्दृक्किमप्यन्यतो न वलति न पश्चान्निवर्तते । अत उत्प्रेक्षते—पश्यन्तीव विलोकयन्तीव । हृदयं चेतः क्वापि कुत्रापि किमपि न जानाति नावकलयति । अत उत्प्रेक्षते—आसक्तमिवालग्नमिव । चरणौ पादौ पदमपि दातुं नोत्सहेते नोत्साहं कुर्वाते । अत उत्प्रेक्षते—निगडिताविव नियन्त्रिताविव । अस्मिन्नवस्थाने मे तनुः शरीरं कीलितेव कील्या नियन्त्रितेव । तत्तस्मात्कारणादात्मना तु स्वेन त्वहं यातुमितो गन्तुमसमर्थोऽक्षमः । अथेति प्रकारान्तरे । भवन्तो यूयं बलाद्धठात्मां वैशम्पायनं निनीषवो नेतुमिच्छवः । तत्रापि तस्मिन्नपि प्रदेशेऽस्मात्प्रदेशाच्चलितस्य गन्तुं प्रवृत्तस्यात्मनः स्वस्य जीवितधारणं न संभावयामि नावकलयामि । **अत्र त्विति** । अस्मिन्स्थले पुनस्तिष्ठतो मे यदेतदन्तर्हृदये चेतसि किमप्यनिर्दिष्टनामकमनवसीयमानमज्ञायमानं विपरिवर्तते परिभ्रमति । येनैवाहं विधृतोऽस्मि । इति मे मम चेतस्यस्ति । इति द्योत्यमाह—**तेनैवेति** । तेनैव हृदयान्तर्वर्तिना प्राणा असवोऽवश्यं निश्चयेन धार्यन्ते ध्रियन्ते । तत्तस्माद्धेतोर्निर्बन्धेनात्याग्रहेणालं मृतम् । भवन्तो यूयं गच्छन्तु व्रजन्तु । चन्द्रापीडस्य दर्शनमवलोकनं तदेव तस्माद्वा सुखं यावज्जीवं यावत्प्राणधारणं तावदातृप्तेर्भवतु संपद्यताम् । अल्पपुण्यस्य तु मे मम तद्दर्शनसुखं प्राप्तमपि लब्धमपि करतलादेव हस्ततलादेव । एवं पूर्वोक्तन्यायेनाच्छिद्याक्षिप्य दैवेन विधिना नीतं गृहीतमित्यभिदधान इति ब्रुवाणश्च कौतुकात्कुतूहलेनैतत्किं वर्तते, येन हेतुना त्वमेवं भाषस एवं वदसि देवस्य चन्द्रापीडस्य समीपमभ्यर्णं नायासि नागच्छसि । इत्यस्माभिः पुनःपुनर्वारंवारं

वक्तुम् । तथापि शपामि वयस्यचन्द्रापीडस्यैव जीवितेन, यदि किंचिदपि जानामि यत्कने कारणेन न शक्नोम्यतो गन्तुमिति । अपि च भवतामपि प्रत्यक्ष एवायं वृत्तान्तः । तद् व्रजन्तु भवन्तः' इत्युक्त्वा तूष्णीमभूत् । मुहूर्तादिव चोत्थाय तेषु तेषु रम्यतरेषु तरुतलेषु लतागहनेषु सरस्तीरेषु तस्मिंश्च देवायतने किमपि नष्टमिवान्विष्यन्ननन्यदृष्टिर्बभ्राम । भ्रान्त्वा च चिरमिव खिन्नान्तरात्मा सनिर्वेदमूर्ध्वं निःश्वस्य तस्मिंल्लतागहने पुनरुपविश्य तस्थौ । वयमपि कृतवीरुत्संनिधानास्तत्प्रतिबोधनप्रत्याशया स्थिता एव । गतवति समधिक इव यामद्वये शरीरस्थितिकरणायास्माभिरभ्यर्थितः प्रत्युवाच— 'वयस्यचन्द्रापीडस्य खल्वमी स्वजीवितादपि वल्लभतराः प्राणाः । तद्यदि बलादपि परित्यज्य मां गच्छन्ति, तथाप्येषां संधारणे मया यत्नः कार्यः । किं पुनरगच्छतामेव । चन्द्रापीडदर्शनेनैव चाहमर्थी ।

पृष्टोऽप्यनुयुक्तोऽप्यभ्यधादवोचत् । अहमेवं वक्तुं कथयितुं लज्जे त्रपामि । तथापि लज्जावत्त्वेऽपि वयस्यचन्द्रापीडस्यैव जीवितेन प्राणितेन शपामि शपथं करोमि, यद्यहं किमपि जानाम्यवकलयामि । केन कारणेनातो गन्तुं यन्न शक्नोमि न समर्थो भवामीति । अपि च युक्तयन्तरे । भवतामपि युष्माकमप्ययं वृत्तान्त उदन्तः प्रत्यक्ष एवानुभवसिद्ध एव । तत्तस्माद्धेतोर्भवन्तो व्रजन्तु गच्छन्तु । इत्युक्त्वा तूष्णीमभूत् । मौनेन स्थितवानित्यर्थः । मुहूर्तादिवोत्थाय चोत्थानं कृत्वा च तेषु तेषु रम्यतरेष्वतिमनोहरेषु तरुतलेषु वृक्षतलेषु लतागहनेषु वल्लीगहनेषु सरस्तीरेषु तटाकतटेषु तस्मिंश्च देवायतने चैत्ये किमपि किंचिदपि नष्टमिव गतमिवान्विष्यञ्शोधयन् [न] अन्यस्मिन्दृष्टिर्यस्यैवंभूतो बभ्राम भ्रमणं चकार । चिरमिव चिरकालसदृशं भ्रान्त्वा च भ्रमणं कृत्वा खिन्नः खेदं प्राप्तोऽन्तरात्मा मनो यस्य स सनिर्वेदं सस्वावमाननमूर्ध्वमुपरिष्टान्निःश्वस्य निःश्वासं मुक्त्वा तस्मिन्पूर्वोक्ते लतागहने पुनर्द्वितीयवारमुपविश्योपवि(वे)शनं कृत्वा तस्थौ स्थितवान् । कृतं विहितं वीरुधां वल्लीनां संनिधानं समीपं यैरेवंविधा वयमपि तस्य वैशम्पायनस्य प्रतिबोधनं तस्य प्रत्याशा वाञ्छा तया स्थिता एव । समधिके किंचिदधिके यामद्वये प्रहरद्वितये गतवति व्यतीते सति शरीरस्थितिकरणाय देहधारणाकृतेऽस्माभिरभ्यर्थितः प्रार्थितः प्रत्युवाच प्रत्यब्रवीत् । वयस्यस्य मित्रस्य चन्द्रापीडस्य खलु निश्चयेनामी प्राणाः स्वजीवितादपि स्वकीयजीवितव्यादपि वल्लभतराः । अतिशयेन प्रिया इत्यर्थः । तत्तस्माद्धेतोर्बलादपि हठादपि यदि मां परित्यज्य मुक्त्वा गच्छन्ति व्रजन्ति, तथाप्येषां प्राणानां संधारणे रक्षणे मया यत्नः प्रयासः कार्यः । अगच्छतामव्रजतामेवैषां किं पुनर्भण्यते । चन्द्रापीडदर्शनेनैव चन्द्रा-

न मृत्युना। तदभ्यर्थनैवात्र निष्फला' इत्यभिधायोत्थाय स्नात्वा कन्दमूलफलैर्वनवासोचितां शरीरस्थितिमकरोत्। निर्वर्तितशरीरस्थितौ तस्मिन्वयमपि कृतवन्तः। अनेनैव च क्रमेण विस्मितान्तरात्मानो रात्रौ च दिवा च किमेतदिति तद्वृत्तान्तमेवानुभावयन्तो दिनत्रयं स्थित्वा निष्प्रत्याशास्तदागमनानयनयोः सुकृतशम्बलसंविधानं तत्परिकरं तत्र स्थापयित्वा चागता वयम्। यच्चाग्रतो न प्रेषितः संवादकस्तदेकं तावदन्तरा गच्छतो देवस्यासौ न परापतत्येव। अपरमपि चिरात्प्रविष्टमात्रस्यैव देवस्य मा पुनरागमनक्लेशोऽभूत्' इति। चन्द्रापीडस्य तु तं स्वप्नेऽप्यनुप्रेक्षणीयं वैशम्पायनवृत्तान्तमाकर्ण्य युगपदुद्वेगविस्मयाभ्यामाक्रान्तहृदयस्योदपादि चेतसि—'किं पुनरीदृशस्य सर्वपरित्यागकारिणो वनवासैकशरणस्य वैराग्यस्य कारणं भवेत्। स्वीयं च न पश्यामि किंचित्स्खलितम्। तातप्रसादात्तु मामिव तमपि चरणतललुलितचूडामणयोऽर्चय-

---

पीडावलोकनेनैवाहमर्थी प्रयोजनवान्। न मृत्युना न कालधर्मेण। तस्माद्धेतोरत्र निष्फलैवाभ्यर्थना प्रार्थना। इत्यभिधायेत्युक्त्वोत्थायोत्थानं कृत्वा स्नात्वा च कन्दमूलफलैः कृत्वा वनवासस्योचितां योग्यां शरीरस्थितिं देहसाधनमकरोदकल्पयत्। निर्वर्तिता निष्पादिता शरीरस्थितिर्येनैवंविधे तस्मिन्वैशम्पायने सत्यपि वयमपि कृतवन्तो निष्पादितवन्तः। शरीरस्थितिमिति शेषः। अनेनैव क्रमेण परिपाट्या विस्मितो विस्मयं प्राप्तोऽन्तरात्मा येषामेवंभूता वयं रात्रौ निशायां च दिवा च वासरे किमेतदिति तद्वृत्तान्तं तदुदन्तमनुभावयन्तोऽनुचिन्तयन्तो दिनत्रयं स्थित्वावस्थानं कृत्वा तस्य वैशम्पायनस्यागमनमानयनं च तयोर्निष्प्रत्याशा निराशाः सन्तः सुकृतमेव शम्बलं पाथेयं तस्य संविधानं करणं तस्य तदेव चा(च)परिकरं परिच्छदं तत्र तस्मिन्प्रदेशे स्थापयित्वा च वयमागता आयाताः। **यच्चेति**। यदग्रतः संवादकः संदेशहारको न प्रेषितो न प्रहितः। तत्र नियामकद्वयम्। तदेव दर्शयन्नाह—**तदेकमिति**। एकं तावद्देवस्य गच्छतोऽन्तरा मध्येऽसौ न परापतत्येव मिलितुं न शक्नोत्येव। अपरमप्यन्यदपि नियामकम्। चिराद्बहुकालेन प्रविष्टमात्रस्यागतमात्रस्य देवस्य पुनर्द्वितीयवारमागमनक्लेशो मा भूत्। माङ्योगे लुङ्। चन्द्रापीडस्य तु स्वप्नेऽपि स्वप्नदशायामप्यनुत्प्रेक्षणीयमवितर्कणीयं वैशम्पायनवृत्तान्तं मन्त्रिसुतोदन्तमाकर्ण्य श्रुत्वा युगपत्समकालमुद्वेगोऽरतिर्विस्मय आश्चर्यं च ताभ्यामाक्रान्तं व्याप्तं हृदयं चेतो यस्यैवंभूतस्य। चन्द्रापीडस्येति चेतस्युदपाद्युत्पन्नम्। ईदृशस्यानिर्वचनीयस्य सर्ववस्तुनः परित्यागं करोतीत्येवंशीलस्य वनवास एवैकमद्वितीयं शरणं यस्यैवंभूतस्य वैराग्यस्य कारणं निदानं किं पुनर्भवेत्। स्वीयमात्मीयं च स्खलितं वैगुण्यं किंचिन्मनाङ् न पश्यामि नावलोकयामि।

न्त्येव राजानः । ममेव तस्यापि चेच्छाधिकेषु सर्वोपभोगेषु न किंचिदपि हीयते । ममेव तस्याप्याज्ञा न विहन्यत एव । अहमिव सोऽपि प्रसादान्करोत्येव । मत्त इव तस्मादपि विभेत्येवापराधिजनः । मयीव तस्मिन्नपि सर्वाः संपदः । तमप्यालोक्य मामिवोत्पद्यते स्पृहालोकस्य । अथागच्छंस्तातेनाम्बया वार्यशुकनासेन मनोरमया च तनयस्नेहोचितेन सौहार्देन न संभावितः । विनयाधिक्येच्छुना तातेन शुकनासेन वा किंचित्पीडाकरमभिहितम् । ताडितो वा । तत्रापि नैवासावेव स्नेहतः पिशुनस्वभावो वा, गुरुजनाभक्तो वा, गुणोपादानविमुखो वा, तरलचित्तो वा । यत्किंचनकारी यःकश्चिदिव क्षुद्रप्रकृतिराढ्यपुत्रतागर्वितो दुःशिक्षितो दुर्विनीतो वा, पुत्रैकतादुर्ललितो वा । यो जन्मनः प्रभृति

तातप्रसादात्पितुरनुग्रहात् तु मामिव चन्द्रापीडमिव तमपि वैशम्पायनमपि चरणतलेऽङ्घ्रितले लुलिता लुठिताश्चूडामणयः शिरोमणयो येषामेतादृशा राजानो भूभुजोऽर्चयन्त्येव पूजयन्त्येव । ममेव चन्द्रापीडस्येव तस्यापि वैशम्पायनस्यापीच्छाधिकेषु समीहाभ्यधिकेषु सर्वेषूपभोगेष्वङ्गनादिषु न किंचिदपि मनागपि हीयते । न्यूनं न भवतीत्यर्थः । हीयते इति कर्तरिप्रयोगः । ममेव तस्यापि वैशम्पायनस्याप्याज्ञा निर्देशोऽन्यैर्न विहन्यत एव न खण्ड्यत एव । अहमिव चन्द्रापीड इव सोऽपि वैशम्पायनोऽपि प्रसादान्वस्त्रादिप्रदानरूपान्करोत्येव सृजत्येव । मत्त इव मदिव तस्मादपि वैशम्पायनादप्यपराधिजनो विभेत्येव भीतिं प्राप्नोत्येव । मे(मयी)व मय्येव तस्मिन्नपि वैशम्पायनेऽपि सर्वाः समग्राः संपदो विभूतयः । तमपि वैशम्पायनमप्यालोक्य निरीक्ष्य मामिव चन्द्रापीडमिव लोकस्यापि जनस्यापि स्पृहा वाञ्छोत्पद्यते जायते । आगच्छन्नसौ तातेनाम्बया वार्यशुकनासेन मनोरमया वा तनयः पुत्रस्तस्मिन्स्नेहः प्रीतिस्तस्योचितेन योग्येन सौहार्देन प्रीत्या न संभावितो नालोचितः । विनयः प्रश्रयस्तस्याधिक्यमधिकता तदिच्छतीत्येवंशीलेन तातेन शुकनासेन वा किंचिन्मनाक्पीडाकरं पीडाजनकमभिहितं कथितम् । ताडितो वा प्रहतो वा । तत्रापि ताडनादिष्वप्यसौ वैशम्पायनो मद्विषये स्नेहतः स्नेहान्नैव पिशुनस्वभावः खलप्रकृतिः । गुरुजनानां पित्रादीनां वाऽभक्तोऽनाराधकः । गुणानामुपादानं ग्रहणं तत्र विमुखः पराङ्मुखो । वा तरलं चित्तं यस्य स तथा चञ्चलहृदयो वा । यत्किंचन यत्तत्करोतीत्येवंशीलः स तथा यः कश्चिदिव क्षुद्रप्रकृतिस्तुच्छस्वभाव आढ्यपुत्रतया वा गर्वितः स्मयं प्राप्तो दुःशिक्षितो दुरध्यापितो दुर्विनीतो वा प्रश्रयरहितः, पुत्रस्यैकतैक्यं तया दुर्ललितो दुश्चेष्टितो वा । स जन्मनः प्रभृत्युत्पत्तिमारभ्य सर्वप्रकारेणोपकारिण उपकृतिविधायिनो गुरुजनस्य मातृप्रभृतिलोकस्योपर्येवं खेदं कुर्याद्विदध्यात् । अनुबन्धात्संबन्धाद्वा विरमेन्निवर्तेत । ईदृशस्यैता-

सर्वप्रकारोपकारिणो गुरुजनस्योपरि खेदमेवं कुर्यादनुबन्धाद्विरमेद्वा। प्रशमस्यापीदृशस्य नैष कालः। अद्याप्यसौ विद्वज्जनोचिते गार्हस्थ्य एव न निवेशितः, देवपितृमनुष्यानामानृण्यमेव नोपगतः, अगत्वा चानृण्यमृणत्रयेण बद्धः क्व गतः। न तेन पुत्रपौत्रसंतत्या वंशः प्रतिष्ठां नीतः। नानन्तदक्षिणैर्महाक्रतुभिरिष्टम्। न सत्रकूपप्रपाप्रासादतटाकारामादिभिः कीर्तनैरलंकृता मेदिनी। नाकल्पस्थायि दिशोयायि यशो विप्रकीर्णम्। न गुरवोऽनुवृत्त्या सुखं स्थापिताः। न स्निग्धबन्धूनामुपकृतम्। न प्रणयिनो निर्विशेषविभवतां नीताः। न साधवः परिवर्धिताः। नानुजीविनः संविभक्ताः। न दृष्टाः श्रुता वाङ्गनाः। न जातेन जीवलोकसुखान्यनुभूतानि। न तेन पुरुषार्थसाधनानां धर्मार्थकामानामेकोऽपि हि प्राप्तः। किमेतत्तेन कृतम्' इत्याक्षिप्तचेताश्चिन्तयंश्चिरमिव तस्मिन्नेव तरुतले स्थित्वा शून्यहृदयोऽपि यथाक्रियमाणप्रसादसंमानसंभावनासंभावितं

दृशस्य प्रशमस्यापि नैष कालो नायं समयः। अत्र सर्वत्र वाशब्दो विकल्पार्थः। अद्याप्यद्य यावत्, स वैशम्पायनो विद्वज्जनोचिते पण्डितलोकयोग्ये गार्हस्थ्ये गृहस्थाश्रम एव न निवेशितो न स्थापितः। देवाश्च पितरश्च मनुष्याश्च तेषामानृण्यमनृणभावमेव नोपगतो न प्राप्तः। सुतोत्पादकत्वाभावादिति भावः। आनृण्यमगत्वाऽप्राप्य च ऋणत्रयेण पूर्वोक्तेन बद्धो नियन्त्रितः क्व गतः क्व प्राप्तः। तेन वैशम्पायनेन पुत्रपौत्रसंतत्या। वंशोऽन्वयो न प्रतिष्ठां नीतो न प्रौढिमारोपितः। अनन्ता अपरिमिता दक्षिणा यज्ञसमाप्तेरनन्तरं दानं येष्वेवंविधैर्महाक्रतुभिर्महायज्ञैर्नेष्टं न यज्ञाः कृताः।

उदपानाः सत्रेति। सत्राणि दानशालाः, कूपा अवटाः, प्रपाः पानीयशालाः, प्रासादा देवभूपानां सद्मानि, तटाकानि सरांसि, आरामाः कृत्रिमवनानि, एतत्प्रभृतिभिः कीर्तनैर्नामभिर्मेदिनी वसुधा नालंकृता न विभूषिता। आकल्पस्थाय्यायुगान्तस्थायि दिशोयायि दिग्गमनशीलं च यशः श्लोको न विप्रकीर्णं न विस्तारितम्। गुरवो हिताहितोपदेष्टारोऽनुवृत्त्यानुकूल्येन सुखं यथा स्यात्तथा न स्थापिता नैकत्र स्थितिं कारिताः। स्निग्धाः स्नेहवन्तो ये बान्धवो भ्रातरस्तेषां नोपकृतमुपकृतिर्न कृता। प्रणयिनः सुहृदो निर्विशेषविभवतामशेषैश्वर्यतां न नीता न प्रापिताः। साधवः सज्जना न परिवर्धिता न वृद्धिं प्रापिताः। अनुजीविनः सेवका न संविभक्ता न संविभागीकृताः। न कामुकतया दृष्टा वीक्षिताः श्रुता आकर्णिता वाङ्गनाः स्त्रियः। जातेनोत्पन्नेन सता जीवलोकसुखानि सांसारिकसौख्यानि नानुभूतानि। न भुक्तानीत्यर्थः। तेन वैशम्पायनेन पुरुषार्थसाधनानां पुरुषार्थकरणानां धर्मार्थकामानां मध्य एकोऽप्यन्यतरोऽपि न प्राप्तः। तेन वैशम्पायनेनैतत्किं कृतं किं विहितम्। इति पूर्वोक्तप्रकारेणाक्षिप्तचेता व्याकुलहृदयश्चिरमिव बहुकालसदृशं चिन्तयन्ध्यायंस्तस्मिन्नेव पूर्वोक्त एव तरुतले वृक्षतले स्थित्वा शून्यं हृदयं चेतो यस्यैवंभूतोऽपि यथायोग्यं क्रियमाणा वि-

विससर्ज सकलमेव राजकम् । उत्थाय शनैःशनैर्वासभवनमयासीत् । तत्र चापनीतसमायोगो विमुच्याङ्गानि शयनीये तरुतालवृन्तानिलेन संवीज्यमानोऽङ्गसंवाहकारिभिश्च शनैःशनैरपनीयमानागमनखेदः सकलरजनीप्रजागराखिन्नोऽपि चाप्राप्तनिद्रासुखो दुःखासिकया पुनरपि दुःखान्तरहेतुं चिन्तामेवाविशत्—'यदि तावदप्रतिमुक्तस्तातेनाम्बया वा महति शोकार्णवे निक्षिप्य तौ तनयविरहशोकविक्लवं तातं शुकनासमम्बां च मनोरमामनाश्वास्यास्मादेव प्रदेशाद्गच्छामि, तदा मयापि वैशम्पायनस्यानुकृतं भवति । निवृत्य पुनर्गमने चामुमुक्तिपक्षमाशङ्कते मे हृदयम् । तत्किं करोमि । अथवास्थान एवाप्रतिमुक्तिशङ्का मे प्रियसुहृदात्मानं मां च परित्यजताप्यपरेण प्रकारेण गमनमुत्पादयता कादम्बरीसमीपगमनोपायचिन्तापर्याकुलमतेरुपकृतमेव । तद्धुना वैशम्पायनप्रत्यानयनाय यान्तं न तातो नाम्बापि नार्यशुकनासोऽपि निवारयितुं शक्नोति माम् । गतश्च वैशम्पायन-

---

धीयमाना प्रसादो वस्त्रादिप्रदानम्, संमानमत्यादरः, तयोः संभावना चिन्तना तया संभावितं संस्कृतं सकलमेव समग्रमेव राजकं राजसमूहं विससर्ज गृहगमनाय निदेशं दत्तवान् । शनैःशनैर्मन्दं मन्दं वासभवनं वासगृहमयासीदगमत् । **तत्रेति** । तस्मिन्वासभवनेऽपनीतो दूरीकृतः समायोगः संबन्धः । अन्येषामिति शेषः । येनैवंभूतोऽङ्गानि हस्तपादादीनि विमुच्य । तत्प्रयोजकप्रयत्नाभावादिति भावः । शयनीये शय्यायां तरूणां वृक्षाणां तालवृन्तानि व्यजनानि तेषामनिलेन वायुना संवीज्यमान उद्धूयमानोऽङ्गस्य शरीरस्य संवाहः संमर्दस्तत्कारिभिस्तत्करणशीलैश्च । शनैःशनैर्मन्दंमन्दमपनीयमानो दूरीक्रियमाण आगमनखेदो यस्यैवंभूतः सकला समग्रा या रजनी तस्यां प्रजागरो जागरणं तेन खिन्नोऽपि खेदं प्राप्तोऽपि दुःखेन कृच्छ्रेणासिकावस्थानं तया प्राप्तं निद्रासुखं येनैवंविधः पुनरपि द्वितीयवारमप्येकस्माद्दुःखादन्यानि दुःखानि दुःखान्तराणि तेषां हेतुं निदानभूतां चिन्तां मानसीव्यथामविशत्प्रविष्टोऽभूत् । **यदीति** । तावदादौ तातेन तारापीडेनाम्बया विलासवत्या वाऽप्रतिमुक्तोऽविसृष्टस्तौ मातृपितरौ महति गरिष्ठे शोकार्णवे शुक्समुद्रे निक्षिप्य पातयित्वा । **तनयेति** । तनयस्य वैशम्पायनस्य विरहो वियोगस्तस्माद्यः शोकस्तेन विक्लवं विधुरं तातं शुकनासमम्बां च मनोरमामनाश्वास्याश्वासनामकृत्वास्मादेव प्रदेशात्स्थानाद्यदि गच्छामि व्रजामि, तदा मयापि चन्द्रापीडेनापि वैशम्पायनस्यानुकृतं भवति । सादृश्यं कृतं स्यात् । निवृत्त्य व्याघुट्य पुनर्गमने च मे मम हृदयं चेतोऽमुक्तिपक्षमाशङ्कत आरेकते । तदिति हेत्वर्थे । अहं किं करोमि किं कुर्वे । अथवेति पक्षान्तरे । मे ममाप्रतिमुक्तिशङ्का ततो मोचनं स्यान्न वेति संदेहः अस्थान एवानवसर एव । अयुक्तैवेत्यर्थः । यतः प्रियसुहृदा वल्लभमित्रेण वैशम्पाय-

सहितस्तेनैव पार्श्वेन पुरस्ताद्गमिष्यामि ।' इति निश्चित्य तत्कालकृतं वैशम्पायनवियोगदुःखं परिणामसुखमौषधमिव बहु मन्यमानो मुहूर्तमिव स्थित्वा विश्रान्तः सुखितैरङ्गैरापूरिते तृतीयार्धयामशङ्खे शरीरस्थितिकरणायोदतिष्ठत् । उत्थाय च यत्रैव कादम्बरी तत्रैव वैशम्पायन इति स्वधैर्यावष्टम्भेनैव संस्तभ्य हृदयं शून्यान्तरात्मा पुनरेव संवर्गिताशेषराजलोकः शरीरस्थितिमकरोत् । कृताहारश्च जलमण्डपमयासीत् । तत्र चातिरम्यतया क्षुभितमकरध्वजोत्कलिकासहस्रविषमं जलासारशिशिरतया संधुक्षितसुहृद्वियोगानलं महासमुद्रमिव गम्भीरं तं दिवसमेकाकी कथंकथमपि स्वधैर्ययानपात्रे-

---

नेनात्मानं स्वं मां च चन्द्रापीडं परित्यजता त्यागं कुर्वताप्यपरेणान्येन प्रकारेण विधानेन गमनं यात्रामुत्पादयतोत्पत्तिं कुर्वता कादम्बर्या गन्धर्वसुतायाः समीपेऽभ्यर्णे गमनं यानं तस्योपायचिन्तया पर्याकुला व्याकुला मतिर्यस्यैवंभूतस्य ममोपकृतमेवोपकारः कृत इत्यर्थः । एतन्मिषेण तत्र गमनं सुखेन भविष्यतीत्यर्थः । तत्तस्माद्धेतोर्वैशम्पायनस्य प्रत्यानयनं पश्चादानयनं तस्मै यान्तं व्रजन्तं न तातस्तारापीडो नाम्बापि विलासवत्यपि नार्यशुकनासोऽपि मां चन्द्रापीडं निवारयितुं प्रतिषेधयितुं शक्नोति समर्थो भवति । **गतश्चेति** । तत्र प्राप्तश्च वैशम्पायनसहितस्तेनैव पूर्वपरिशीलितेन पार्श्वेन वामदक्षिणयोरन्यतरेण पुरस्तादग्रे गमिष्यामि व्रजिष्यामि । इति निश्चित्य निश्चयं कृत्वा तत्कालकृतं तदात्वविहितं वैशम्पायनस्य वियोगदुःखं विरहकृच्छ्रमौषधमिव, अर्थात्कटुकभैषज्यमिव, परिणामे प्रान्ते सुखं सौख्यकृद्बहु यथा स्यात्तथा मन्यमानो जानानो मुहूर्तमिव घटिकाद्वयसदृशमिव स्थित्वा विश्रान्तो विश्रामं गतः सुखितैः सुखं प्राप्तैरङ्गैस्तृतीयोऽर्धो यस्मिन्नेवंविधो यो यामः प्रहरस्तस्य शङ्खे जलज आपूरिते वादिते सति शरीरस्थितिकरणायोदतिष्ठदुत्थितो बभूव । उत्थाय चोत्थानं कृत्वैव यत्रैव यस्मिन्नेव स्थले कादम्बरी तत्रैव तस्मिन्नेव प्रदेशे वैशम्पायन इति स्वधैर्यावष्टम्भेनैव स्वकीयसत्त्वावलम्बनेनैव हृदयं चेतः संस्तभ्य संस्तम्भनं कृत्वा शून्योऽन्तरात्मा चेतो यस्य स तथा पुनरेव द्वितीयवारमेव संवर्गित एकीभूतोऽशेषः समग्रो राजलोको यस्यैवंभूतः शरीरस्थितिं देहपालनामकरोदकल्पयत् । कृतो विहित आहारो भोजनं येनैवंविधश्च याभिः । जलमण्डपमयासीत् । **तत्र चेति** । तस्मिन्स्थलेऽतिरम्यतयातिमनोहरतयैकाक्यसहायस्तं दिवसं कथंकथमपि महता कष्टेन स्वं स्वकीयं यद्धैर्यं तदेव यानपात्रं वाहनं तेनालङ्घयदुल्लङ्घितवान् । दिवसं विशेषयन्नाह—**क्षुभितेति** । क्षुभितं क्षुब्धं यन्मकरध्वजस्य कंदर्पस्योत्कलिकासहस्रमुत्कण्ठासहस्रं तेन विषमं विकटं जलस्याम्भस आसारो वेगवद्वृष्टिस्तेन शिशिरतया शीतलतया संधुक्षितः प्रकटीकर्तुमारब्धः सुहृद्वियोगानलो मित्रविरहानलो येन स तम् । महासमुद्रमिव महाजलधिमिव गम्भीरं गभीरम् । विरहाकुलितचेतस्कत्वादप्राप्तप्रान्तामित्यर्थः ।

णालङ्क्रियत् । लोहितायमानातपे च सायाह्ने निर्गत्य बहुलगोमयोपलेपहरिते मन्दमन्दमारुताहतोत्तरलायमानधवलकुसुमप्रकरशोभिनि वासभवनाङ्गणे क्षणमिवास्थाने समासन्नपार्थिवैः सह वैशम्पायनालापेनैव स्थित्वा 'द्वितीय एव यामे चलितव्यम् । सज्जीकुरुत साधनम्' इत्यादिश्य बलाध्यक्षमृक्षोदय एव विसर्जिताशेषराजलोको वासभवनमध्यवसत् । अथातिचिरान्तरितोज्झयनीदर्शनोत्सुको विनापि प्रयाणनान्द्या सकल एव कटकलोकः संवृत्य प्रावर्तत गन्तुम् । आत्मनाप्यलब्धनिद्राविनोदोऽवतरत्येव तृतीये यामे तुरगकरिणीप्रायवाहनेनानातिबहुना राजलोकेन सह विरलकटकसंमर्देन वर्त्मनावहत् । अथाध्वनैव सह क्षीणायां यामवत्यां रसातलादिवोन्मज्जत्सु सर्वभावेषु उन्मीलन्तीष्विव दृष्टिषु, पुनरिवान्यथा सृज्यमाने जीवलोके विभज्यमानेषु निम्नोन्नतेषु, विरलायमानेष्विव वन-

---

लोहितायमानो रक्तायमान आतप आलोको यस्मिन्नेतादृशे च सायाह्ने संध्यायां निर्गत्य गृहाद्बहिरागत्य बहुलं दृढं यद्गोमयं छगणं तेनोपलेप उपलिम्पनं तेन हरिते नीले नीलवर्णे, मन्दं मन्दं यथा स्यात्तथा मारुतेन वायुनाहतस्ताडितोऽत एवोत्तरलायमान उत्कम्पायमानो यो धवलकुसुमप्रकरः श्वेतपुष्पनिकरस्तेन शोभिनि शोभायमाने वासभवनाङ्गणे निवासगृहाजिर आस्थान आस्थानसभायां समासन्नाः पार्श्ववर्तिनो ये पार्थिवा राजानस्तैः सह वैशम्पायनस्यालापेन किंवदन्त्या क्षणमिव क्षणसदृशं स्थित्वास्थाय द्वितीय एव यामे प्रहरे चलितव्यं प्रस्थातव्यम्; साधनं सैन्यं सज्जीकुरुत सज्जयत । बलाध्यक्षं सेनापतिमित्यादिश्येत्यादेशं दत्त्वा ऋक्षोदय एव नक्षत्रोदय एव विसर्जितो गृहगमनाय दत्ताज्ञः अशेषः समग्रो राजलोको येनैवंभूतो वासभवनमध्यमवसदध्यतिष्ठत् । अथेति प्रकारान्तरे । अतिचिरकालेनान्तरितं तिरोहितं यदुज्झयन्याः पुष्पकरण्डिकाया दर्शनमवलोकनं तेनोत्सुक उत्कण्ठितः सकल एव समग्र एव कटकलोकः सैन्यजनः संवृत्य । सज्जीभूयेत्यर्थः । विनापि प्रयाणनान्द्या यात्रापटहवादनं विनापि गन्तुं प्रावर्तत प्रवृत्तोऽभूत् । आत्मनापि स्वेनाप्यलब्धोऽप्राप्तो निद्रायाः प्रमीलाया विनोदो विलासो येनैवंभूतः तृतीये तार्तीयीके यामे प्रहरेऽवतरत्येवावतारं प्राप्नुवत्येव, तुरगा अश्वाः, करिण्यो हस्तिनयः, ता एव प्रायो बाहुल्येन वाहनं युग्यं यस्यैवंभूतेनानतिबहुना स्वल्पेन राजलोकेनोपजनेन सह विरलस्तुच्छः कटकस्य सैन्यस्य संमर्दः संबाधो यस्मिन्नेतादृशेन वर्त्मना मार्गेणावहदगमत् । अथेति प्रकारान्तरे । अध्वनैव मार्गेणैव सह यामवत्यां त्रियामायां क्षीणायां सत्यां सर्वभावेषु समग्रपदार्थेषु रसातलादिव पातालादिवोन्मज्जत्सूपर्यागच्छत्सु, दृष्टिषु दृक्षून्मीलन्तीष्विव, विकसन्तीष्विव पुनरिव द्वितीयवारमिव जीवलोकेऽन्यथाने(न्ये)न प्रकारेण सृज्यमाने निष्पाद्यमाने निम्नानि चोन्नतानि च निम्नोन्नतानि तेषु भावेषु विभज्यमानेषु पृथक्क्रियमाणेषु

गहनेषु, संकुचत्स्विव तरुलतागुल्मेषु, गगनतलमारोहन्त्याः पदे इव बहुललाक्षारसालोहिते दिवसश्रियः, अवश्यायसेकान्नवपल्लव इवोद्भिद्यमाने पूर्वाशालतायाः, कमलिनीरागदायिनि दिवसकर-बिम्बे विस्पष्टे, प्रभातसमये कटकलोकेनैव सह परापतितवा-नुज्जयनीम्।

अथ दूरत एव वैशम्पायनवृत्तान्तमेव समन्ताच्छुश्राव। शृण्वंश्च चकार चेतसि—'बाह्यस्य तावज्जनस्येयमीदृशी समवस्था किं पुनर्येनासावङ्केन लालितः संवर्धितो वा बालचाटवोऽस्यानु-भूताः। तदतिकष्टं मे वैशम्पायनेन विना तातस्य शुकनासस्याम्बाया मनोरमाया वा दर्शनम्' इत्येवं चिन्तयन्नासानिहितोद्बाष्पदृष्टिरदृष्ट-सर्ववृत्तान्त एव विवेशोज्जयनीम्। अवतीर्य च स राजकुलद्वारि प्रविशन्नेवार्यशुकनासभवनं सह देव्या विलासवत्या गतो राजेति शुश्राव। श्रुत्वा च निर्वर्त्य तत्रैव जगाम। गच्छंश्च समीपवर्ती 'हा

सत्सु, वनगहनेष्वरण्यगह्वरेषु विरलायमानेष्विवानिबिडायमानेष्विव सत्सु, तरवो वृक्षाः, लता वल्लयः, गुल्मा गुच्छाः, तेषु संकुचत्स्विव संकोचं प्राप्नुवत्स्विव, दिवस-श्रियो वासरलक्ष्म्या गगनतलं व्योमतलमारोहन्त्या आरोहणं कुर्वन्त्या बहुलो निबिडो यो लाक्षारसो जतुद्रवस्तेनालोहित ईषद्रक्ते पदे इव चरणन्यासे इव, पूर्वा-शालतायाः प्राचीवल्लथा अवश्यायो हिमं तस्य सेकात्सिञ्चनान्नवपल्लवे इव नवीन-किसलये इवोद्भिद्यमान उद्भेदं प्राप्यमाणे, कमलिन्या मृणालिन्या रागदायिनि प्रीतिप्रदे दिवसकरबिम्बे सूर्यमण्डले सति विस्पष्टे, प्रभातसमये प्रत्यूषक्षणे कटक-लोकेनैव सैन्यजनेनैव सहोज्जयनीं विशालां परापतितवान्प्राप्तवान्।

अथेति। उज्जयनीगमनानन्तरं दूरत एव दविष्ठादेव समन्तात्सर्वत्र शुश्रावा-कर्णयामास। शृण्वंश्चेति चेतसि चित्ते चकार। बाह्यस्य बहिःस्थस्य तावज्जनस्य लोकस्येदृशी समवस्था दशा, येनासौ वैशम्पायनोऽङ्केन क्रोडेन लालितः पालितः संवर्धितो वृद्धिं प्रापितः। अस्य वैशम्पायनस्य बालचाटवः शिशुचाटवः। 'चटु-चाटु प्रियप्रायम्' इति हैमः। अनुभूता अनुभवविषयीकृतास्तेषां किं पुनर्भण्यते। तत्तस्माद्धेतोर्मे मम वैशम्पायनेन विना तातस्य शुकनासस्य अम्बाया मनोरमाया वा दर्शनमवलोकनमतिकष्टमतिकृच्छ्रम्। इत्येवं पूर्वोक्तप्रकारेण चिन्तयन्ध्यायन्नासायां गन्धज्ञायां निहिता स्थापितोद्बाष्पा दृष्टिर्येन अदृष्टोऽनिरीक्षितः सर्ववृत्तान्तो येनैवंभूतं एवोज्जयनीं विशालां विवेश प्रविष्टवान्। अवतीर्यावरोहणं कृत्वा च स चन्द्रापीडो राजकुलद्वारि नृपकुलप्रतोल्यां प्रविशन्नेव प्रवेशं कुर्वन्नेवार्यशुकनासभवनं विलास-वत्या सह राजा तारापीडो गत इति शुश्रावाकर्णयामास। श्रुत्वाकर्ण्य च निर्वर्त्य व्यावृत्य तत्रैवार्यशुकनासभवन एव जगाम गतवान्। गच्छन्व्रजंश्च समीपवर्ती

वत्स वैशम्पायन, अद्यापि मदङ्कलालनोचितो बाल एवासि । कथं त्वमेकाकी व्यालशतसहस्रभीषणे निर्मानुषे तस्मिञ्शून्यारण्ये स्थितः । केन तत्रापि सर्वसत्त्वव्याघातकारिणी शरीररक्षा कृता । केन वैषम्यप्रतिपन्थिनी शरीरस्थितिः संपादिता । केन निद्रासुखदायि शयनीयमुपकल्पितम् । कस्त्वयि बुभुक्षिते तृषिते सुषुप्सति वा दुःखितो, ममोत्सङ्गमुत्सृज्य समानसुखदुःखा वधूरपि न पुत्रक, त्वयोपात्ता । आगतमात्रस्यैव ते पितरमनुज्ञाप्यात्यर्थं वधूमुखमालोकयिष्यामीति यन्मया चिन्तितं केवलं तन्मे मन्दपुण्याया न संपन्नम् । अपरं तवापि दर्शनं दुर्लभं भूतम् । वत्स, यत्र तेऽवस्थातुमभिरुचितं नयस्व तत्रैव मामपि पितरं विज्ञप्य । त्वामपश्यन्ती न जीवामि । तात, त्वयाहं शैशवेऽपि नावमानिता, कुतस्तवेयमेकपद एवेदृशी निष्ठुरता जाता ।

निकटस्थो विलासवत्या देव्या स्वयं संस्थाप्यमानां निवार्यमाणामपि मनोरमोमितान्यन्यानि च वचनानि विप्रलपन्ती ब्रुवन्तीमश्रौषीदिति दूरेणान्वयः । इतिद्योत्यमाह—

हा वत्सेति—हा इति खेदे । हे वत्स वैशम्पायन, अद्यापि सांप्रतमपि मदङ्के क्रोडे लालनं तत्रोचितो योग्यो बाल एवासि । कथं त्वमेकाक्यसहायो व्यालानां सर्पाणां शतसहस्रं लक्षं तेन भीषणे भैरवे निर्मानुषे मनुष्यवर्जिते तस्मिन्पूर्वोक्ते शून्यारण्ये ग्रामादिरहितकान्तारे स्थितः । केन तत्रापि शून्यारण्येऽपि सर्वसत्त्वानां समग्रप्राणिनां व्याघातं प्रतिबन्धं करोतीत्येवंशीला शरीररक्षा कृता विहिता । केन विषमस्य भावो वैषम्यं तस्य प्रतिपन्थिनी शत्रुभूता शरीरस्थितिः संपादिता निष्पादिता । केन निद्रायाः सुखं सौख्यं ददातीत्येवंशीलं यच्छयनीयं शयनस्थलमुपकल्पितम् । त्वयि वैशम्पायने बुभुक्षिते क्षुधिते, तृषिते पिपासिते, सुषुप्सति वा स्वापं कर्तुमिच्छति वा । मम मनोरमाया उत्सङ्गमङ्कमुत्सृज्य त्यक्त्वा को दुःखितो दुःखवान् । समाने सदृशे सुखदुःखे यस्या एवंविधा वधूरपि, हे पुत्रक हे सूनो, त्वया नोपात्ता नाङ्गीकृता । आगतमात्रस्यैव समागतमात्रस्यैव ते तव पितरं शुकनासमनुज्ञाप्यानुज्ञां गृहीत्वात्यर्थं भृशं वधूमुखं पत्नीवदनमालोकयिष्यामीति यन्मया चिन्तितं विचारितं केवलं तन्मे मम मन्दपुण्यायाः स्वल्पसुकृताया न संपन्नं न जातम् । अपरं तवापि च भवतोऽपि दर्शनमवलोकनं दुर्लभं दुःप्रापं भूतं जातम् । यदि वत्स, यत्र तेऽवस्थातुमवस्थानं कर्तुमभिरुचितं रुचिविषयीभूतम्, तर्हि पितरं जनकं विज्ञप्य विज्ञप्तिं कृत्वा तत्रैव सरस्तीर एव मामपि मनोरमां नयस्व प्रापय । अन्यथा त्वामपश्यन्त्यनवलोकयन्ती न जीवामि न प्राणिमि । 'तातः पितरि पुत्रयोः' इत्युक्तत्वात् हे तात हे पुत्र, त्वया भवताहं मनोरमा शैशवेऽपि शिशुत्वेऽपि नाव-

आ जन्मनः प्रभृति न दृष्टमेव यस्य कुपितमाननम्, तस्य ते कुतोऽयमेवंविधो मय्यकस्मादेव कोपो यदेवं परित्यज्य स्थितोऽसि। गतोऽप्यागच्छ। शिरसा प्रसादयामि त्वाम्। कोऽपरोऽस्ति मे। देशान्तरपरिचयान्मुक्तो नामास्मासु स्नेहः। क्षणमप्यनन्तरितदर्शनस्य चन्द्रापीडस्योपरि कथं तवेदृशी निःस्नेहता जाता। तात, न भद्रकं त आपतितम्। सर्व एव सुखं स्थापनीयो गुरुजनो दुःखं स्थापितः। न जानाम्येवं कृत्वा किं त्वया प्राप्तव्यम्। एतानि चान्यानि चान्तर्भवनगतां प्रत्यग्रतनयविरहविह्वलां स्वयं देव्या विलासवत्या संस्थाप्यमानामपि मनोरमां विप्रलपन्तीमश्रौषीत्। तेन चातिकरुणेन तत्प्रलापविषेण विह्वल इव निद्रागमेनेव घूर्णमानो निश्चेतनतामनीयत। कथंकथमपि सहजसत्त्वावष्टम्भेनैव संस्तम्भितात्मा प्रविश्य, पितुरपि लज्जमानो वदनमुपदर्शयितुमधोमुख एव निस्पन्दसर्वाङ्गेण मन्दराद्रिणेव शुकनासेन सह मथनावसानस्ति-

---

मानिता नावगणिता। तव भवत इयमेकपद एव सहसैव कुतो निष्ठुरता कठिनता जाता प्रादुर्भूता। यस्य भवतः कुपितं कोपं प्राप्तमाननं मुखमाजन्मनः प्रभृति जन्मदिनादारभ्य न दृष्टमेव न निरीक्षितमेव, तस्य ते तवाकस्मादेव निर्निमित्तादेव मयि विषय एवंविध एतादृशोयं कोपः कुतः। यद्यस्माद्धेतोरेवं पूर्वोक्तप्रकारेण परित्यज्य विहाय स्थितोऽसि। त्वं गतोऽपि सन्नागच्छैहि। त्वां भवन्तं शिरसा मस्तकेन। पादपतनेनेत्यर्थः। प्रसादयामि प्रसन्नीकरोमि। अपरोऽन्यः को मे ममास्ति। नामेति कोमलामन्त्रणे। एकस्माद्देशादन्यो देशो देशान्तरं तस्य परिचयः संस्तवस्तस्मादस्मासु मनोरमाप्रभृतिषु स्नेहः प्रेम मुक्तस्त्यक्तः। क्षणमपि समयमप्यनन्तरितमव्यवहितं दर्शनं यस्यैवंविधस्य चन्द्रापीडस्योपरीदृशी कथं तव निःस्नेहता निःप्रेमता जाता प्रादुर्भूता। तात पुत्र, ते तव भद्रकं कल्याणं नापतितं न जातम्। सर्व एव दुःखं स्थापितो गुरुजनः सुखं स्थापनीयः। एवं कृत्वैवं विधाय किं त्वया प्राप्तव्यं प्रापणीयम्, एवमहं न जानामि नाकलयामि। अन्तर्भवनं मध्यगृहं तत्र गतां प्राप्तां प्रत्यग्रो नवीनो यस्तनयविरहः सुतवियोगस्तेन विह्वलां विधुराम्। मनोरमाया विशेषणे। मनोरमां विप्रलपन्तीमश्रौषीदित्यन्वयस्तु प्रागेवोक्तः। तेनेति। तेन पूर्वोक्तेनातिकरुणेनातिदीनेन तस्य मनोरमायाः प्रलापविषेण विलापगरलेन विह्वल इव विधुर इव निद्रागमेनेव प्रमीलागमेनेव घूर्णमाणो निश्चेतनतामनीयताप्राप्यत। कथंकथमपि महता कष्टेन सहजं निसर्गजं यत्सत्त्वं धैर्यं तस्यावष्टम्भेनैवाश्रयणेनैव संस्तम्भित आत्मा येनैवंभूतः प्रविश्य प्रवेशं कृत्वा पितुरपि जनकादपि वदनमाननमुपदर्शयितुमवलोकनं कारयितुं लज्जमानस्त्रपमानोऽधोमुख एव नीचैर्मुख एव निस्पदं निश्चेष्टं सर्वाङ्गं समग्रं शरीरं यस्यैवंविधेन मन्दराद्रिणेव स्वर्गिगिरिणेव शुकनासेन सह मथनस्यावसानं प्रान्तस्तेन स्तिमितो

१९/१०

मितमिव महार्णवं प्रणम्य पितरं दूरत एवोपाविशत् । उपविष्टं च तं क्षणमिव दृष्ट्वा राजान्तर्बाष्पभरगद्गदेन ध्वनिनाभ्यर्णवर्ष इव जलधरोऽभ्यधात्—'वत्स चन्द्रापीड, जानामि ते स्वजीवितादपि समभ्यधिकां भ्रातुरुपरि प्रीतिम् । पीडा च सुखैकहेतोर्वल्लभजनादेवासंभाव्यायासमुत्पद्यते । तथैव हि न किंचिन्न क्रियते । तज्जन्मनः स्नेहस्य वयसः शीलस्य श्रुतस्य गुरुजनानुशासनस्य विनयाधानस्य च सर्वस्यैवानुचितमिमं भ्रातुः सुहृदश्च ते वृत्तान्तमाकर्ण्य त्वद्दोषमाशङ्कते मे हृदयम् ।' इत्येवंवादिनो नरपतेर्वचनमाक्षिप्य युगपच्छोकामर्षाभ्यामन्धकारिताननः प्रावृडारम्भ इव तडिल्लतादुष्प्रेक्ष्यो विस्फूर्जितेनैव स्फुरिताधरेण शुकनासोऽब्रवीत्—'देव, यदि चन्द्रमस्यूष्मा, दहने चातिशीतलत्वम्, अंशुमालिनि वा तमः, तमस्विन्यां वा दिवसः, महोदधौ वा शोषः, क्षितेरधारणं वा शेषे, परार्था-

---

निश्चलो यो महार्णवः समुद्रस्तं रूपकमेवंभूतं पितरं जनकं प्रणम्य नमस्कृत्य दूरत एवोपाविशन्निषण्णो बभूव । उपविष्टं निषण्णं च तं क्षणमिव समयसदृशं दृष्ट्वा विलोक्यान्तर्बाष्पो मध्यनेत्राम्बु तस्य भरस्तेन गद्गदेन ध्वनिना शब्देनाभ्यर्णे समीपे वर्षो यस्यैवंभूतो जलधरो मेघ इव राजा तारापीडोऽभ्यधादवादीत् । हे वत्स हे चन्द्रापीड, अहं जानाम्याकलयामि ते तव स्वजीवितादपि स्वप्राणितादपि भ्रातुर्वैशम्पायनस्योपरि समभ्यधिकामुत्कृष्टां प्रीतिम् । पीडा च सुखस्यैकोऽद्वितीयो हेतुर्निदानमेवंविधाद्वल्लभजनादेवासंभाव्यायासमतर्कितप्रयासं यथा स्यात्तथोत्पद्यते संजायते । तथैव तेन प्रकारेणैव । हीति निश्चितम् । किंचिन्नमस्ति(कि)यते । अपि तु सर्वं क्रियत एव । यथैव प्रीतिस्तथैव दुःखमपि वल्लभजनादेवातर्कितं जायत इति भावः । तत्तस्माद्धेतोस्ते तव भ्रातुर्बान्धवस्य सुहृदो मित्रस्य च वृत्तान्तमुदन्तमाकर्ण्य श्रुत्वा त्वद्दोषं त्वद्वैगुण्यं मे मम हृदयं चेत आशङ्कत आरेकते । कीदृशं त्वद्दोषम् । जन्मन उत्पत्तेः, स्नेहस्य प्रेम्णः, वयसोऽवस्थायाः, शीलस्य स्वभावस्य, श्रुतस्य ज्ञानस्य, गुरुजनानुशासनस्य गुरुशिक्षायाः, विनयाधानस्य प्रश्रयस्थापनस्य सर्वस्यैव समग्रस्यैवेममनुचितमयोग्यम् । इत्येवंवादिनो ब्रुवतो नरपते राज्ञो वचनं वाक्यमाक्षिप्य निराकृत्य युगपत्समकालं शोकः शुक्, अमर्ष ईर्ष्या, ताभ्यामन्धकारितमन्धकारवदाचरितमाननं मुखं यस्यैवंभूतो विस्फूर्जितेन दीप्तिमता स्फुरितः कम्पितो योऽधर ओष्ठस्तेन शुकनासोऽब्रवीदवोचत् । स्फुरितसाधर्म्यादाह—तडिल्लता विद्युल्लता तया दुःप्रेक्ष्यो दुरालोकनीयः प्रावृडारम्भ इव वर्षाप्रारम्भ इव । किमुवाचेत्याह—**देवेति** । हे देव, यदि चन्द्रमसि चन्द्र ऊष्मा तापः, दहनेऽग्नावतिशीतलत्वमतिशिशिरत्वम्, अंशुमालिनि सूर्ये वा तमोऽन्धकारम्, तमस्विन्यां त्रियामायां वा दिवसः, महोदधौ समुद्रे वा शोषो जलनाशः, शेषेऽनन्ते क्षितेः

नुद्यमो वा साधोः, अप्रियवचननिर्गमो वा स्वजनमुखात्संभाव्यते, ततो युवराजेऽपि दोषः। तत्किमेवमेवानिरूप्य तस्यानात्मजस्य मूढप्रकृतेर्दुर्जातस्य राजापथ्यकारिणो मातृपितृघातिनो मित्रद्रुहः कृतघ्नस्य कर्मचण्डालस्य महापातकिनः कृते कृतयुगावतारयोग्यमात्मनोऽपि गुणवन्तमत्युदारचरितं चन्द्रापीडमेव संभावयति देवः। न ह्यतः परमपरं कष्टतमं किंचिदपि पीडाकारणम्, यद्गुणेषु वर्तमानो दोषेषु संभाव्यत इतरजनेनापि। किं पुनर्गुरुजनेन। यो गुणी गुणैरेवाराधनीयः। कस्यापरस्यात्मा गुणवाननेन ज्ञापनीयः। अपि च जन्मनः प्रभृति देवस्य देव्या विलासवत्याश्चाङ्कलालनया यो न गृहीतस्तस्य मरुत इव दुर्ग्रहप्रकृतेश्चन्द्रापीडोऽपि किं करोतु। स्वयमेवोत्पद्यन्त एवंविधाः शरीरसंभवा महाकृमयः सर्वदोषाश्रया महाव्याधयः, अन्तर्विषा महाव्यालाः, विनाशहेतवो

पृथिव्या अधारणमवहनम्, साधोः सज्जनाद्वा परस्यान्यस्यार्थः कृत्यं तत्रानुद्यमोऽनुद्योगः, स्वजनमुखादात्मीयलोकवदनादप्रियवचनस्यानिष्टवाक्यस्य निर्गमो निःसरणम्। एतेभ्यो यद्येतानि संभाव्यन्ते संभावनाविषयीक्रियन्ते, ततो युवराजेऽपि चन्द्रापीडेऽपि दोषः संभाव्यते। तत्किमेवमेवानिरूप्याज्ञात्वा नात्मानं जानातीत्यनात्मज्ञस्तस्य मूढा प्रकृतिः स्वभावो यस्य स तस्य दुर्जातस्य दुर्भवस्य राज्ञो नृपस्यापथ्यकारिणो हितविघातिनो मातृपितृघातिनो जननीजनकविध्वंसिनो मित्रद्रुहः सुहृद्घातिनः कृतं हन्तीति कृतघ्नस्तस्य कर्मणैव चण्डालः श्वपचस्तस्य महापातकिनो महापापकारिण एवंभूतस्य वैशम्पायनस्य कृते (कृते) युगे योऽवतारोऽवतरणं तस्य योग्यमुचितमात्मनोऽपि भवन्तोऽपि गुणवन्तमौदार्यादिगुणयुक्तमत्युदारचरितमत्युत्कृष्टचरित्रं चन्द्रापीडं देव एवं संभावयति संभावनां करोति। **नहीति**। अतोऽदोषेषु दोषोद्भावनतः परमन्यदपरं किंचिदपि वस्तु कष्टतमं पीडाकारणं न। तदेव दर्शयन्नाह—**यदिति**। यद्गुणेषु वर्तमान इतरजनेनापि पामरलोकेनापि दोषेषु संभाव्यते। गुरुजनेनापि पितृलोकेनापि तु तत्संभावने किं पुनः कथ्यते। कर्तव्योपदेशमाह—**य इति**। यो गुणी गुणवान्स गुणैरेवाराधनीयः सेवनीयः। अनेन गुणिजनेन कस्यापरस्यात्मा स्वयं गुणवाञ्ज्ञापनीयः प्रकाशनीयः। **अपि चेति**। अपि च युक्त्यन्तरे। जन्मनः प्रभृत्युत्पत्तेरारभ्य देवस्य तारापीडस्य देव्या विलासवत्याश्चाङ्कलालनया क्रोडपरिपालनया यो न गृहीतो न स्वायत्तीकृतस्तस्य वैशम्पायनस्य मरुत इव वायोरिव दुर्ग्रहा प्रकृतिः स्वरूपं यस्यैवंभूतस्य चन्द्रापीडोऽपि किं करोतु। किं कुर्यादित्यर्थः। अथ वैशम्पायनोत्पत्तिवैगुण्यमाविःकुर्वन्नाह—**स्वयमेवेति**। एवंविधा एतादृशाः शरीरसंभवा देहोत्पन्ना महाकृमयः क्षुद्रजन्तवः, सर्वदोषाणामाधारभूता महाव्याधयो महारोगाः, अन्तर्मध्ये विषं येषामेवंविधा व्यालाः सर्पाः,

महोत्पाताः, भुजङ्गवृत्तयो महावातिकाः, वक्रचारिणो महाग्रहाः, तमोमयाः प्रदोषाः, मलिनात्मकाः कुलपांसवः, निःस्नेहाः खलाः, निर्लज्जाः कृपणकाः, निःसंज्ञाः पशवोऽपि च, अकाष्ठा दहनाः, निर्गुणा जालिनः, अतीर्था जलाशयाः, निर्गौरवाः खरप्रकृतयः अशिवमूर्तयो महाविनायकाधिष्ठिताः । ये सकलङ्काः कृपाणा इव स्नेहेनैव पारुष्यं लभन्ते । मलिनस्वभावाः करिकपोला इव दानेनैव मलिनतरतामापद्यन्ते । निर्वर्तयो मणिप्रदीपा इव प्रसादेनैव ज्वलन्ति । अङ्गलग्ना भुजङ्गा इव दाक्षिण्यपरिग्रहेणैवेतरे वामाः संजायन्ते । गुणमुक्ताः सायका इव सपक्षाश्रयेण फलेनैव दूरं विक्षि-

---

विनाशस्य विध्वंसस्य हेतवः कारणानि महोत्पाताः क्षितिकम्पनादिरूपाः, भुजङ्गवत्सर्पवद्वृत्तिर्वर्तनं येषामेवंविधा महावाता एव महावातिकाः । स्वार्थे कः । वक्रगामित्वेन भुजङ्गसादृश्यम् । वक्रचारिणः कुटिलगामिनो महाग्रहा राहुप्रभृतयः, तमोमया अन्धकारप्रचुराः प्रदोषा यामिनीमुखानि, मलिना कश्मला आत्मानो येषां ते कुलस्यान्वयस्य पांसवो रेणवो दोषजनकाः, निःस्नेहाः प्रीतिवर्जिताः खलाः, निर्लज्जा निस्त्रपाः कृपणका निःकृपाः, निःसंज्ञा हेयोपादेयादिज्ञानविकलाः पशवोऽपि च तिर्यञ्चोऽपि च [अ]काष्ठा दहना वह्नयः, निर्गुणा औदार्यादिगुणरहिता जालिनो वागुरिकाः, अतीर्था उत्तरणमार्गविकला जलाशयाः पानीयस्थानानि, निर्गौरवा महत्त्ववर्जिताः खरप्रकृतयः कठिनस्वभावाः, अशिवमूर्तयोऽकल्याणमूर्तयो महाविनायकैर्महाविघ्नैरधिष्ठिताः । इयं विरोधोक्तिः । येऽशिवमूर्तयो भवन्ति ते महाविनायकाधिष्ठिता न भवन्तीति महाविरोधः । एते सर्वेऽपि स्वयमेवात्मनैवोत्पद्यन्ते जायन्ते । तथा वैशम्पायनोऽपि ननु मददृष्टस्य कारणतेत्यर्थः । ये जनाः कृपाणा इव खड्गा इव सकलङ्काः । जनपक्षे जनापवादाश्रयाः । खड्गपक्षे सचिह्नाः । स्नेहेनैव प्रेम्णा तैलादिना च पारुष्यं कठिनतां भजन्त आश्रयन्ति । 'स्नेहस्तैलादिकरसद्रव्ये स्यात्सौहृदेऽपि च' इति विश्वः । करिकपोला इव हस्तिगण्डात्परप्रदेशा इव मलिनस्वभावाः कश्मलप्रकृतयः । दानेनैव मदेनैव । पक्षे वितरणेनैव । मलिनतरतामतिकृष्णतामापद्यन्ते प्राप्नुवन्ति । 'दानं गजमदे त्यागे' इति विश्वः । निर्वर्तयो वर्तिरहिता मणिप्रदीपा इव रत्नसदृशेन्धना इव प्रसादेनैव प्रसन्नतयैव ज्वलन्ति दीप्यन्ते । 'प्रसादोऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसत्तिषु' इति विश्वः । अङ्गलग्नाः शरीरसंसृष्टा भुजङ्गा इव सर्पा इव । इतरे पामरजना वामाः प्रतिकूलाः संजायन्ते । केन । दाक्षिण्यं लज्जा तेन परिग्रहः स्वीकारस्तेनैव । गुणाः प्रत्यञ्चा औदार्यादिश्च । 'गुणः प्रधानरूपादौ मौर्व्यां सूदे वृकोदरे' इति विश्वः । ताभ्यां मुक्ता रहिताः सायका इव बाणा इव सह पक्षेण पिच्छेन स्वजनवर्गेण च वर्तमानः सहितः सपक्षः । स एवाश्रयो यस्यैवंभूतेन फलेन लोहादिमयेन साध्येन च । दूरं

प्यन्ते। सरागाः पल्लवा इव दिवसारूढ्यैवापरज्यन्ते। भूतिपरामृष्टा दर्पणा इवाभिमुख्येन सर्वं प्रतीपं गृह्णन्ति। अन्तरस्वच्छवृत्तयः सलिलाशया इव गाढावगाहनेनैव कालुष्यमुपयान्ति। ये च स्निग्धेष्वपि रूक्षाः, ऋजुष्वपि वक्राः, साधुष्वप्यसाधवः, गुणवत्स्वपि दुष्टप्रकृतयः, भर्तर्यप्यभृत्यात्मानः, रागिष्वपि क्रुद्धाः, निरीहादप्यादित्सवः, मित्रेष्वपि द्रोहिणः, विश्वस्तानामपि घातकाः, भीतेष्वपि प्रहारिणः, प्रीतिपरेष्वपि द्वेषिणः, विनीतेष्वप्युद्धताः, दयापरेष्वपि निर्दयाः, स्त्रीष्वपि शूराः, भृत्येष्वपि क्रूराः, दीनेष्वपि दारुणाः। येषां च विपरीतानां गुरव एव लघवः, नीचा एवोच्चैः, अगम्या एव गम्याः, कुदृष्टिरेव सद्दर्शनम्, अकार्यमेव कार्यम्, अन्याय एव न्यायः, अस्थितिरेव स्थितिः, अनाचार एवाचारः, अयुक्तमेव युक्तम्,

---

नि(वि)क्षिप्यन्ते विकीर्यन्ते। 'पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः। केशादेः परतो वृन्दे बले सखिसहायके' इति विश्वः। रागो रक्तिमा प्रीतिश्च ताभ्यां सहवर्तमानाः सरागाः पल्लवा इव किसलया इव दिवसारूढ्यैव दिनवृद्ध्यैवापरज्यन्ते विरक्तीभवन्ति। 'रागोऽनुरक्ते मात्सर्ये क्लेशादौ लोहितादिषु' इति विश्वः। भूतिर्भस्म संपच्च ताभ्यां परामृष्टा आलिङ्गिता दर्पणा इवादर्शा इव। आभिमुख्येन संमुखत्वेन हेतुना सर्वं प्रतीपं पराङ्मुखं गृह्णन्ति ग्रहणं कुर्वन्ति। 'भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि संपदि' इति विश्वः। 'वामं प्रसव्यं प्रतीपं प्रतिलोममपष्ठु च' इति हैमः। अन्तरे विचाले स्वच्छा निर्मला वृत्तिर्येषामेवंविधा ज(सलि) लाशया इव पानीयाश्रया इव गाढमत्यर्थमवगाहनेनैवावलोडनेनैवातिपरिचयेनैव च कालुष्यं कलुषतामुपयान्ति गच्छन्ति। ये च स्निग्धेष्वपि स्नेहलेष्वपि रुक्षा अस्निग्धाः, ऋजुष्वपि सरलेष्वपि वक्रा वामाः, साधुष्वपि सज्जनेष्वप्यसाधवो दुष्टाः, गुणवत्स्वपि गुणोपयुक्तेष्वपि दुष्टप्रकृतयोऽशुभस्वभावाः, भर्तर्यपि स्वामिन्यप्यभृत्यात्मानोऽसेवकाः, रागिष्वपि रक्तेष्वपि क्रुद्धाः कोपवन्तः, निरीहादपि निःस्पृहादप्यादित्सवो ग्रहणेच्छवः, मित्रेष्वपि सुहृत्स्वपि द्रोहिणो द्रोहकर्तारः, विश्वस्तानामपि विश्वासप्रतिपन्नानामपि घातका हिंसकाः, भीतेष्वपि त्रस्तेष्वपि प्रहारिणः प्रहारकारिणः, प्रीतिपरेष्वपि स्नेहपरेष्वपि द्वेषिणो द्वेषवन्तः, विनीतेष्वपि विनयवत्स्वप्युद्धता दुर्विनीताः, दयापरेष्वपि कृपातत्परेष्वपि निर्दया निःकृपाः, स्त्रीष्वपि प्रमदास्वपि शूराः सुभटाः, भृत्येष्वपि सेवकेष्वपि क्रूराश्चण्डाः, दीनेष्वपि दुःखितेष्वपि दारुणा भीषणाः।

येषां चेति। येषां विपरीतानां वामवृत्तीनां गुरव एव शास्तार एव लघवो लघिष्ठाः, नीचा एवाधोवर्तिन एवोच्चैरुच्चाः, अगम्या एवासेव्या एव गम्याः सेव्याः, कुदृष्टिरेव कुदर्शनमेव सद्दर्शनं शोभनतमम्, अकार्यमेवाकृत्यमेव कार्यं कृत्यम्, अन्याय एवानीतिरेव न्यायो नीतिः, अस्थितिरेवामर्यादैव स्थितिर्मर्यादा, अनाचार

अविद्यैव विद्या, अविनय एव विनयः, दौःशील्यमेव सुशीलता, अधर्म एव धर्मः, अनृतमेव सत्यम्। येषां च क्षुद्राणां प्रज्ञा पराभिसंधानाय न ज्ञानाय, श्रुतम्, पराक्रमः प्राणिनामुपघाताय नोपकाराय, उत्साहो धनार्जनाय न यशसे, स्थैर्यं व्यसनासङ्गाय न चिरसंगताय, धनपरित्यागः कामाय न धर्माय। किं बहुना सर्वमेव येषां दोषाय न गुणाय। तदसावपीदृश एव कोऽप्यपुण्यवानुत्पन्नो यस्यैवं कुर्वतो मित्रमहं चन्द्रापीडस्य कथं तस्य द्रोहमाचरामीति नोत्पन्नं चेतसि। एवं कृते चलितवृत्तानां शासितावश्यं तारापीडो देवः पीडितान्तरात्मा मयि कोपं करिष्यतीत्येवमपि नाशङ्कितं मनसा। मातुरहमेवैको जीवितनिबन्धनम्, कथं मया विना वर्तिष्यत इत्येतस्य नृशंसस्य हृदये नापतितम्। पिण्डप्रदो वंशसंतानार्थमहमुत्पादितः पित्रा कथमननुज्ञातस्तेन सर्वपरित्यागं करोमीत्येतदपि यथाजातस्य न बुद्धौ संजातम्। तदेवमसत्पथप्रवृत्तेन नष्टात्मना सुदूरमुद्भ्रान्तेन दुर्दर्शमदृष्टं

एवानाचरणमेव आचरणम्, अयुक्तमेवान्याय्यमेव युक्तं न्याय्यम्, अविद्यैवाज्ञानमेव विद्या ज्ञानम्, अविनय एवाप्रश्रय एव विनयः, दौःशील्यमेव दुःस्वभाव एव सुशीलता सुस्वभावता, अधर्म एवापुण्यमेव धर्मो वृषः, अनृतमेवासत्यमेव सत्यं सूनृतम्। येषां च क्षुद्राणां तुच्छबुद्धीनां श्रुतं ज्ञानं प्रज्ञा प्रतिभा तस्यां पर उत्कृष्ट इत्यभिसंधानाय ज्ञानाय न ज्ञापनाय तत्त्वज्ञानाय, पराक्रमो बलं प्राणिनामुपघाताय विनाशाय नोपकाराय नोपकृतये, उत्साहः प्रगल्भता धनार्जनाय द्रव्यार्जनाय न यशसे न श्लोकाय, स्थैर्यं स्थिरता व्यसनानि मद्यादीनि तेषामासङ्गायासक्तये न चिरसंगताय न चिरमैत्रीहेतवे, धनपरित्यागो धनविसर्जनं कामाय मैथुनाय न धर्माय सुकृताय। किं बहुना किं बहूक्तेन येषां दुरात्मनां सर्वमेव दोषाय वैगुण्याय न गुणाय न हिताय। तत्तस्माद्धेतोरसावपि वैशम्पायन ईदृश एव पूर्वोक्तसदृश एव कोऽप्यपुण्यवान्पापवानुत्पन्नः संजातः, यस्य वैशम्पायनस्यैवं कुर्वतश्चन्द्रापीडस्याहं मित्रं, तस्य चन्द्रापीडस्य कथं द्रोहमाचरामि कुर्वे इति चेतसि नोत्पन्नं नागतम्। एवं कृते सति चलितवृत्तानां भ्रष्टाचाराणां शासिता शिक्षादायकस्तारापीडो देवोऽवश्यं पीडितान्तरात्मा संतापितस्वान्तो मयि विषये कोपं करिष्यति विधास्यतीत्येवमपि मनसा हृदयेन नाशङ्कितं नारेकितम्। मातुर्मनोरमाया जीवितनिबन्धनं प्राणितदानमहमेक एव। कथं तर्हि मया विना मद्व्यतिरेकेण वर्तिष्यते वर्तनं करिष्यतीत्येतस्य वैशम्पायन(स्य) नृशंसस्य निर्दयस्य हृदये चेतसि नापतितं नागतम्। वंशसंतानार्थमन्वयपरम्परायै अहं वैशम्पायनः पिण्डप्रदः पित्रा जनकेनोत्पादितो निष्पादितस्तेन पित्राननुज्ञातोऽदत्ताज्ञः सर्वपरित्यागं करोमि प्रणयामीत्येतदपि यथाजातस्य मूर्खस्य बुद्धौ ज्ञप्तौ न संजातं नोत्पन्नम्। 'अज्ञे

तावन्न नाम कुदृष्टिना दृष्टम्। दृष्टमपि येन न दृष्टं तस्याज्ञानतिमिरान्धस्य किं क्रियताम्। अपरमसौ तिर्यङ्महता यत्नेन शुक इव पाठितः पुष्टश्च देवेन। अथवा विनोददानात्तिरश्चामपि सफल एव शिक्षणायासो भवति। तेऽपि पोषिताः पोषितरि स्नेहमावध्नन्ति। तेऽपि कृतं जानन्ति। तेऽपि परिचयमनुवर्तन्ते। तेषामपि सहजस्नेहो मातापित्रोरुपरि दृश्यत एव। न पुनरस्य नष्टोभयलोकस्य पापकारिणो दुर्जातस्य यस्य सर्वमेवाधस्तादृतम्। अपि चेदृशाचरितेन तेनाप्यवश्यमेव कस्यांचित्तिर्यग्योनौ पतितव्यं येन तावद्दुरात्मना जातेन केवलं सुखं न स्थापिताः सर्व एव वयम्। अपरमेवं दुःखार्णवे निपातिताः। सर्व एव ह्यनाक्षिप्तचेताः प्रवर्तते स्वहिताय

मूढयथाजातमूर्खवैधेयबालिशाः' इत्यमरः। तत्तस्माद्धेतोरेवममुना प्रकारेणासत्पथः कुमार्गस्तत्र प्रवृत्तेन नष्ट आत्मा यस्यैवंभूतेन सुदूरमतिदूरमुद्भ्रान्तेन प्राप्तभ्रमेण दुर्दैवं तावदादौ। नामेति कोमलामन्त्रणे। कुदृष्टिना कुत्सितज्ञानेन दुर्दृष्टा दशावस्था यस्मिन्नेतादृशमदृष्टं न दृष्टं नावलोकितम्। येन दृष्टमप्यवलोकितमपि न दृष्टं न निरीक्षितम्। 'दशावर्तावस्थायां वस्त्रान्ते स्युर्दशा अपि' इति विश्वः। यदिवा 'अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम्' इत्यभिधानात्तदुभयमपि भयं न दृष्टमित्यर्थः। अथवादृष्टं तु न दृश्यत एव। तदपि विपश्चिद्भिर्दृश्यते। अयं तु सुतरां मूर्खो येन तपस्विन्यगम्या भवतीति दृष्टमपि न दृष्टमित्यर्थः। तस्य वैशम्पायनस्याज्ञानमेव तिमिरं तस्मिन्नं तेनान्धस्य गताक्षस्य किं क्रियतां किं विधीयताम्। अपरमन्यदसौ तिर्यग्विवेकविकलत्वात्पशुरूपो महता यत्नेन महोद्यमेन शुक इव कीर इव पाठितोऽध्यापितो देवेन तारापीडेन पुष्टश्च पुष्टीकृतश्च। अथवेति पक्षान्तरे। विनोददानात्क्रीडावितरणात्तिरश्चामपि सफल एव सार्थक एव शिक्षणायासः शिक्षाप्रयासो भवति। तेऽपि तिर्यञ्चोऽपि पोषिताः सन्तः पोषितरि पोषके स्नेहं प्रीतिमावध्नन्ति। कुर्वन्तीत्यर्थः। तेऽपि तिर्यञ्चोऽपि कृतं जानन्ति। कृतज्ञा भवन्तीत्यर्थः। तेऽपि तिर्यञ्चोऽपि परिचयं संस्तवमनुवर्तन्तेऽनुगच्छन्ति। तेषामपि तिरश्चामपि मातापित्रोरुपरि सहजस्नेहः स्वाभाविकप्रेमो दृश्यत एव ईक्ष्यत एव। नष्टो गत उभयलोक इहलोकपरलोकौ यस्यैवंभूतस्य पापकारिणोऽपकर्तुर्जातस्य दुष्टोत्पन्नस्य। कुसुमपुत्रस्येत्यर्थः। अस्य वैशम्पायनस्य न पुनः प्रीतिः मातापित्रोरुपरीत्यर्थः। अस्य वैशम्पायनस्य सर्वमेव विज्ञानादिकमधस्तादधो गतम्। अपि चेति युक्त्यन्तरे। तेनापि वैशम्पायनेनापीष्टाचरितेनेदृक्समाचरितेनाप्यवश्यमेव कस्यांचित्तिर्यग्योनौ पतितव्यं येन वैशम्पायनेन दुरात्मना दुष्टात्मना तावज्जातेनोत्पन्नेन सर्व एव वयं सुखं न स्थापिताः। अपरमन्यदेवममुना प्रकारेण.....

.....अस्माकं दुःखं स्था-

परहिताय च। तस्य तु पुनरस्मानेवं दुःखं स्थापयतो न स्वहितं नापि च परहितम्। किमनेनैवमात्मद्रुहाकृतमिति मतिरेतावन्न बोधपदवीमवतरति। सर्वथा दुःखायैवास्माकं तस्य पापकर्मणो ग्रहोपसृष्टस्य जन्म।' इत्युक्त्वा निःश्वसन्नेवावतस्थौ। तदवस्थं च तं तारापीडः प्रत्युवाच--'एतत्खलु प्रदीपेनाग्नेः प्रकाशनम्, वासरालोकेन भास्वतः समुद्भासनम्, अवश्यायलेशैराह्लादनममृतांशोः, मेघाम्बुबिन्दुभिरापूरणं पयोधेः, व्यजनानिलैरतिवर्धनं प्रभञ्जनस्य, यदस्मद्विधैः परिबोधनमार्यस्य। तथापि प्राज्ञस्यापि बहुश्रुतस्यापि विवेकिनोऽपि धीरस्यापि सत्त्ववतोऽप्यवश्यं दुःखातिपातेन विशुद्धमपि वर्षसलिलेन सर इव मानसं कलुषीक्रियते सर्वस्य। कलुषीकृते च मानसे किमिदमिति सर्वमेव दर्शनं नश्यति। न चित्तमालोचयति। न बुद्धिर्बुध्यते। न विवेकोऽपि विविनक्ति। येन ब्रवीत्यदः। मत्तो लोकवृत्तमार्य एव सुतरां वेत्ति। किमस्ति कश्चिद-

---

पयतो दुःखं कुर्वतो न स्वहितं नात्महितम्, नापि च परहितं नाप्यन्यहितम्। अनेनैव वैशम्पायनेनैवात्मद्रुहात्मघातकेन किं कृतं किं विहितमिति मतिरिति बुद्धिरेतावद्बोधपदवीं ज्ञानमार्गं नावतरति नावगच्छति। सर्वथा सर्वप्रकारेणास्माकं दुःखायैव दुःखहेतोरेव तस्य पापकर्मणो दुष्कृतकारिणो ग्रहोपसृष्टस्य ग्रहग्रहिलस्य जन्मोत्पत्तिः। इत्युक्त्वा निःश्वसन्नेव निःश्वासं मुञ्चन्नेवावतस्थौ स्थितवान्। सैवावस्था दशा यस्यैतादृशं च तं शुकनासं तारापीडः प्रत्युवाच प्रत्यब्रवीत्। खल्विति निश्चयेन। एतत्प्रदीपेन गृह्यमाणेनाग्नेर्वह्नेः प्रकाशनं प्रज्वालनम्, वासरालोकेन दिवसप्रकाशेन भास्वतः सूर्यस्य समुद्भासनमुत्तेजनम्, अमृतांशोश्चन्द्रस्यावश्यायलेशैस्तुहिनकणैराह्लादनं प्रमोदोत्पादनम्, पयोधेः समुद्रस्य मेघाम्बु जीमूतजलं तस्य बिन्दुभिः पृषद्भिरापूरणं भरणम्, प्रभञ्जनस्य वायोर्व्यजनानिलैस्तालवृन्तपवनैरतिवर्धनमतिवृद्धिप्रापणम्, यद्यस्मद्विधैरस्मद्विधैरस्मत्सदृशैरार्यस्य भवतः शुकनासस्य परिबोधनं प्रतिबोधदानम्। तथापीति। एवं सत्यपि प्राज्ञस्यापि बहुश्रुतस्याप्यनेकशास्त्रज्ञस्यापि विवेकिनोऽपि पृथगात्मवतोऽपि धीरस्यापि स्थिरप्रकृतेरपि सत्त्ववतोऽपि साहसवतोऽप्यवश्यं निश्चितं दुःखातिपातेन कृच्छ्रातिपातेन विशुद्धमपि निर्मलमपि सर्वस्य मानसं वर्षसलिलेन वृष्टिपानीयेन सर इव तटाक इव कलुषीक्रियते मलिनीक्रियते। कलुषीकृते च मानसे चित्ते किमिदमिति सर्वमेव समग्रमेव दर्शनं सामान्यज्ञानं नश्यति। न चित्तं मन आलोचयति विचारयति। न बुद्धिर्धिषणा बुध्यते। बोधं प्रयातीत्यर्थः। न विवेकोऽपि पृथगात्मभावोऽपि विविनक्ति पृथक्करोति। येन कारणेन। अदोऽव्यक्ते नपुंसकम्। ब्रवीति वक्ति। मत्तस्तारापीडाल्लोकवृत्तं जनचरितमार्य एव पूज्य एव भवान्सुतरामतिशयेन वेत्ति जानाति।

सावियति लोके, यस्य निर्विकारं यौवनमतिक्रान्तम्। यौवनावतारे हि शैशवेनैव सह गलति गुरुजनस्नेहः। वयसैव सहारोहत्यभिनवा प्रीतिः। वक्षसैव सह विस्तीर्यते वाञ्छा। बलेनैव सहोपचीयते मदः। दोर्द्वयेनैव सह स्थूलतामापद्यते धीः। मध्येनैव सह कार्श्यमुपयाति श्रुतम्। ऊरुयुगलेनैव सहोपचीयतेऽविनयः। श्मश्रुभिरेव सहोज्जृम्भते मलिनताहेतुर्मोहः। आकारेणैव सहाविर्भवन्ति हृदयाद्विकाराः। तद्यथा धवलमपि सरागं सर्वथा दीर्घीभवदपि न दीर्घं पश्यति चक्षुः। अनुपहतेऽपि न प्रविशति गुरूपदेशः श्रोत्रे। स्त्रीरागिण्यपि न विद्यान्तरं विन्दति हृदये। न स्थैर्यमस्थिरप्रकृतौ तरलतायाम्। परित्याज्येषु व्यसनेष्वासङ्गेषु विकाराणां च कारणं प्रायः सरसता। सा च सर्वमेव जलप्रायं कुर्वाणा वर्षातिवृद्ध्यैवोपजायते। अपि च दिवसो दोषागमाय, दोषागमोऽनालोकाय, अनालोकोऽसदृश-

25/10

किमिति प्रश्ने। कश्चित्कोऽपीति लोक एतावति भुवनेऽस्ति विद्यते, यस्य निर्विकारं विकृतिरहितं यौवनं तारुण्यमतिक्रान्तं व्यतीतम्। यौवनावतारे हि तारुण्यप्रादुर्भावे हि शैशवेन बाल्येन सह गुरुजनेषु मातृपितृषु स्नेहः प्रीतिर्गलति क्षरति। वयसा सहावस्थया सहाभिनवा प्रत्यग्रा प्रीतिरारोहत्यारूढा भवति। वक्षसोरसा सह वाञ्छा स्पृहा विस्तीर्यते विस्तीर्णा स्यात्। बलेनैव पराक्रमेणैव सह मदो दर्प उपचीयत उपचयं प्राप्नोति, दोर्द्वयेनैव बाहुयुगलेनैव सह धीर्बुद्धिः स्थूलतां स्थविष्ठतामापद्यते प्राप्नोति। मध्येनैव विलग्नेनैव कार्श्यं कृशतामुपयाति प्राप्नोति श्रुतं ज्ञानम्। ऊरुयुगलेनैव सक्थियुग्मेनैव सहाविनयो हृदयमुपचीयते पुष्टीभवति। श्मश्रुभिरेव कूर्चैरेव सह मलिनताहेतुर्मोहो मौढ्यमुज्जृम्भते विकाशं प्राप्नोति। आकारेण सहाकृत्या सह हृदयाद्विकारा विकृतय आविर्भवन्ति प्रकटीभवन्ति। तदेव दर्शयन्नाह—**तद्यथेति**। धवलमपि शुभ्रमपि चक्षुर्नेत्रं सरागमेव सर्वथा दीर्घीभवदपि न पश्यति दीर्घम्। दीर्घदर्शितं न भवतीत्यर्थः। अनुपहतेऽप्यप्रतिहतेऽपि श्रोत्रे श्रवणे गुरूपदेशो गुरूणां हिताहितोपदेष्टॄणामुपदेशः सुकृताचरणनिर्देशो न प्रविशति न प्रवेशं करोति। स्त्रीषु रागो विद्यते यस्यैवंभूतेऽपि हृदय एकस्या विद्यायाः सकाशादन्या विद्या विद्यान्तरं न विन्दति न लभते। अस्थिरप्रकृतौ चलस्वभावायां तरलतायां चञ्चलतायां सत्यां न स्थैर्यं न स्थिरता। परित्याज्येषु वर्जनीयेषु व्यसनेषु सप्तसु विकाराणां चानृतभाषकत्वादिरूपाणां चासङ्गेष्वासक्तिषु कारणं निदानं प्रायो बाहुल्येन सरसता रसिकत्वं स्यात्। सा च सरसता सर्वमेव समग्रमेव जलप्रायं कुर्वाणा विदधाना वर्षातिवृध्यैव। वर्षा वर्षणम्। पक्षे वर्षाणां वत्सराणामतिवृध्यैवोपजायत उत्पद्यते। **अपि चेति**। अपि च प्रकारान्तरेण। दिवसा दोषागमाय, दोषागमश्चानालोकायानिरीक्षणायाप्रकाशाय च स्यात्। अनालोकश्चासदृशनार्थमसम्यग्ज्ञा-

नार्थम्, असद्दर्शनमविवेकाय, अविवेकोऽसन्मार्गप्रवृत्तये, असन्मार्गप्रवृत्तं च मोहान्धं चेतो भ्राम्यदवश्यमेव स्खलति। स्खलिते चेतसि तल्लज्जा पतत्येव लज्जा। त्रपावरणशून्ये च हृदि प्रविश्य पदं कुर्वन्केन वा विनिवारितो दुर्निवारः सर्वाविनयहेतुः कुसुमधन्वा। विलसति च कुसुममार्गणे केन कार्येण छिद्रसहस्राणि न भवन्ति, यैः सत्त्वमेवाधस्ताद्व्रजति। सत्त्वे चाधो गते किमाश्रित्य न गलति शीलम्। किमवलम्बनं विनयस्य। किं करोत्वनाधारं धैर्यम्। क्व पदमाधत्तां धीः। क्व समाधानमावध्नात्ववष्टम्भः। केन वावष्टभ्य बलान्निश्चलीकृतं मनः। विप्रतिपद्यमानानि केन नियन्त्रितानीन्द्रियाणि। जगन्निन्द्यानि केन निवारितानि दुश्चरितानि। केन वालोकभूतेन तमोभिवृद्धिहेतुरुत्सारितो दोषाभिषङ्गो दृष्टेरुपहन्ता। किं वा दृश्यतामसति बहुदर्शित्वे। बहुदर्शित्वं च तावतः कालस्यैवासंभवात्कुतो भवतु, प्रथमे वयसि येनान्वयव्यतिरेकाभ्यां निश्चित्य

नार्थं च स्यात्। असद्दर्शनं चाविवेकायापृथगात्मने भवति। अविवेकश्चासन्मार्गप्रवृत्तयेऽसत्पथप्रवृत्तये स्यात्। असन्मार्गप्रवृत्तं च भ्राम्यदितस्ततः परिभ्रमन्मोहेनान्धं चेतोऽवश्यमेव स्खलति निपतति। स्खलिते च स्खलनां प्राप्ते चेतसि चित्ते सति तल्लज्जा चेतःसम्बद्धा लज्जा त्रपा पतत्येव यात्येव। त्रपैव लज्जैवावरणमाच्छादनं तेन शून्ये रिक्ते च हृदि हृदये प्रविश्य (प्रवेशं) कृत्वा पदं स्थानं कुर्वन्विदधन्केन वा पुरुषेण सर्वस्य समग्रस्याविनस्याप्रश्रयहेतुः कारणं कुसुमधन्वा कंदर्पो दुर्निवारो दुःखेन निवारयितुं शक्यो विनिवारितो निषिद्धः। कुसुममार्गणे कंदर्पे विलसति विलासं कुर्वति सति केन कार्येण हेतुभूतेन छिद्रसहस्राणि विवरसहस्राणि न भवन्ति न संजायन्ते, यैश्छिद्रसहस्रैः सत्त्वमेव साहसमेवाधस्तादधो व्रजति। सत्त्वे चाधो गते किमाश्रित्य किमाश्रयणं कृत्वा शीलं वृत्तं न गलति न क्षि (क्ष) रति। विनयस्य प्रश्रयस्य किमवलम्बनं किमाधारः। अनाधारमनाश्रयं धैर्यं सत्त्वं च किं करोतु। किं कुर्यादित्यर्थः। धीर्बुद्धिः क्व कुत्र पदं स्थानमाधत्तां विदधताम्। अवष्टम्भ उद्योगः। 'अवष्टम्भः सुवर्णे च स्तम्भप्रारम्भयोरपि। आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोः' इति विश्वः। अवलम्बनं वा क्व समाधानं सुखमाबध्नातु निबध्नातु। केन वावष्टभ्य वशीकृत्य बलाद्धठान्मनश्चेतो निश्चलीकृतम्। केन विप्रतिपद्यमानान्युन्मार्गप्रवृत्तानीन्द्रियाणि करणानि नियन्त्रितानि वशीकृतानि। केन जगन्निन्द्यानि विश्वगर्हितानि दुश्चरितानि दुश्चेष्टितानि निवारितानि दूरीकृतानि। आलोकभूतेन प्रकाशरूपेण केन वानिर्दिष्टनाम्ना (दोषाणां) व्यसनादीनां रात्रेश्चाभिषंगः सम्बन्ध उत्सारितो दूरीकृतः। कीदृशो दोषाभिषङ्गः। तमोऽज्ञानं तमिस्रं च तयोरभिवृद्धिस्तस्य हेतुः कारणम्। पुनः कीदृक्। दृष्टेर्दृशो ज्ञानस्य चोपहन्ता उपघा-

वर्जयति मलिनताम् । अपि च परिणामेऽपि पुण्यवतां केषांचिदेव हि केशैः सह धवलिमानमापद्यन्ते चरितानि । तन्मोहविषयमहाहौ मदविकारगन्धमातङ्गे दुर्विलसितैकराज्ये रतिनिद्रावेश्मनि नवरागपल्लवोद्गमलीलान्तविशेषदुश्चरितचक्रवर्तिनि तारुण्यावतारे सर्वस्यैव विषमतरविषयमार्गपतितस्य स्खलितमापतति । किमेवमार्येण लालनीयस्य पालनीयस्य शिशुजनस्योपर्यावेशो गरीयान्गृहीतः, यदनुचितमपत्यस्नेहस्याक्रोशगर्भमेवमुक्तम् । स्वप्नायमानानामपि यद्गुरूणां मुखेभ्यो निष्क्रामति शुभमशुभं वा शिशुषु तदवश्यं फलति । गुरवो हि दैवतं बालानाम् । यथैवाशिषो

तकः । असति बहुदर्शित्वे किं वा दृश्यतां किमवलोक्यताम् । तावतः कालस्यैवेयतः समयस्यैवासंभवद्बहुदर्शित्वमनेकपदार्थावलोकित्वम् । तच्च प्रथम आद्ये वयस्यवस्थायां कुतो भवतु कुतो जायताम् । येन सति सद्भावोऽन्वयः, असत्यसद्भावो व्यतिरेकः, ताभ्यां निश्चित्य निर्णयं कृत्वा मलिनतां वाच्यतां वर्जयति दूरीकरोति । **अपि चेति** । अपि च युक्त्यन्तरे । प्रदर्शने परिणामेऽपि । वार्धकेऽपि । हीति निश्चये । पुण्यवतां सुकृतवतां केषांचिदेव, न तु सर्वेषाम्, केशैः क्लचैः सह चरितानि चरित्राणि धवलिमानं श्वेतिमानमापद्यन्ते प्राप्नुवन्ति । ' सुकृती पुण्यवान्धन्यः ' इति हैमः । सर्वस्य स्खलितं स्यादिति प्रदर्शयन्नाह—**तन्मोहेति** । तदिति हेत्वर्थे । मोहो मूर्च्छा, विषया रूपरसगन्धशब्दस्पर्शाख्याः, त एव महाहयो महासर्पा यस्मिन् । मदो मुद् मोहसंभेदस्तस्य विकारा विकृतयस्त एव गन्धमातङ्गा गन्धेभा यस्मिन् । दुर्विलसितं दुश्चेष्टितं तदेवैकमद्वितीयं राज्यमाधिपत्यं यस्मिन् । रतिः कामाभिलाषः, निद्रा प्रमीला, तयोर्वेश्मनि गृहे नवरागो नवीनानुरागः स एव पल्लवः किसलयं तस्योद्गमलीलान्ते पर्यवसाने येषामेतादृशानि विशेषदुश्चरितानि विशेषदुश्चेष्टितानि तेषां चक्रवर्तिनि सार्वभौम एवंविधे तारुण्यस्य यौवनस्यावतारे प्रादुर्भावे विषमतरः कठिनतरो यो विषयमार्गः कामपन्थास्तत्र पतितस्य स्रस्तस्य सर्वस्यैव समग्रस्यैव, अर्थाज्जनस्य, स्खलितमापतति । स्खलना स्यादित्यर्थः । तथार्येण पूज्येन भवता शुकनासेन लालनीयस्य लालनां कर्तुं योग्यस्य पालनीयस्य रक्षां कर्तुं योग्यस्यैवंविधस्य शिशुजनस्य बालजनस्योपरि किमेवं किंनिमित्तं गरीयान्गरिष्ठ आवेशो गृहीत आत्तः, यद्यस्माद्धेतोरपत्यस्नेहस्य प्रसूतिप्रेम्णोऽनुचितमयोग्यमाक्रोशोऽभिषङ्गः स एव गर्भे मध्ये यस्यैतादृशमेवमुक्तं कथितम् । एतादृशं वाक्यं सर्वथा न वाक्यमित्याशयेनाह—**स्वप्नायेति** । स्वप्नायमानानामपि निद्रायमाणानामपि गुरूणां हिताहितप्राप्तिपरिहारोपदेष्टॄणां मुखेभ्यो वदनेभ्यः शिशुषु बालेषु यच्छुभमशुभं वा निष्क्रामति निःसरति तदवश्यं निश्चयेन फलति । तच्छब्दवाच्योऽर्थः शिशूनां संजायत इत्यर्थः । तन्नियामकमाह—**गुरव**

गुरुजनवितीर्णा वरतामापद्यन्ते, तथैवाक्रोशाः शापताम् । तद्वैशम्पायनमुद्दिश्य कोपावेशादेव सति परुषमभिदधत्यार्ये महती मे चेतसः पीडा समुत्पन्ना । स्वयमारोपितेषु तरुषु यावदुत्पद्यते स्नेहः, किं पुनरङ्गसंभवेष्वपत्येषु । तदुत्सृज्यतामयममर्षवेगो वैशम्पायनस्योपरि । विरूपकं तु तेन न किंचिदप्याचरितम् सर्वपरित्यागं कृत्वा स्थित इत्येतदपि कारणमविज्ञाय किमेवं दोषपक्षे निक्षिपामः । कदाचिद्गुणी भवत्येवमयमविनयनिष्पन्नो दोष एव । आनीयतां तावदसौ । बुध्यामहे किमर्थमयमेवंविधस्तस्य वयसोऽनुचितोऽपि संवेग उत्पन्नः । ततो यथायुक्तं विधास्यामः ।' इत्युक्तवति तारापीडे पुनः शुकनासोऽभ्यधात्– 'अत्युदारतया वत्सलत्वाच्चैवमादिशति देवः । अन्यदतःपरं किमिवास्य विरूपकं भवेत्, यद्युवराजमुत्सृज्य क्षणमप्यन्यत्रावस्थानमा-

---

इति । हीति निश्चये । बालानां शिशूनां गुरवो मातृपितरो दैवतं परममिष्टम् । अत्रार्थे दृष्टान्तं प्रतिपादयन्नाह—**यथैवेति** । यथैव येन प्रकारेणैव गुरुजनैर्वितीर्णा दत्ता आशिषो मङ्गलसमेतान्याशीर्वचनानि वरतां वाञ्छितं वृणीष्वेति प्रसन्नताप्रेरितं तपस्विनां वचो वरस्तस्य भावस्तत्ता तामापद्यन्ते भजन्ते । 'तपोभिरिष्यते यत्तु देवतादेर्वरो मतः' इति कात्यः । तथैव तेन प्रकारेणैवाक्रोशास्तिरस्काराः शापतां तवानिष्टं भूयादिति क्रोधाविष्टतपस्विनां वचः शापस्तस्य भावस्तत्ता तां प्रतिपद्यन्ते । तत्तस्माकारणाद्वैशम्पायनमुद्दिश्याश्रित्य कोपस्य क्रुध आवेशादभिनिवेशादेवार्ये परुषं कठिनमभिदधति कथयति सति मे मम चेतसो हृदयस्य महती गुर्वी पीडा समुत्पन्ना प्रादुर्भूता । तन्निदानमाविष्कुर्वन्नाह—**स्वयमिति** । स्वयमात्मना रोपितेषूत्तमेषु तरुषु वृक्षेषु यावत्स्नेह उत्पद्यते प्रादुर्भवति । अङ्गसंभवेषु शरीरसमुत्पन्नेष्वपत्येषु प्रजासु किं पुनर्भण्यते किं कथ्यते । तत्तस्माद्धेतोर्वैशम्पायनस्योपर्ययं प्रत्यक्षोपलभ्यमानोऽमर्षवेगः क्रोधसंभव उत्सृज्यतां त्यज्यताम् । वैशम्पायनस्य निर्दोषतां प्रकटयन्नाह—**विरूपकमिति** । तु पुनरर्थे । तेन वैशम्पायनेन न किंचिदपि विरूपकं विरुद्धमाचरितं सेवितम् । सर्वपरित्यागस्तु दूषणं न भवतीत्याशयेनाह—**सर्वपरित्याग इति** । सर्वपरित्यागं कृत्वा स्थित इत्येतदपि कारणं निदानमविज्ञायाज्ञात्वा किमेवमेव दोषपक्षे वैगुण्यकक्षायां वयं निक्षिपामो निक्षेपं कुर्मः । तस्या अपि गुणे निक्षेपमाशङ्क्यन्नाह—**कदाचिदिति** । एवं तादृक्कारणमपेक्ष्यायमविनयनिष्पन्नोऽप्रश्रयजनितो दोष एव कदाचिद्गुणीभवति । गुणः स्यादित्यर्थः । अथ कर्तव्यमाह—**आनीयतामिति** । तावदादावसौ वैशम्पायन आनीयतामानयनविषयीक्रियतामिति बुद्ध्यामहे जानीमहे । वयमिति शेषः । अयमेवंविध ईदृशस्तस्य वैशम्पायनस्य वयसोऽवस्थाया अनु-

त्मेच्छया चेष्टितम् ।' इत्युक्तवति शुकनासे कशयेवान्तस्ताडितो दोषसंभावनयानया पितुरुद्बाष्पदृष्टिरुपविष्ट एवोपसृत्य चन्द्रापीडः शनैः शनैः शुकनासमवादीत्—'आर्य, यद्यपि निरुक्तितो वेद्मि न मदीयेन दोषेण नागतो वैशम्पायन इति, तथापि तातेन संभावितमेव कस्य वापरस्य संभावना नोत्पन्ना । मिथ्यापि तत्तथा यथा गृहीतं लोकेन, विशेषतो गुरुणा । प्रसिद्धिरत्रायशसे यशसे वा दोषगुणाश्रया वाफलवती । परत्र फलदायी कुत्रोपयुज्यते परमार्थः । तदस्या दोषसंभावनायाः प्रायश्चित्तमार्यो दापयतु मे वैशम्पायनानयनाय गमनाभ्यनुज्ञां तातेन । नान्यथा मे दोषशुद्धिर्भवति । किं कारणम् । अनागते तु वैशम्पायने तातस्यानया संभावनया नाप-

दाञ् धातो- र्णिजन्तम्

चितोऽप्ययोग्योऽपि किमर्थं किंप्रयोजनाय संवेगः सर्वपरित्यागलक्षण उत्पन्नः प्रादुर्भूतः । ततस्तत्प्रयोजनं ज्ञात्वैव यथायुक्तं यथोचितं तद्विधास्यामः करिष्यामः । इति पूर्वप्रतिपादितप्रकारेण तारापीड उक्तवति सति पुनर्द्वितीयवारं शुकनासोऽभ्यधादब्रवीत् । किमभ्यधादित्याशयेनाह—**अतीति** । अत्युदारस्य भावोऽत्युदारता तयातिस्फारतया वत्सलत्वाच्च हितकारित्वाच्च देवस्तारापीड एवं पूर्वप्रतिपादितमादिशति कथयति । अनेन विरुद्धं न कृतमिति नृपोक्तं प्रतिक्षिपन्नाह—**अतःपरमिति** । अतः परमन्यद्भवदपि किमिव [विरूपकं] विरुद्धं भवेत् । एतदेव विशदीकुर्वन्नाह—**यदिति** । यद्यस्माद्धेतोर्युवराजं चन्द्रापीडमुत्सृज्य त्यक्त्वात्मेच्छया स्वातन्त्र्येण क्षणमन्यत्रान्यस्मिन्स्थलेऽवस्थानमुपवेशनमाचेष्टितमाचरितम् । अतः परं विरुद्धं किं भवेदित्यर्थः । इति शुकनास उक्तवति कथितवति सत्यनया पितुर्दोषसंभावनया कशयेव चर्ममय्या रज्ज्वेवान्तर्मध्ये ताडितो व्यथित उद्ध्वं बाष्पो नेत्राम्बु यस्यामेवंविधा दृष्टिर्यस्यैवंभूत उपविष्ट एवासीन एवोपसृत्योपसरणं कृत्य चन्द्रापीडः [शनैः]शनैर्मन्दं [मन्दं)शुकनासमवादीदब्रवीत् । किमवादीदित्याशयेनाह—**आर्य इति** । हे आर्य हे पूज्य, यद्यपि निरुक्तितस्त्वदुक्तित एवाहं वेद्मि जानामि । न मदीयेन मामकीनेन दोषेण वैगुण्येन वैशम्पायनो नागत इति, तथाप्येवं सत्यपि तातेन पित्रा संभावितमेव संभावनाविषयीकृतमेव । मद्वैगुण्यमिति शेषः । अपरस्य कस्य वा संभावना नोत्पन्ना । मिथ्यासंभावने न दोष इत्याशयेनाह—**मिथ्यापीति** । मिथ्याप्यसत्यमपि तत्तथा सत्यमेव । तत्रार्थे हेतुमाह—**यथेति** । यथा गृहीतं यथा श्रुतं लोकेन जनेन, विशेषतो गुरुणा पित्रादिना निर्णीतेरर्वाक्तत्तथैव स्यात् । परमार्थतस्तदसत्यं जनप्रसिद्ध्या किं स्यादित्याशयेनाह—**प्रसिद्धिरिति** । दोषो वैगुण्यम्, गुणा औदार्यादयः, त एवाश्रय आधारो यस्या एवंविधा प्रसिद्धिः प्रवादोऽफलवती निःप्रयोजनात्रास्मिंल्लोकेऽयशसेऽकीर्तये स्यात् । न तु दोषाश्रयप्रसिद्धेरयशोजनकत्वं प्रसिद्धं परं गुणाश्रय-

गन्तव्यम् । अपगते च मयि वैशम्पायनेनागन्तव्यम् । यद्यसावन्येनानेतुमेव पार्येत, तदा तातस्याप्यनुल्लङ्घनीयवचनैरवनिपतिसहस्रैरानीत एव स्यात् । तदार्यः कारयतु मे गमनानुज्ञया प्रसादम् । न च तुरंगमैर्गच्छतो मे दृष्टायां भूमौ स्वल्पोऽपि गमनपरिक्लेशः । वैशम्पायनमादायागतमेव मामवधारयत्वार्यः । अपि च बाह्यखेदादसह्योऽन्तःखेद एवैतद्वियोगजन्मा । अनुपदमेव स्कन्धावारमादायागच्छतीत्यमुना हेतुना, विना तेनागतोऽहम् । अन्यथा जन्मनः प्रभृति कदा मया गतं स्थितं क्रीडितं हसितं पीतमाशितं सुप्तं प्रबुद्धमुच्छ्वसितं वा विना वैशम्पायनेन ।

27/10

वैशम्पायन इति शेषः ॥

प्रसिद्धेः कथं तज्जनकत्वमिति चेन्न । अयं गुणवान्प्रसिद्धः, परमनेनेत्थं विहितम् तर्हि महान्पापिष्ठः, इत्याद्यकीर्तिसद्भावात् । परत्र परलोके फलदायी फलप्रदः परमार्थस्तत्त्वं कुत्रोपयुज्यते कुत्रोपयोगी स्यात् । न कुत्रापीत्यर्थः । दोषसंभावनाया नैर्मल्योपायं प्रदर्शयन्नाह—**तदस्या इति** । तदिति तत्तस्माद्धेतोरस्याः पूर्वोक्ताया दोषसंभावनाया वैशम्पायनस्यानयनं तस्मै गमनं यानं तस्याभ्यनुज्ञाज्ञा तां प्रायश्चित्तं प्रायः पापं तस्य चित्तं विशोधनम् । 'प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनम्' इति कृष्णभट्टयां प्रक्रियाटीकायाम् । तातेनार्यो दापयतु । प्रेरणे द्वे कर्तृकृता प्रसिद्धौ वेत्यदोषः । एतद्व्यतिरेकेण न शुद्धिरित्याशयेनाह—**नान्यथेति** । मे मम दोषशुद्धिर्न । अन्यथा नान्यप्रकारेण भवति । तत्र किं निदानमित्याह—**किमिति** । तत्र किं कारणं किं निमित्तम् । तदेव स्पष्टयन्नाह—**अनागत इति** । तु पुनरर्थे । अनागतेऽनायाते वैशम्पायने तातस्य पितुरनया संभावनया नोपगन्तव्यं न दूरीभवितव्यम् । अपगते च याते च मयि सति वैशम्पायनेनागन्तव्यम् । आयातव्यमित्यर्थः । अन्यः कश्चित्तदानयनं करिष्यतीत्यारेकां दूरीकुर्वन्नाह—**यदीति** । यद्यसौ वैशम्पायनोऽन्येन मदितरेणानेतुमेव पार्येत शक्येत, तदा तातस्यापि तारापीडस्याप्यनुल्लङ्घनीयमनाक्रमणीयं वचनं वचो यैरेवंभूतैरवनिपतिसहस्रैरानीत एव स्यात् । तत्तस्मादार्यो गमनस्यानुज्ञयाज्ञया प्रसादं प्रसन्नतां कारयतु । तातेनेति शेषः । तव गच्छतो भूयान्क्लेशो भावीत्याशयेनाह—**न चेति** । दृष्टायां निरीक्षितायां भूमौ तुरंगमैरश्वैर्गच्छतो व्रजतो मे मम स्वल्पोऽपि तुच्छोऽपि गमनपरिक्लेशः प्रयाणखेदो न च स्यात् । आर्यो भवान्वैशम्पायनमादाय गृहीत्वागतमेवायातमेव मामवधारयत्वाकलयतु । बाह्यखेदापेक्षयाभ्यन्तरखेदाधिक्यं प्रदर्शयन्नाह—**अपि चेति** । बाह्यखेदादेतद्वियोगजन्मा वैशम्पायनविरहोत्पन्नोऽन्तःखेद एवासह्योऽसहनीयः । तर्हि तं मुक्त्वा त्वमेकाकी कथमत्रागत इत्याशङ्कां निरस्यन्नाह—**अनुपदमिति** । अनुपदमनुचरणन्यासं स्कन्धावारं सैन्यमादाय गृहीत्वागच्छत्यायाति । इत्यमुना हेतुना निमित्तेन तेन वैशम्पायनेन विनाहमागत

यच्च श्रुत्वा तस्मादेव प्रदेशान्न गतोऽस्मि, तन्मा तेनैव तुल्योऽभूवमिति । तदप्रतिगमनदोषाद्रक्षन्तु मामार्याः ।' इत्यभिहितवति चन्द्रापीडेऽन्तःपीडोपरागरक्ते रक्ततामरसानुकारिणि मुखे सपक्षपातां षट्पदावलीमिव दृष्टिं निवेश्यैवं गमनाय विज्ञापयति युवराजः । 'किमाज्ञापयति देवः' इति शनैःशनैः शुकनासो राजानमप्राक्षीत् । तथा पृष्टश्च शुकनासेन किंचिदिव ध्यात्वा तारापीडः प्रत्यवादीत्—'आर्य, मया ज्ञातमेतेष्वेव दिवसेषु संपूर्णमण्डलस्येन्दोर्ज्योत्स्नामिव करावलम्बिनीं वत्सस्य वधूं द्रक्ष्यामीति यावदयमपरोऽन्तर्हिताशापथो जलदकाल इव प्रत्यूहकारी वैशम्पायनवृत्तान्तो विलोमप्रकृतिना विधात्रान्तरापातितः । यथा चायुष्मताभिहितमेवैतत् । न तमन्यः शक्नोत्यानेतुम् । न च तेन विनायमत्र स्थातुम् । तदवश्यमेव तावन्निस्तरितव्यो व्यसनार्णवोऽमुना पोतेन । वैशम्पायनप्रत्यानयनाय चावश्यं देव्यपि विलासवती विसर्जयिष्यत्येवैनमिति निश्चयो मे । तद्यातु । किंत्वतिदूरं वत्सेन गन्तव्यम् । तद्गणकैः सहादरादार्यो दिवसं लग्नं च गमनायास्य निरूपयतु, संविधानं च कारयतु' इत्येतदभिधाय शुकनासमुद्बाष्पलोचनश्चिरमिव चन्द्रापीडमालोक्याहूय च विनयावनम्रमंसदेशे शिरसि बाह्वोश्च पाणिना स्पृशन्नादिशत्—'वत्स, गच्छ त्वमेव

आयातः । **अन्यथेति** । उक्तवैपरीत्य आजन्मनः प्रभृत्याजन्मदिनादारभ्य कदा वैशम्पायनेन विना मया गतं यातम्, स्थितमवस्थितम्, क्रीडितं रमितम्, हसितं हास्यं कृतम्, पीतं पानं कृतम्, अशितं भक्षितम्, सुप्तं शयितम्, प्रबुद्धं जागरितम्, उच्छ्वसितं श्वसितं वा । **यच्चेति** । यद्वैशम्पायनवृत्तान्तं श्रुत्वाकर्ण्य तस्मादेव प्रदेशात्तद्वृत्तान्तश्रवणस्थलादेवाहं न गतोऽस्मि । तदहं मा तेनैव वैशम्पायनेन तुल्यः सदृशोऽभूवं भवेयमिति । गुरोर्निदेशव्यतिरेकेण तदवस्थाने मद्गमने चोभयोः सादृश्यं स्यादिति भावः । तत्तस्माद्धेतोरप्रतिगमनदोषात्तत्पृष्ठिप्रधावनाद्भावदूषणादार्या मां रक्षन्त्वित्यभिहितवतीत्युक्तवति चन्द्रापीडेऽन्तः पीडान्तर्व्याधिस्तस्या उपराग उपप्लवस्तेन रक्ते लोहितेऽत एव रक्तं यत्तामरसं कमलं तस्यानुकारिण्यनुकरणशील एवंविधे मुख आनने सह पक्षपातेन वाजपातेन तदङ्गीकरेण वा वर्तते या सा सपक्षपाता तामेतादृशीं षट्पदावलीमिव भ्रमरपंक्तिमिव दृष्टिं दृशं निवेश्य संस्थाप्यैवं पूर्वोक्तप्रकारेण गमनाय यात्रायै युवराजश्चन्द्रापीडो विज्ञापयति विज्ञप्तिं करोति । देवो भवान्किमाज्ञापयति किमाज्ञां दत्त इति शनैःशनैर्मन्दंमन्दं शुकनासो राजानं तारापीडमप्राक्षीदपृच्छत् । शुकनासेन तथा तेनैव प्रकारेण पृष्टश्च किंचिदिव क्षणमात्रं ध्यात्वा विमृश्य तारापीडः

28/10
× तारापीड
इति शेषः

प्रविश्याभ्यन्तरं मनोरमासहिताया मातुरावेदयात्मगमनवृत्तान्तम् ।' इत्यादिश्य चन्द्रापीडमात्मना शुकनासमादाय स्वभवनमयासीत् । चन्द्रापीडस्तु तामक्लिष्टवर्णां कादम्बरीसंवरणस्रजमिव गमनाभ्यनुज्ञां हृदयेनोद्वहन्प्रहृष्टान्तरात्माप्यपहर्षदृष्टिःप्रविश्य कृतनमस्कारो मातुःसमीपे समुपविश्यात्मदर्शनद्विगुणीभूतवैशम्पायनविरहशोकविह्वलां मनोरमामाश्वास्यावादीत्—'अम्ब, समाश्वसिहि । वैशम्पायनानयनाय तातेन मे गमनमादिष्टम् । तत्कतिपयदिवसान्तरितं वैशम्पायनाननदर्शनोत्सवमविकल्पं त्वं मामेव विसर्जय । सा त्वेवमभिहिता प्रत्युवाच—'तात, किमात्मगमनवचसा मां समा-

---

प्रत्यवादीत्प्रत्यब्रवीत् । किमब्रवीदित्याशयेनाह—**आर्य इति** । हे आर्य हे पूज्य, इति मया यावज्ज्ञातमवबुद्धम् । इतिद्योत्यमाह—**एतेष्विति** । एतेष्वेव वर्तमानेष्वि(ष्वे)व दिवसेषु वासरेषु संपूर्णमण्डलस्यान्यूनबिम्बस्येन्दोश्चन्द्रस्य ज्योत्स्नामिव करावलम्बिनीं हस्तावलम्बिनीं वत्सस्य पुत्रस्य । चन्द्रापीडस्येत्यर्थः । वधूं स्नुषां द्रक्ष्याम्यवलोकयामि । तावदयमपरो भिन्नोऽन्तर्हितस्तिरोहित आशा वाञ्छा दिक्च तस्याः पथो मार्गो येनैवंभूतो जलदकाल इव मेघसमय इव प्रत्यूहकारी विघ्नकारी विघ्नजनको वैशम्पायनवृत्तान्तो मन्त्रिसुतोदन्तो विलोमप्रकृतिना प्रतिकूलाभिप्रायेण विधात्रा विधिनान्तरा मध्ये पातित आनीतः । विज्ञप्तिसाफल्यं दर्शयन्नाह—**यथेति** । यथा येन प्रकारेण चायुष्मता भवताभिहितं प्रतिपादितं तदेतदेवमेवेत्थमेव । तदेव दर्शयति—**नेति** । तं वैशम्पायनोऽन्य आनेतुमानयनं कर्तुं न शक्नोति । तेन वैशम्पायनेन विनायं चन्द्रापीडोऽत्र स्थातुमत्रावस्थानं कर्तुं न च शक्नोति । तत्तस्माद्धेतोरमुना गमनलक्षणेन पीतेन प्रवहणेन तावदादावश्यमेव व्यसनार्णवः कष्टसमुद्रो निस्तरितव्यो निस्तारं प्रापयितव्यः । तव प्रसूरपि गमनप्रतिबन्धकारिणी भविष्यतीत्यपि नाशङ्कनीयमित्याह—**वैशम्पायनेति** । वैशम्पायनं प्रत्यानयनाय चानेतुं विलासवती देव्यप्येनं चन्द्रापीडं विसर्जयिष्यत्येव प्रेषयिष्यत्येवेति मे मम निश्चयो निर्णयोऽस्ति । तद्यातु गच्छतु । किंतु वत्सेन मत्सुतेनातिदूरमतिदविष्ठं गन्तव्यं यातव्यम् । तत्तस्माद्धेतोर्गणकैर्ज्योतिर्विद्भिः सहादरादार्यो भवानस्य चन्द्रापीडस्य गमनाय दिवसं दिनं लग्नं च मेषादिकं निरूपयतु विचारयतु । च पुनरर्थे । संविधानं गमनसामग्रीं च कारयतु विधापयतु । इत्येतत्पूर्वोक्तं शुकनासमभिधायोक्त्वा उदूर्ध्वं बाष्पो हर्षाश्रु ययोरेतादृशे लोचने यस्यैवंभूतस्तारापीडश्चिरमिव चन्द्रापीडमालोक्य निरीक्ष्याहूय चाह्वानं कृत्वा च विनयेनावनम्रमवनतं चन्द्रापीडमंसदेशे स्कन्धदेशे शिरस्युत्तमाङ्गे बाह्वोर्भुजयोश्च पाणिना हस्तेन स्पृशन्स्पर्शं कुर्वन् [आदिशत्] । हे वत्स, गच्छ व्रज त्वमेव,

श्वासयसि। कः खलु मे त्वयि तस्मिंश्च विशेषः। तदेकधा तमेकं न पश्यामि कठिनहृदया। त्वयि पुनर्गते च दयितस्यादर्शने जीवित-प्रतिबन्धहेतुभूतं त्वद्दर्शनं तदपि दूरीभवति। तन्न गन्तव्यम्। वत्स, एकेनापि हि युवयोरावां पुत्रवत्यौ द्वे अपि। नागतो नामासौ निष्ठुरात्मा' इत्युक्तवत्यां मनोरमायां विलासवती धीरमुवाच—प्रियसखि, तव मम चैवमेतद्यथा त्वया प्रोक्तम्। अयं पुनर्वैशम्पायनेन विना कं पश्यतु। तदास्ताम्। किमेतन्निवारयसि। वारितेनाप्य-

---

मनोरमासहितायाः मातुर्विलासवत्या अभ्यन्तरम्। गृहस्येति शेषः। प्रविश्य प्रवेशं कृत्वात्मगमनवृत्तान्तमावेदय ज्ञापय। इति चन्द्रापीडमादिश्येत्याज्ञां दत्त्वा-त्मना स्वयं शुकनासमादाय गृहीत्वा स्वभवनं स्वगृहमयासीदगच्छत्। चन्द्रापी-डस्त्वक्लिष्टः शोभनो वर्णो रक्तपीतादिरक्षरं वा यस्यामेवंविधां कादम्बर्याः संवरण-मङ्गीकरणं तस्य स्रजमिव मालामिव तां गमनाभ्यनुज्ञां यात्रानिर्देशं हृदयेन चेतसोद्वहन्धारयन्प्रहृष्टः प्रमुदितोऽन्तरात्मा यस्यैवंभूतोऽप्यपगतो हर्षो यस्या एतादृशी दृष्टिर्यस्यैवंविधः प्रविश्य प्रवेशं कृत्वा कृतनमस्कारो विहितप्रणामो मातुर्जनन्याः समीपे यथोचितप्रदेशे समुपविश्योपवेशनं कृत्वात्मनः स्वस्य दर्शने-नावलोकनेन द्विगुणीभूतो द्विगुणतां प्राप्तो वैशम्पायनस्य विरहः शोकस्तेन विह्वलां व्याकुलामेवंभूतां मनोरमामाश्वास्याश्वासनां कृत्वावादीदवोचत्। किमुवाचेत्याह—हे अम्ब हे मातः, समाश्वसिह्याश्वासनां कुरु। यतो वैशम्पायनस्यानयनं तदर्थं तातेन पित्रा मे मम गमनं यानमादिष्टं कथितम्। तत्तस्माद्धेतोः कतिपये च ये दिवसा वासरास्तैरन्तरितं व्यवहितं वैशम्पायनस्याननदर्शनं वक्त्रनिरीक्षणं तत्रोत्सव-मुत्सवभूतमविकल्पं कल्पनारहितं मामेव त्वं विसर्जय गमनाज्ञां देहि। **सा त्विति**। सा मनोरमैवमनुना प्रकारेणाभिहिता प्रोक्ता सती प्रत्युवाच प्रत्यब्रवीत्। किमुवा-चेत्याह—**तातेति**। हे तात हे पुत्र, आत्मगमनवचसा स्वप्रयाणवाक्येन किं मां समाश्वासयसि समाश्वसनां करोषि। मे मम। खल्विति निश्चये। त्वयि भवति तस्मिंश्च वैशम्पायने को विशेषस्तदितरत्वलक्षणः। तदेव स्पष्टीकुर्वन्नाह—**तदिति**। तत्तस्माद्धेतोरेकधैकवारं तमेकं वैशम्पायनं कठिनहृदया न पश्यामि नावलोकयामि। त्वयि भवति पुनर्गते प्रस्थिते च दयितस्य वैशम्पायनस्यादर्शने-ऽनिरीक्षणे जीवितस्य जीवनस्य प्रतिबन्धहेतुभूतं गमनविघ्नभूतं त्वद्दर्शनं त्वदव-लोकनं तदपि तत्र गन्तव्ये दूरीभवति। तन्न गन्तव्यम्। हे वत्स हे पुत्र, एकेनापि हि युवयोश्चन्द्रापीडवैशम्पायनयोरावां विलासवतीमनोरमे पुत्रावत्यौ द्वे अपि। नामेति कोमलामन्त्रणे। असौ वैशम्पायनो निष्ठुरात्मा निर्दयप्रकृतिर्नागतो नायातः। इत्युक्तवत्यामिति भाषितवत्यां मनोरमायां वैशम्पायनजनन्यां सत्यां विलासवती चन्द्रापीडसवित्री धीरं यथा स्यात्तथोवाचाब्रवीत्—

नेन नैव स्थातव्यम्, मन्ये च पित्राप्ययमेतदेवाकलय्य गमनायानुमोदितः। तद्यातु। वरमावाभ्यां कतिपयदिवसाननयोरप्यदर्शनकृतान्क्लेशाननुभूतान्न पुनरस्य वैशम्पायनावलोकनदुःखदीनं दिने दिने वदनमीक्षितुम्'। तदुत्तिष्ठ। 'गच्छावो गमनसंविधानाय वत्सस्य चन्द्रापीस्य।' इत्यभिदधत्येव मनोरमां हस्ते गृहीत्वोत्थाय चन्द्रापीडेनानुगम्यमाना निजावासमयासीत्। चन्द्रापीडोऽपि मातुः समीपे गमनालापेनैव क्षणमिव स्थित्वा गृहमगात्। तत्र चापनीतसमायोगो गमनायोत्ताम्यता हृदयेन गणकानाहूय रहस्याज्ञापितवान्—'यथा विना परिलम्बेन मे गमनं भवति, तथा भवद्भिरार्यशुकनासाय पृच्छते ताताय वा दिनमावेदनीयम्' इति। एवमादिष्टास्ते व्यज्ञापयन्—'देव, यथा सर्व एव ग्रहाः स्थिताः, तथा-

---

हे प्रियसखि, तव भवत्या मम विलासवत्या एवमेतत्तथैवेदं यथा येन प्रकारेण त्वया प्रोक्तम्। पुनरयं चन्द्रापीडो वैशम्पायनेन विना कं पश्यत्ववलोकयतु। तत्तस्माद्धेतोरास्तां तिष्ठतु। किमेतद्गमनं निवारयसि निवारणं करोषि। वारितेनाप्यनेन चन्द्रापीडेन नैव स्थातव्यम्। नैवात्र स्थेयमित्यर्थः। **मन्ये चेति**। अहं मन्ये जानामि। एतदेव पूर्वोक्तमेवाकलय्याकलनां कृत्वायं चन्द्रापीडो गमनाय यात्रायै अनुमोदितोऽभ्यनुज्ञातः। तत्तस्मात्कारणाद्यातु व्रजतु। आवाभ्यां मनोरमाविलासवतीभ्यां कतिपयदिवसान्यावत्। अनयोरपि चन्द्रापीडवैशम्पायनयोरप्यदर्शनकृतानवलोकितजनितानुभूतानुभवविषयीकृतान्क्लेशान्विषादान्वरं शुभम्, परं वैशम्पायनस्यानवलोकनमनिरीक्षणं तस्माद्यद्दुःखं कृच्छ्रं तेन दीनं सकरुणमस्य चन्द्रापीडस्य दिने दिने वदनमाननमीक्षितुं न पुनर्वरं शुभम्। तदिति हेत्वर्थे। उत्तिष्ठोत्थानं कुरु। वत्सस्य चन्द्रापीडस्य गमनसंविधानाय प्रस्थानसामग्र्यै आवां गच्छावो व्रजाव इत्यभिदधती कथयन्त्येव मनोरमां हस्ते पाणौ गृहीत्वादायोत्थायोत्थानं कृत्वा चन्द्रापीडेनानुगम्यमानानुयायमाना निजावासं स्वभवनमयासीदगात्। चन्द्रापीडोऽपि मातुर्जनन्याः समीपे गमनालापेनैव यात्रावार्तयैव क्षणमिव स्थित्वा गृहमयादगमत्। तत्र तस्मिन्गृहेऽपनीतो दूरीकृतः समायोगः संबन्धो येनैवंभूतो गमनाय प्रस्थानाय हृदयेन स्वान्तेनोत्ताम्यतोत्तपता गणकाञ्ज्योतिर्विद आहूयाकार्य रहस्येकान्त आज्ञापितवानाज्ञां दत्तवान्। किमाज्ञापितवानित्याशयेनाह—**यथेति**। यथा मे मम परिलम्बेन विना गमनं प्रस्थानं भवति, तथा भवद्भिर्युष्माभिः पृच्छत इत्यार्यशुकनासाय ताताय वा दिनं दिवसमावेदनीयं कथनीयम्। एवमादिष्टाः प्रोक्तास्ते ज्योतिर्विदो व्याज्ञापयन्विज्ञप्तिं चक्रुः। कां विज्ञप्तिं कृतवन्त इत्याशयेनाह—**देव इति**। हे देव हे स्वामिन्, यथा येन प्रकारेण सर्व एव ग्रहाः सूर्यादयो लग्ने स्थितास्तथा तेन प्रकारेणास्मन्म-

स्मन्मतेन देवस्य गमनमेव वर्तमानेन शस्यते । अपरमपि कर्मानुरोधाद्राजेच्छैव कालः । तत्रापि न कार्यमेवाहर्निरूपणया । राजा कालस्य कारणम् । यस्यामेव वेलायां चित्तवृत्तिः सैव वेला सर्वकार्येषु' इति विज्ञापिते मौहूर्तिकैः पुनस्तानब्रवीत्—'तातेनैवमादिष्टमिति ब्रवीमि । अन्यदात्यन्तिकेषु कार्येषु कार्यपराणां प्रतिक्षणोत्पादिषु च दिवसनिरूपणैव कीदृशी । तत्तथाकथयिष्यत यथा श्व एव मे गमनं भवेत्' इति । 'देवः प्रमाणम्' इत्यभिधाय गतेषु च तेषु शरीरस्थितिकरणायोदतिष्ठत् । निवर्तितशरीरस्थितिं च मौहूर्तिकास्ते पुनः प्रविश्य शनैर्न्यवेदयन्—'कृतोऽस्माभिर्देवादेशः । सिद्धश्च तनयविरहविक्लवतयार्यशुकनासस्य । तदतिक्रान्ते श्वस्तनेऽहनि रात्रावितः प्रस्थातव्यं देवेन' इत्यावेदिते तैः 'साधु कृतम्' इति मुदितचेतास्तानभिष्टुत्य दृष्टिविषयवर्तिनीमेव कादम्बरीं च वैशम्पायनं च

तेन प्रकारेणास्मन्मतेन देवस्य भगवतो गमनमेव प्रस्थानमेव वर्तमानेन कालेन शस्यते श्लाघ्यते । मुहूर्ताभावेऽपि गमनप्रकारं प्रदर्शयन्नाह—**अपरमपीति** । कर्मानुरोधात्कार्याग्रहाद्राज्ञो नृपस्येच्छैव कालो मुहूर्तम् । तत्रापीच्छामुहूर्तेऽहर्निरूपणया शुभाशुभदिनगवेषणया न कार्यं न प्रयोजनम् । तत्र हेतुमाह—**राजेति** । राजा नृपः कालस्य मुहूर्तस्य कारणम् । यस्यामेव वेलायां समये चित्तवृत्तिर्मनःप्रवृत्तिः सर्वकार्येषु समग्रकृत्यकरणेषु सैव वेलावसारः । मौहूर्तिकैर्गणकैरित विज्ञापिते विज्ञप्ते सति पुनर्द्वितीयावारं तान्गणकानब्रवीदकथयत् । तातेन पित्रैवं दिवसगवेषणादिकमादिष्टं कथितमिति हेतोरहं ब्रवीमि कथयामि । अन्यदान्यस्मिन्काले आत्यन्तिकेष्ववश्यकरणीयेषु तथा प्रतिक्षणं प्रतिसमयमुत्पादिषूत्पत्तिकरणशीलेषु कार्येषु च कार्यपरायणां कृत्यतत्पराणां दिवसनिरूपणा दिनगवेषणैव कीदृशी । तत्तस्माद्धेतोस्तथा तेन प्रकारेण यूयमित्यकथयिष्यत न्यवेदयिष्यत । यथा श्व एवागामिदिन एव मे मम गमनं चलनं भव (वेदि) ति । देवः प्रमाणं यथा भवदनुशासनमित्यभिधायेत्युक्त्वा तेषु गणकेषु गतेषु प्रयातेषु सत्सु च शरीरस्थितिकरणाय देहव्यापारकृत उदतिष्ठदुत्थितो बभूव । निवर्तिता संपादिता शरीरस्थितिर्येनैवंभूतं तं पुनस्ते मौहूर्तिकाः प्रविश्य प्रवेशं कृत्वा शनैर्मन्दं न्यवेदयन्विज्ञपयन् । अस्माभिर्ज्योतिर्विद्भिर्देवस्य भवत आदेशो निर्देशः कृतो विहितः । तनयस्य वैशम्पायनस्य विरहो वियोगस्तेन विक्लवतया विह्वलतयार्यशुकनासस्य च सिद्धो निष्पन्नः । ततस्तस्माद्धेतोरतिक्रान्ते व्यतीते श्वो भवः श्वस्तनस्तस्मिन्नहन्यागामिदिवसे रात्रौ निशायामितोऽस्मात्प्रदेशाद्देवेन भवता प्रस्थातव्यं चालितव्यम् । तैर्गणकैरित्यावेदित इति ज्ञापिते साधु कृतं शुभं विहितमिति मुदितचेताः प्रमुदितमनास्ताञ्ज्योतिर्विदोऽभिष्टुत्य स्तुतिं कृत्वा दृष्टिविषयवर्तिनीमेव प्रत्यक्ष-

मन्यमानोऽप्रविष्टायामेव पत्रलेखायां परापतामीत्यग्रप्रधावितेनावधारयंश्चेतसा चतुःसमुद्रसारभूतानिन्द्रायुधरयानुगामिनस्तुरंगमानगणेयानवगणिततुरंगमगमनखेदानुत्साहिनो राजपुत्रांश्च निरूपयन्ननन्यकर्मा तं दिवसमेकां च यामिनीं कथंकथमप्यस्थात् ।

गतामेव कादम्बरीं वैशम्पायनं च मन्यमानो ज्ञायमानोऽप्रविष्टायामेवाप्राप्तायामेव पत्रलेखायामहं परापतामि गच्छामीत्यग्रप्रधावितेन पुरस्तात्त्वरितगत्या चलितेन चेतसा स्वान्तेनावधारयन्निश्चिन्वंश्चतुःसमुद्रेषु चतुरम्भोनिधिषु सारभूतान्हृद्यभूतानिन्द्रायुधस्य रयो वेगस्तस्यानुगामिनोऽनुयायिनोऽगणेयानसंख्येयांस्तुरंगमानश्वानगणितोऽवमानितस्तुरंगमेनाश्वेन गमनं चलनं तस्मात्खेदो यैस्तानुत्साहिन उत्साहवतो राजपुत्रांश्च नृपसुतान्निरूपयन्पश्यन् । न विद्यतेऽन्यत्कर्म यस्य सोऽनन्यकर्मा तं दिवसमेकां च यामिनीं कथंकथमपि महता कष्टेनास्थात्तस्थौ ।

इति ।

श्रीः ।

वासवदत्ता ।

अथ तां विस्फारितेन चक्षुषा पिबतः कन्दर्पकेतोर्जहार चेतनां मूर्च्छा । तमनुपश्यन्ती वासवदत्ता मुमूर्च्छ । अथ मकरन्दसखीजनप्रयत्नाल्लब्धसंज्ञावेतावेकासनमलंचक्रतुः ॥

अथ वासवदत्तायाः प्राणेभ्योऽपि गरीयसी सर्वविस्रम्भपात्रं कलावती नाम सखी कन्दर्पकेतुमुवाच—"आर्यपुत्र नायं विस्रम्भकथानामवसरः । अतो लघुतरमेवाभिधीयते । त्वत्कृते यानया यातनानुभूता; सा, यदि नभः पत्रायते, सागरो मेलानन्दायते, ब्रह्मा लिपिकरायते, भुजगपतिर्वा कथकायते; तदा किमपि कथमप्यनेकै-

---

अथेति । विस्फारितं विस्तारितं विकसितमिति यावत् । स्फुरतेरर्यन्तात्कर्मणि क्तः, 'चिस्फुरोर्णौ' इत्यात्वम् । 'विष्फारितेन' इति पाठे 'स्फुरतिस्फुलत्योः—' इति षत्वमिति व्याख्येयम् । चेतनां संज्ञाम् । **मूर्च्छा** वस्तुतत्त्वानवधारिणी चित्तवृत्तिः । 'मूर्च्छावेगः' इति पाठान्तरम् । **तामिति** । तं अनु कन्दर्पकेतुना सहेत्यर्थः । 'तृतीयार्थे' इत्यनोः कर्मप्रवचनीयत्वेन 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण द्वितीयेत्येके 'अनुर्लक्षणे' इति कर्मप्रवचनीयतेति प्राचीनटिप्पणी । 'तदनु' इत्यपि पाठः ।

अथेति । प्राणेभ्यः असुभ्यः । 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । **गरीयसी** गुरुतरा । **विस्रम्भपात्रं** विश्वासस्थानम् । **आर्येति** । 'आर्यपुत्रेति संबोध्यः पतिः पत्नीजनेन वा । इति भरतः' इति शिवरामः । 'एतत्पूजावचनम्' इति कश्चित् । 'आर्यपुत्रेति राजपुत्राणामभिधानम् । आर्यो ब्राह्मणकुमारयोः । राजा चेति निपातनात्' इति क्वचित् टिप्पणी दृश्यते (?) **विस्रम्भकथानां** सविश्वासमसंभ्रममवस्थाय कथनीयानां प्रेमालापानाम् । **अवसरः** कालः । **लघुतरं** अतिसंक्षिप्तम् । 'अभिधीयसे' इति क्वचित्पाठः । **त्वत्कृते** त्वन्निमित्तम् । तादर्थ्यार्थकस्य कृते इत्यव्ययस्य षष्ठ्यन्तेन युष्मच्छब्देन समासः । 'पूराणगुण—' इति षष्ठीसमासनिषेधस्तु कृदव्यय एव । 'यत्कृतेऽरीन्निगृह्णीमः' इति भट्टिः । **यातना** तीव्रवेदना । 'यातना तीव्रवेदना' इत्यमरः । **नभः** आकाशम् । **पत्रायते** पत्रवत् आचरति पत्रं भवतीति यावत् । 'कर्तुः क्यङ्—' इति क्यङ् । 'उपमानादाचारे इति क्यङ् । इति शिवरामस्तु भ्रान्तः । मेलानन्दा मसीपात्रं सेवाचरति मेलानन्दायते । 'मेलानन्दा मसिमणिर्मसिधानी मसिप्रसूः ।' इति हारावली । 'मेलानन्दो मसीपात्रम् इति हारावली' इति शिवरामः । 'मेलानन्दो मषीघटी । मेलाम्बु मलिनाम्बु च, इति कोशः' इति कश्चित् । लिपि-

र्युगसहस्रैरभिलिख्यते कथ्यते वा। त्वया च राज्यमुज्झितम्। किं बहुना—आत्मास्याः संकटे समारोपितः; यैषास्मत्स्वामिदुहिता प्रभातायां शर्वर्यां पित्रा यौवनातिक्रमदोषशङ्किना हठेन विद्याधरचक्रवर्तिनो विजयकेतोः पुत्राय पुष्पकेतवे पाणिग्रहणेन दातव्येति निश्चिता। अनया चार्ययास्माभिः सह संमन्त्र्यालोचितम्—अद्य यदि तं जनमादाय नागच्छति तमालिका, तदावश्यमेवाश्रयाश आश्रयितव्यः' इति। सुकृतवशाच्च महाभागः समागतः। तदत्र यत्सांप्रतम्, तत्र भवानेव प्रमाणम्" इत्युक्त्वा विरराम।

अथ कन्दर्पकेतुरपि भीतभीत इव, प्रणयानन्दामृतसागरलहरीभिराप्लुत इव, वासवदत्तया सह संमन्त्र्य, मकरन्दं वार्तान्वेषणाय

करः लेखकः स इवाचरति **लिपिकरायते**। लिपावुपपदे 'दिवा विभा—इति कृञः टप्रत्ययः। बाह्वनेकत्वेन सामर्थ्यातिशयेन च ब्रह्मणस्तथात्ववर्णनम्। कथकः वक्ता स इवाचरति कथकायते। शेषस्य रसनासहस्रद्वयवत्तया तथोक्तिः। 'ब्रह्मायते लिपिकरः। भुजगराजायते कथकः' इति पाठमभ्युपगम्य, 'ब्रह्मायते चिरजीवितार्थमिदम्। कथको वक्ता। भुजगराजायते, योगशास्त्रप्रणेतृत्वेनान्तरभावाभिज्ञत्वार्थं शब्दशास्त्रार्णवपारावारीणत्वेन बहुमुखत्वेन बहुधाभिप्रायाविष्कारकर्तृत्वार्थं वैद्यकशास्त्राचार्यत्वेन विरहवेदनयास्या इयमवस्था न तु ज्वरादिजन्येति वक्तृत्वार्थं चेदम्' इति शिवरामः। 'निःशेषमम्बरतलं यदि पत्रिका स्यात्सप्तार्णवी यदि समेत्य मषी भवित्री। वक्ता सहस्रवदनः पुरुषः स्वयं चेल्लिख्येत रङ्गपतिपादुकयोः प्रभावः' इति श्रीवेदान्तदेशिकः। संभावनालंकारः। 'संभावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये।' इति तल्लक्षणम्। **उज्झितं** त्यक्तम्। **संकटे** दुःखे। **हठेन** बलात्कारेण। 'प्रसभं तु बलात्कारो हठः' इत्यमरः। **संमन्त्र्य** विमृश्य। आलोचितं निर्णीतम्। **आश्रयाशः** अग्निः। 'अवश्यमेव मया हुतवहे शयितव्यामिति' इति पाठान्तरम्। **सुकृतं** पुण्यम्। **सांप्रतं** युक्तम्। प्रमाणं निर्णयकर्ता। 'प्रमाणं हेतुमर्यादाशास्त्रियत्ताप्रमातृषु।' इत्यमरः। विररामेत्यत्र 'व्याङ्परिभ्यो रमः' इति परस्मैपदम्।

अथेति। अथ कन्दर्पकेतुरपि मकरन्दं नगरे नियुज्य तुरगेण नगरात् निरगादित्यन्वयः। **भीतभीतः** अत्यन्तभीतः। 'अननुभूतपुरुषसंगेयं मा कदाचिदुद्विग्ना भूत्। तथा सति रसभेदः स्यादिति सभय इवेत्यर्थः' इति शिवरामः। **प्रणयेति**। प्रणयेन प्रेम्णा जातः आनन्दः स एव अमृतपूर्णः सागरः तस्य लहरीभिः प्रवाहैः तरङ्गैर्वा। प्रणयश्च आनन्दश्चेति द्वन्द्वो वा। 'सप्रणयमानन्द' इति 'सप्रश्रयमानन्द' इति च पाठान्तरम्। **आप्लुतः** स्नातः। **संमन्त्र्य** आलोच्य। 'सप्रश्रयं सविश्वासं वासवदत्तया संमन्त्र्य सख्याः कामचारानुज्ञां विधाय तया सह रतिं कृत्वेत्यर्थः।

तत्रैव नगरे नियुज्य, भुजगेनेव सदागत्यभिमुखेन, सरित्पतिनेव शुक्तिशोभितेन, विन्ध्यविपिनेनेव श्रीवृक्षलाञ्छितेन, हंसेनेव मानसगतिना, अरण्येनेव गण्डशोभितेन, वनस्पतिनेव स्कन्धशोभितेन, वज्रेणेवेन्द्रायुधेन, मनोजवनाम्ना तुरगेण तया सह नगरात् निरगात् ॥

ततः क्रमेण गव्यूतिमात्रमध्वानं गत्वा श्मशानवाटेन निर्गत्य, निमेषमात्रादेवानेकशतयोजनमध्वानं गत्वा, पुनरपि, विन्ध्याटवीं

सपूर्वो मन्त्रिः कामचारानुज्ञार्थकः' इति शिवरामः । **वार्तेति** । वार्तायाः उदन्तस्य अन्वेषणाय उपलम्भाय । **सदेति** । सदा सर्वदा गतौ गमने अभिमुखेन सोत्साहेन । पक्षे सदागतौ वायौ विषये अभिमुखेन तम् अशितुं विवृतमुखेनेत्यर्थः । 'वायुर्मातरिश्वा सदागतिः ।' इत्यमरः । **सरिदिति** । सरित्पतिः समुद्रः । 'सरित्पुलिनेनेव इति क्वचित्पाठः । **शुक्तीति** । शुक्तिः आवर्तः । पक्षे मुक्तास्फोटः शङ्खो वा । 'शुक्तिः कपालशकले शङ्खे शङ्खनकेऽपि च । नरव्यश्वावर्तदुर्नाममुक्तास्फोटेषु च स्त्रियाम् ।' इति मेदिनी । **श्रीवृक्षेति** । श्रीवृक्षो नाम अश्वस्य हृदि स्थित आवर्तविशेषः । पक्षे, श्रीवृक्षः अश्वत्थः । 'श्रीवृक्षोऽस्य हृदावर्तः' इत्यश्वप्रकरणे त्रिकाण्डशेषः । 'श्रीवृक्षको वक्षसि चेद्रोमावर्तो मुखेऽपि च ।' इति वैजयन्ती । 'अश्वत्थः श्रीवृक्षः कुंजराशनः ।' इति हेमचन्द्रः । **मानसेति** । मानसस्य मनस इव गतिः यस्य तेन तथोक्तेन । पक्षे मानसं मानससरः प्रति गतिः गमनं यस्य तेन तादृशेन । **वनस्पतिः** वृक्षः । 'वनस्पतिर्न द्रुमात्रे विना पुष्पं फलिद्रुमे ।' इति मेदिनी । **स्कन्धः** अंसः, पक्षे मूलमारभ्य शाखावधिभागः । 'स्कन्धः स्यान्नृपतावंसे संपरायसमूहयोः । काये तरुप्रकाण्डे च भ्रात्रादौ छन्दसो भिदि ।' इति मेदिनी । **गण्डः** बुद्बुदाकारं हयभूषणम् । पक्षे खड्गिमृगः । 'गण्डो व्रणे कपोले पिटके गर्वे मृगान्तरे योगे । मूलादिदुष्टभागे हयभूषणबुद्बुदेऽप्युपाये च ।' इति रत्नमाला । **इन्द्रेति** । 'मल्लिकाक्षः सितैर्नेत्रैः स्याद्वाजीन्द्रायुधोऽसितैः ।' इति शिलोञ्छः । पक्षे, इन्द्रस्य आयुधेन । सरित्पतिनेवेत्यारभ्य इन्द्रायुधेनेत्यन्तं कलिकातापुस्तके नास्ति । तुरगेण अश्वेन । **निरगात्** निर्गतवान् । एतेर्लुङि 'इणो गा लुङि' इति गादेशः ।

तत इति । ततः एतादृशने श्मसानवाटेन निर्गत्य एतादृशीं । विन्ध्याटवीं प्रविवेशेति संबन्धः । **गव्यूतीति** । 'गव्यूतिः स्त्रीक्रोशयुगम्' इत्यमरः । गव्यूतिः प्रमाणं यस्य तं गव्यूतिमात्रम् । अध्वानं मार्गम् । **श्मशानं** पितृवनम्, 'शवाः शेरतेऽत्र । पृषोदरादिः' । वाटः मार्गः प्रदेशो वा । 'वाटो मार्गे वृतिस्थाने स्यात्कुटीवास्तुनोः स्त्रियाम्' इति मेदिनी । 'श्मशानं घोरसंनादं शिवाशतसमाकुलम् । शवमौलिसमाकीर्णं दुर्गन्धबहुधूमकम् । पिशाचभूतवेतालडाकिनीयक्षसंकुलम् । महागणमहाभूतरवकोलाहलायुतम् । गृध्रगोमायुसंकीर्णं श्वबृन्दपरिवारितम् । अस्थिसंघातसंकीर्णं महादुर्गन्धसंकुलम् । ...ज्वलन्मांसवसा-

प्रविवेश । अत्रान्तरे तयोर्निद्रामादाय निशा जगाम ॥ 3|11

ततः क्रमेण कालकैवर्तकेन तमिस्रानायं प्रक्षिप्य गगनमहासरसि सजीवशफरानिकर इवापह्रियमाणे तारागणे, संध्यारक्तांशुके विषमप्ररूढविसलताशरयन्त्रानुगतशतपत्रपुस्तकसनाथे मकरन्दबिन्दुसंदोहनिर्भरपानमत्तमधुकरमञ्जुरवैः स्वधर्ममिव पठति, किंकचकमलाकरभिक्षौ, कृषीवलेनेव कालेन तिमिरबीजनिकरेष्विव मधुकरेषु मधुरसकर्दमितपरागपङ्केषु घनघटमानदलपुटेषु कुमुदा-

---

मेदश्छमच्छमितसंकुलम् । स वह्निगर्भैरशिवैः शिवारुतैर्निनादितं भीषणरावगह्वरम् ।' इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्याने श्मशानवर्णनम् । **योजनं** क्रोशचतुष्टयम् । 'योजनं परमात्मनि चतुष्क्रोश्यां च योगे' इति मेदिनी ।

तत इति । काल एव कैवर्तकः मत्स्यग्राही । 'कैवर्ते दशधीवरौ' इत्यमरः । **तमिस्रेति** । तमिस्रा तमस्ततिरेव आनायः जालम् । 'तमिस्रं तिमिरे कोपे पुंसि स्त्री तु तमस्ततौ ।' 'तमिस्रां रात्रिमेव नावं तरिम्' इति केचित् । **शफराः** मत्स्यविशेषाः । 'शफरः श्वेतकोलः स्यात्' इति मत्स्यप्रकरणे त्रिकाण्डशेषः । तेषां सजीवत्वकथनमुपमेयानां ताराणां प्रकाशवत्त्वानुरोधेन । रूपकोत्प्रेक्षयोः संकरः । **संध्येति** । एतादृशे कमलाकरभिक्षौ स्वधर्मं पठतीव सतीत्यन्वयः । संध्यैव रक्तं अंशुकं वस्त्रं यस्य तस्मिन् तादृशे । संध्यया रक्ताः ये अंशव एव अंशुकाः किरणाः त एव रक्तांशुकं यस्येति वा । **विषमेति** । विषमं तिर्यक्प्रसरणेन परस्परसंश्लिष्टं यथा तथा प्ररूढा अभिवृद्धा या विसलता मृणालवल्ली सेव शरयन्त्रं पुस्तकधारणाय परस्परान्तःप्रवेशितं वर्णविच्छुरितं फलकद्वयम्, यस्य द्राविडभाषायां 'शिक्कुप्पलकै' इति व्यवहारः । 'शरयन्त्रं समारोहः सरस्वतीपीठमिति यावत् ।' इति कश्चित् । 'शरयन्त्रकं तालपत्रीयपुस्तकमध्यस्थरज्जुः' इति शिवरामः । शतपत्रं तामरसपुष्पमेव शतपत्रं अनेकपत्रसहितं पुस्तकम् । **निर्भरं** अधिकम् । **विकचेति** । विकचः विकसितः, कचरहितः मुण्डितश्च । कमलाकरः पद्मसर एव भिक्षुः संन्यासी । **कृषीवलः** कर्षकः । कृषिः अस्यास्तीति विग्रहः । 'रजःकृषि—' इति वलचि 'वले' इति दीर्घः । **तिमिरेति** कुमुदाकराः कैरवसरांस्येव क्षेत्राणि केदाराः तेषु अधिकरणेषु । तिमिरबीजनिकरेष्विव मधुकरेषु कृषीवलेनेव कालेन उप्यमानेष्विति संबन्धः । तिमिरबीजानि तमोरूपसस्याङ्कुरहेतुभूतानि वस्तूनि । **मध्विति** । मधु मकरन्द एव रसः जलं तेन कर्दमिताः कर्दमावस्थां प्रापिताः परागपङ्काः घनानि पुष्परजांसि येषु तेषु तथोक्तेषु । **उप्यमानेषु** विकीर्यमाणेषु । 'डुवप् बीजसंताने' कर्मणि शानच् । **रज इति** । रजः पराग एव मुर्मुरचूर्णम् । परागस्य मुर्मुरचूर्णत्वं

करक्षेत्रेषूप्यमानेषु, रजोमुर्मुरचूर्णसनाथमधुकरपटलधूमानुगतो-द्दण्डपुण्डरीकव्याजाद्धूपमिव भगवते किरणमालिने प्रयच्छन्त्यां कमलिनीतापस्याम्, रजनीवधूकरद्वयोच्चलितपतत्प्रभातमुसलाहतिक्षतान्तरे उलूखल इव चन्द्रमण्डले कण्डनविकीर्णेषु तण्डुलेष्विव तारागणेषु उन्मीलत्सु, संध्याताम्रमुखेन वासरवानरेण नभस्तरुमारोहता शाखाभ्य इव कम्पिताभ्यो दिग्भ्यो विकचप्रसूननिकर इव तारागणे फल इवेन्दुमण्डले च पतति, तारागणशालितण्डुलशबलं नभोऽङ्गणं स्फुरदरुणकिरणचूडाचक्रचारुवदने वासरकृकवाकौ चरितुमवतरति, मत्संगमादतिप्रवृद्धो वारुणीसंगमाद्द्विजपतिरेष पततीति हसन्त्यामिवाखण्डलाशायाम्, अरुणकेसरिकराघातनिहतान्धकारकरीन्द्ररुधिरधाराभिरिव उदयगिरिशिखरनिर्झरधौतधातुधाराभिरिव त्वङ्क्षुरङ्गखरखुरपुटपाटितपद्मरागपरागच्छटा-

---

पूर्वमनेनोक्तम् । एवमन्यैरप्युच्यते । यथा माघे 'स्मरहुताशनमुर्मुरचूर्णतां दधुरिवाम्रवणस्य रजःकणाः' इति । उद्दण्डं ऊर्ध्वं प्रसृतविसदण्डं गम्भीरं वा । पुण्डरीकं सिताम्भोजम् । **किरणमाली** सूर्यः । **रजनीति** । रजनी एव वधूः । उच्चलितं ऊर्ध्वोत्क्षिप्तम् । प्रभाते प्रत्यूष एव मुसलम्, तस्य आहत्या अवघातेन क्षतं भग्नं अन्तरं मध्यं यस्य तस्मिन् । नायं कलङ्कः, किंतु मुसलाघातजनितमध्यरन्ध्रेणाकाशमेव दृश्यत इति द्योतनाय एवमुक्तिः । 'अयोग्रो मुसलोऽस्त्री स्यादुलूखलमुदूखलम्' इत्यमरः । **कण्डनं** वितुषीकरणम् । 'खण्डन' इत्यपि पाठः । **उन्मीलत्सु** प्रकाशमानेषु । 'निमीलत्सु' इति पाठे ततस्ततो निलीयमानेष्वित्यर्थः । **संध्येति** । संध्यया ताम्रं रक्तं मुखं आरम्भ एव संध्यावत् ताम्रं मुखं वदनं यस्य तेन । **शालिः** कलमः । शबलं व्याप्तं, कर्बुरं वा । **अरुणकिरणः** सूर्य एव चूडाचक्रम् । **कृकवाकुः** कुक्कुटः । **चरितुं** भक्षयितुम् । 'चर गतिभक्षणयोः ।' प्राच्यां प्रभाते प्रकाशमानायामुत्प्रेक्षते—**मदिति** । **वारुणी** वरुणसंबन्धिनी प्रतीची दिक्, सुरा च । **द्विजपतिः** चन्द्रः, ब्राह्मणोत्तमश्च । **पतति** अधश्च्यवते, पातित्यवान् भवति च । सुरापानं पातित्यप्रयोजकतया स्मृतम् । 'त्रयीमयोऽपि प्रथितो जगत्सु यद्वारुणीं प्रत्यगमद्विवस्वान् । मन्येऽस्तशैलात्पतितोऽत एव विवेश शुद्धयै बडवाग्निमध्यम् ।' इत्यन्यः । **आखण्डलाशा** इन्द्रदिक् प्राची । उपरिष्टात् रक्तमण्डले सवितरीति वक्ष्यते; तत्र मण्डलरागे हेतूत्प्रेक्षते—**अरुणेत्यादिना** । अरुणः सूर्यसारथिः स एव केसरी सिंहः । करः किरणः, हस्तश्च । अन्धकारा एव करीन्द्राः । **उदयेति** । उदयगिरिशिखरगतानां निर्झराणां गिरिनदीनां धौतधातवः प्रक्षालितमलःशिलादयः याः धाराः प्रवाहाः तांभिः । **त्वङ्गदिति** । त्वङ्गन्तः चञ्चलाः, गमनोत्सुका

भिरिव उदयाचलकूटकोटिप्ररूढजपाकुसुमकान्तिभिरिव पूर्वगिरिकेसरिकरलताहतमत्तमातङ्गोत्तमाङ्गविगलदसृग्धारासारणीभिरिव त्रिभुवनकार्यसंपादनानुरागरसैरिव रक्तमण्डले, ताराकुमुदवनग्रहणाय प्रसारितहस्त इव कुङ्कुमारुणैः किरणैः, कनकदर्पण इव प्राचीविलासिन्याः, पूर्वाचलभोगीन्द्रफणामणौ गगनेन्द्रनीलतरुकनककिसलये, नभोनगरप्राग्द्वारकनकपूर्णकुम्भे, तप्तलोहकुम्भाकारे, प्राचीकुमारीललाटतटघटितकुङ्कुमतिलकबिन्दौ, संध्याबाललतैककुसुमे, माञ्जिष्ठारक्तपट्टसूत्रपिण्डसदृशे, संध्यारुणसूत्रग्रथितप्राचीवधूकाञ्चीकाञ्चनदीनारचक्र इव, वासरविद्याधरसिद्धगुलिक इव, कुमार इव संहततारके, पद्मनाभ इवोल्लसितपद्मे, अध्वग इव छायाप्रिये, शक्र इव

इत्यर्थः । 'त्वगि कम्पने' खुरः शफम् । पाटिताः चूर्णीकृताः । पद्मरागाः उदयशैलशिखरगतानि शोणरत्नानि । **कूटकोटिः** शृङ्गाग्रम् । **पूर्वेति** । पूर्वगिरिः उदयाचलः । असृक् रक्तम् । सारणी कुल्या । 'कुल्या च सारणिः' इति हेमचन्द्रः । **त्रिभुवनेति** । त्रिभुवनस्यापि प्रकाशरूपकार्यसंपादने ये अनुरागरसाः प्रीतिरसाः तैः । सूर्याभावे सर्वकर्मणामप्यनुष्ठानासंभवादेवमुक्तिः । अनुरागो रक्तवर्ण इति कविसमयः । **मण्डलं** बिम्बम् । **पूर्वेति** । पूर्वाचल एव भोगीन्द्रः सर्पराजः । **गगनेति** । गगनमेव इन्द्रनीलतरुः तस्य कनककिसलये सुवर्णपल्लवे । उत्प्रेक्षा । 'कनककिसलये राजभवनादौ निर्मितेन रूपकम् । तत्र रेखागवयन्यायात्तरुता' इति शिवरामः । **नभ इति** । प्राक् प्राच्यां दिशि विद्यमानम् । पूर्णकुम्भो नाम जलपूरित आम्रपत्रनालिकेराशिरस्को मङ्गलार्थो भद्रकुम्भ उच्यते । राजधान्यां धनिनां गृहे च द्वारपार्श्वयोरेतादृशाः पूर्णकलशा निक्षिप्यन्त इत्याचारः । **लोहकुम्भः** आयसो घटः । **संध्येति** । संध्यैव बाललता तस्याः एकं कुसुमं तस्मिन् । **माञ्जिष्ठेति** । मञ्जिष्ठया विकसया रक्तानां रञ्जितानां पट्टसूत्राणां पिण्डेन गोलेन सदृशे । **संध्येति** । संध्यैव अरुणसूत्रं तेन ग्रथितं यत् प्राचीवध्वाः काञ्च्यां मेखलायां विद्यमानं काञ्चनदीनारचक्रं चक्राकारः सुवर्णनिष्कः तस्मिन् । 'दीनारः सांव्यवहारिकं रूपकम्' इति सुधा । 'काञ्चनदीनारचक्रं काञ्चनकिङ्किणीसमूहः । अथवा स्त्रियो मङ्गलार्थं स्वर्णमयं वर्तुलं शकलं कण्ठे बध्नन्ति तदेव दीनारचक्रम् । कनकमयताटङ्को वा' इति कश्चित् । 'संध्यारागगुणगुम्फिते प्राचीकाञ्चनदीनारचक्र इव' इति शिवरामपाठः । **वासरेति** । वासरः दिवस एव विद्याधरः तस्य सिद्धः रसादिप्रयोगेण निष्पन्नः गुलिकः गोलाकारा वटिका । तस्मिन्निव । गुलिकशब्दस्य पुंस्त्वं मृग्यम् । **कुमारः** सुब्रह्मण्यः । **तारकाः** नक्षत्राणि, तारकः तन्नामा असुरः । **पद्मं** कमलम्, पद्मा लक्ष्मीः । **छाया**

गोपतौ, उदयगिरिधातुरागारुणदिग्गजपादतलानुकारिणि प्रभूततिमिरतस्करे भगवति सवितरि ससमुदयमारोहति माञ्जिष्ठचामर इव दिग्गजेषु, महाभारतसमररुधिरोद्गार इव कुरुक्षेत्रेषु सुरधनुःकान्तिविलेप इव जलदच्छेदेषु, काषायपट इव शाक्याश्रमशाखिशाखासु, कौसुम्भराग इव ध्वजपटपल्लवेषु, फलपाक इव कर्कन्धूषु, कुङ्कुमरस इव व्योममहासौधाङ्गणे, संचरदरुणयवनिकापट इव कालनटस्य, बालप्रवालभङ्गारुणे प्रसरति बालातपे, क्षणेन चाटुचटुलचक्रवाकहृदयशोकसंतापहरणादिव दहनसमर्पिततेजःप्रवेशादिव दिननाथकान्तोपलसङ्गादिवोष्णिमानमुष्णरश्मेराश्रयति रश्मिसंचये, कन्दर्पकेतुः सर्वरात्रजागरणपरवशाहारशून्यशरीरतया निश्चेतनोऽनेकयोजनशताध्वभ्रमणखिन्नो वासवदत्तयाप्येवंविधया सह लतागृहे मन्दमारुतान्दोलितकुसुमपरिमललुब्धमुग्धमुखरपरिभ्रमद्भ्रमरझंकारमनोहरे तत्कालसुलभया निद्रया गृहीतो निस्पन्दकरणग्रामः सुष्वाप ॥

पुष्पभेदः

ततो वणिजीव प्रसारिताम्बरे, महादावानल इव सकलका-

सूर्यपत्नी, अनातपश्च । **गावः** किरणाः, गौः स्वर्गः । **माञ्जिष्ठेति** । एतादृशे बालातपे प्रसरतीति संबन्धः । माञ्जिष्ठं मञ्जिष्ठया रक्तं चामरं प्रकीर्णकं तस्मिन्निव । गजानां चामरमाभरणीक्रियत इत्याचारः । तथा च 'चलकर्णचामराणां करिणाम्' इत्यादि हर्षचरिते । उल्लेखोत्प्रेक्षयोरत्र संकरः । 'एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः ।' इत्युल्लेखलक्षणम् । **उद्गारः** वमनं प्रसरणमिति यावत् । **छेदाः** खण्डाः । **काषायः** कषायेण रक्तः । 'तेन रक्तं रागात्' इत्यण् । **शाक्यः** बौद्धभिक्षुः । **पटपल्लवाः** वस्त्राञ्चलानि । **कर्कन्धूः** बदरी । **यवनिका** तिरस्करिणी । **बालेति** । प्रवालभङ्गः किसलयच्छेदः, विद्रुमशकलं वा । **चाटु** प्रियवाक्यम् । 'चटु चाटु प्रिये वाक्ये' इति हेमचन्द्रः । **चटुलाः** चारवः । 'चटुलश्चञ्चले चारौ' इति बाणः । **दहनेति** । सायं गृहीतं तेजः प्रातः सूर्याय ददात्यग्निरिति श्रुतिः । तथाच श्रूयते 'आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' इत्यादि । वायुपुराणेऽपि, 'उद्यन्तं च पुनः सूर्यमौष्ण्यमाग्नेयमाविशत्' इति । **उष्णिमानं** उष्णत्वम् । दृढादित्वादिमनिच् । **सर्वरात्रः** सर्वा रात्रिः । 'अहःसर्वैकदेश—' इति समासान्तोऽच् । **निस्पन्देति** । निस्पन्दः स्वस्वविषयग्रहणासमर्थः करणग्रामः इन्द्रियसमूहः यस्य स तादृशः । 'करणं कारणे काये साधनेन्द्रियकर्मसु' इत्यजयः । 'निष्पन्द' इति पाठे षत्वं चिन्त्यम् । तथा च वामनः 'निष्पन्द इति षत्वं चिन्त्यम्' इति ।

तत इति । ततः कन्दर्पकेतुः, लतागृहं प्रियया विनाकृतं अवलोक्य, क्षणं

ष्टोद्दीपिनि कल्पवृक्ष इव सर्वाशाप्रसाधके पतङ्गमण्डले मध्यं नभःस्थलस्यारूढे, कन्दर्पकेतुः प्रबुद्धः, प्रियया विनाकृतं लतागृहमवलोक्य, उत्थाय च तत इतो दत्तदृष्टिः क्षणं विटपिषु क्षणं लतान्तरेषु क्षणमधः कूपेषु क्षणमूर्ध्वं तरुशिखरेषु क्षणं शुष्कपर्णराशिषु क्षणमाकाशतले, क्षणं दिक्षु, क्षणं विदिक्षु च, भ्रमन्ननवरतविरहानलदह्यमानहृदयो विललाप ॥

'हा प्रिये वासवदत्ते देहि मे दर्शनम्। कृतं परिहासेन। अन्तर्हितासि। त्वत्कृते यानि दुःखान्यनुभूतानि, तेषां त्वमेव प्रमाणम्। हा प्रियसख मकरन्द पश्येदं दैवदुर्विलसितम्। किं पूर्वं मया कृतमनवदातं कर्म। अहो विपाको नियतेः। अहो दुरतिक्रमता कालगतेः। अहो ग्रहाणामतिकटु कटाक्षपातनम्। अहो विसदृशफलता गुरुजनाशिषाम्। अहो दुःस्वप्नानां दुर्निमित्तानां च फलम्। सर्वथा न

विटपिषु क्षणं लतान्तरेषु इत्येवं तत इतो दत्तदृष्टिः भ्रमन् विललापेत्यन्वयः। **प्रसारितेति**। प्रसारितं विस्तृतीकृतम्, ग्राहकजनदर्शनाय बहिः प्रकटितं च। अम्बरं आकाशं वस्त्रं च। **सकलेति**। सकलाः काष्ठाः दिशः उद्दीपयति प्रकाशयतीति तस्मिन्, पक्षे सकलानि काष्ठानि इन्धनानि उद्दीपयति दहतीति तस्मिन्। 'काष्ठं दारुणि काष्ठा तु प्रकर्षे स्थानमात्रके। दिशि' इति हैमः। **सर्वेति**। आशाः दिशः, अभिलाषाश्च। प्रसाधकः अलंकर्ता, संपादकश्च। **पतङ्गः** सूर्यः। 'पतङ्गः सूर्यपक्षिणोः' इति हैमः। **विनाकृतं** विरहितम्। **लतेति**। लतान्तरेषु लतामध्येषु लतागुल्मेष्वित्यर्थः। 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' इत्यमरः। शुष्कपदे 'शुषः कः' इति निष्ठातस्य कः। **विदिक्षु** दिङ्मध्येषु। 'दिशोर्मध्ये विदिक् स्त्रियाम्' इत्यमरः। **भ्रमन्** अनवस्थितः। अतिसौन्दर्यमोहितैर्नागैर्देवैर्वा हृता स्यादित्यधोदेशे ऊर्ध्वदेशे च दर्शनमिति शिवरामः।

हेति। हा इति विषादे। इति बहुविधं विलपन् कंदर्पकेतुः, एतादृशेन महासागरकच्छोपान्तेन गत्वा एतादृशं जलनिधिं अपश्यदित्यन्वयः। **कृतं** अलं, परिहासो मास्त्वित्यर्थः कृतमित्यव्ययम्। 'कृतं निवारणनिषेधयोः' इति गणव्याख्याने। 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' इति तृतीया। 'किं परिहासेन अन्तरितासि' इत्यपि पाठः **अनवदातं** अशुद्धं असदित्यर्थः। **विपाकः** परिणामः। **नियतिः** विधिः। 'भाग्यं स्त्री नियतिर्विधिः।' इत्यमरः। **ग्रहाः** चन्द्रसूर्यादयः। **विसदृशेति**। विसदृशं अननुगुणम्। फले विसंवादः विसदृशफलता। **सर्वथेति**। सर्वथा सर्वैः प्रकारैः। 'भवितव्यता प्राक्तनादृष्टपरिपाकिः। 'प्रायः शुभं च विदधात्यशुभं च जन्तोः सर्वंकषा भगवती भवितव्यतैव' इति भवभूतिः। **आगमिताः** अधीताः। **यथावत्** यथार्हम्। 'तदर्हम्' इति

किंचिदगोचरो भवितव्यतानाम् । किं न सम्यगागमिता विद्याः । किं यथावदनाराधिता गुरवः । किं नोपासिता वह्नयः । किं नामाधिक्षिप्ता भूदेवाः । किं न प्रदक्षिणीकृताः सुरभयः । किं न कृतं शरणागतेष्वभयम्' इति बहुविधं विलपन्, मरणेच्छुर्दक्षिणेन काननं निर्गत्य जलनिधिमपश्यत् ॥

अचिन्तयच्च 'अहो मे कृतापकारेणापि विधिना उपकृतिरेव कृता; यदयं लोचनगोचरतां गतः समुद्रः । तदत्र देहं त्यजामि । यद्यप्यनातुरस्यात्मत्यागो न विहितः, तथापि कार्यः । न खलु सर्वः सर्वं कार्यमेव करोत्यसारे संसारे केन किं नाम न कृतम् । तथाहि—गुरुदारहरणं द्विजराजोऽकरोत् । पुरूरवा ब्राह्मणधन-

---

वतिः । **किं नामेति** । अधिक्षिप्ताः । तिरस्कृताः भूदेवाः ब्राह्मणाः । ब्राह्मणतिरस्कारस्यानर्थप्रदत्वम् 'गतश्रिश्च गतायुश्च ब्राह्मणान् द्वेष्टि भारत' इति भारते श्रूयते । **सुरभ्यः** धेनवः । 'सुरभिर्गवि च स्त्रियाम् ।' इत्यमरः । सुरभिमप्रदक्षिणीकृत्य समागतस्य हि दिलीपस्य शापवार्ता श्रूयते । **दक्षिणेनेति** । इदमेनबन्तम् । काननस्य दक्षिणभागेनेत्यर्थः । 'एनपा द्वितीया' इति काननपदे द्वितीया

अहो इति । कन्दर्पकेतुः इत्येवं विचिन्त्य पुलिनतलं आससादेत्यन्वयः । अत्र 'अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्' इति लक्षितो विषमालंकारभेदः । **अनातुरस्य** रोगाद्यपीडितस्य सुस्थस्य । 'आतुरस्य तु मरणम्, दुश्चिकित्सैर्महा रोगैः पीडितस्तु पुमानपि । प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनादिकमिति स्मृत्युक्तमेव इति शिवरामः । **असारे** साररहिते । 'अद्य स्थित्वा श्वो गमिष्यद्भिरल्पैर्लज्जास्माभिर्मीलिताक्षैर्जितैव' इत्युक्तोऽभिप्रायः, असार इत्यनेन विवक्षितः । केचित्तु 'असारे संसारे' इत्यस्योत्तरवाक्ये संबन्धमभिप्रयन्ति । **गुर्विति** । गुरुः सुरगुरुः बृहस्पतिः तस्य दाराः पत्नी तारा । गुरोः पितृभ्रात्राचार्यादेः दारा इति च । द्विजराजः चन्द्रः, ब्राह्मणोत्तमश्च । 'द्विजराजः शशधरः' इत्यमरः । पुरा चन्द्रः स्वं कामयमानां गुरुपत्नीं तारां परिगृह्य तस्यां बुधं तनयमजीजनदिति श्रीविष्णुपुराणे । **पुरूरवा इति** । बुधस्य इलायां जातश्चन्द्रवंश्यो राजा पुरूरवाः । 'स वयःशेषे ब्रह्मस्वमगृह्णात् । तत एव नष्ट इत्यपि भारते' इति शिवरामः । 'पुरूरवाः पूर्वां दिशं जेतुं गच्छन्केनाप्याहृतप्रसूतधेनेन विप्रेण यज्ञे निमन्त्रितो लोभाक्षिप्तहृदयस्तद्धनं जिहीर्षुस्तच्छापान्नष्टः । तस्मिन्मृते स विप्रो नृपं विना प्रजा निवर्तत इति ज्ञात्वा तदायुषा राजर्षिमायुर्नामानमजीजनत्' इति हर्षचरितटीकायां शंकरः । **नहुष इति** । दोहदी साभिलाषः । 'कामुको दोहदी मत इति रत्नकोशः' इति शिवरामः । भुजङ्गः सर्पः, विटश्च । 'भुजङ्गोऽहौ च विट्टे च' इति मेदिनी । इन्द्रे वृत्रवधब्रह्महत्याक्रान्ते सति, तत्स्थानं देवैरारोपितो नहुषो नाम नरपतिरिन्द्राणी-

तृष्णया विननाश। नहुषः परकलत्रदोहली भुजङ्गतामयासीत्। ययातिः कृतब्राह्मणीपाणिग्रहणः पपात। सुद्युम्नः स्त्रीमय एवाभवत्। सोमकस्य प्रख्याता जगति जन्तुवधनिर्घृणता। पुरुकुत्सः कुत्सित एवाभवत्। कुवलयाश्वोऽश्वतरकन्यामपि जगाम। नृगः कृकला-

दोहदी

भोगलालसः स्वयानवाहिषु महर्षिषु मन्दमन्दं गच्छन्तमगस्त्यं 'सर्प सर्प' इत्यधिक्षिपन्कुपितेन तेन 'सर्पो भव' इति शप्त इति भारते। **ययातिरिति**। ययातिः चन्द्रवंश्यो राजा। ब्राह्मणी शुक्रस्य पुत्री देवयानी। पाणिग्रहणं विवाहः, कूपे वृषपर्वपुत्र्या शर्मिष्ठया पातिताया देवयान्यास्ततः समुद्धरणाय हस्तावलम्बनं च। पपात पतितोऽभवत्। स्वेन कूपादुद्धृतां ब्राह्मणीं देवयानीं कालान्तरे तत्पित्रा शुक्रेणानुज्ञातः सन्नेव नहुषो व्यूढवान्। अथापि 'कालेन चासौ पपात' इति शंकरः। 'पपात तारुण्यादित्यर्थः।' समयबन्धेन स्वपरिचारिकायां शर्मिष्ठायामासक्तिं ज्ञात्वा देवयान्या कुपितया निवेदितः शुक्रे नहुषं 'प्रवया भव' इति शशापेति भारते। कूपाद्देवयान्युद्धरणकाले स्वयं कूपे पपातेति सांप्रदायिकं भाववर्णनम्। **सुद्युम्न इति**। 'सुद्युम्नो राजा, शोभनं द्युम्नं बलमस्येति च। स्त्रीमयो महिलाकृतिः, कान्तानुरक्तश्च। योऽत्र तोयमुपयोक्ष्यते, स स्त्रीत्वमापत्स्यते इति भगवता भवान्याभ्यर्थितेन भवेन शप्तः सन्सरसः पीत्वा तोयं सुद्युम्नो मृगयाविहारी स्त्रीमयोऽभूदिति' हर्षचरितव्याख्यायां शंकरः। शिवरामस्त्वत्र मूकः। 'सुद्युम्नस्य विभण्डकमुनिशापात् वम्रिकात्वम्। वम्रिकायोषितौ स्त्रियाविति कोशः' इति प्राचीनटिप्पणी। **सोमकस्येति**। सोमको राजा। जन्तुर्नाम तत्पुत्रः। जन्तवः प्राणिनश्च। निर्घृणता निर्दयत्वं निर्जुगुप्सत्वं वा। 'घृणा जुगुप्सादययोः' इति हरिः। एकपुत्रकः सोमको बहून्पुत्रान् लिप्सुः, पुत्रस्य जन्तोर्वपया होमे तद्धूमाघ्राणेन सर्वा अप्यन्तःपुरस्त्रियो गर्भिण्यो भविष्यन्तीति पुरोधसा अभिहितस्तथैव चकारेति शंकरशिवरामौ। 'जन्तुरिति कश्चिदसुरः' इति टिप्पणी। **पुरुकुत्सः** कश्चन नृपतिः। पुरुकुत्सः पुरा तपश्चरन्नर्मदायां स्नानं कुर्वन्कामप्यङ्गनामालोक्य कामाविष्टो 'नीतिमुत्ससर्ज' इति शंकरः। 'रेवैव स्त्रीरूपेणागता' इति परं भेदः प्राचीनटिप्पण्याम्। **कुवलयाश्वः** कश्चिद्राजा। **अश्वेति**। अश्वतरो नाम कश्चित्सर्पः। तस्य कन्या मदालसा। गर्दभेनाश्वायामुत्पन्नः पशुविशेषश्च अश्वतर इत्युच्यते, तस्य कन्या च। 'वत्सोक्षाश्व—' इति तनुत्वे अश्वशब्दात् ष्टरच्। विश्वावसोर्गन्धर्वराजस्य सुता मदालसा पातालकेतुना दानवेन बलात् गृहीत्वा पाताले निक्षिप्ता। कालान्तरे च दानवं तं हतवता कुवलयाश्वेन पाणौ गृहीता। ततश्च पातालकेतुसुहृदः कस्यचन दानवस्य कपटप्रयोगेण मदालसा कुवलयाश्वस्यासंनिधावग्निं प्रविष्टा। तद्विरहदूनस्य स्वसुतसखस्य च कुवलयाश्वस्य प्रियचिकीर्षुणा अश्वतराभिधेन सर्पराजेन परमेश्वरप्रसादाद्यथापुरावस्थितवयोरूपादिकं समासादिता मदा-

सतामगमत् । नलः कलिनाभिभूतः । संवरणो मित्रदुहितरि विक्लवतामगात् । दशरथोऽपीष्टरामोन्मादेन मृत्युमवाप। कार्तवीर्यो गोब्राह्मणपीडया पञ्चत्वमयासीत् । शन्तनुरतिव्यसनाद्वने विललाप। युधिष्ठिरः समरशिरसि सत्यमुत्ससर्ज। तदित्थं नास्त्येव जगत्यकलङ्कः कोऽपि तदहमपि देहमुत्सृजामि' इत्येवं विचिन्त्य विष्णुमिवानेकमुक्तोपेतं पुलिनतलमाससाद।

ततः कृतस्नानादिसकलकृत्यो जलनिधिजलमवतरितुमारेभे शरीरत्यागाय। ✗

७/११ अथ सानुग्रहेषु ग्राहेषु, निर्मत्सरेषु मत्स्येषु, अनिच्छेषु कच्छ-

---

लसा कुवलयाश्वाय प्रतिपादितेति वायुपुराणे । 'कुवलयाश्वो मृगयाप्रसङ्गेन घर्मातुरो मज्जनरभसेन सरसीमवतीर्णो रसातलं प्राप्तो मदालसां नागकन्यकामूढवान्' इति, 'मायानिर्मितां मदालसामश्वतरः कुवलयाश्वायार्पयत्' इति च शंकरशिवरामौ । **नृगः** कश्चिद्राजा । स खलु कस्मैचिद्दत्तपूर्वामेव गावमज्ञानादन्यस्मै प्रदिशन् तेन व्यतिकरेण विवदमानाभ्यां ब्राह्मणाभ्यां 'कृकलासो भव' इति शप्त इत्युत्तररामायणे । **नलः** राजा । **कलिना** चतुर्थयुगाभिमानिदेवतया, कलहेन च । इयं कथा सुप्रसिद्धा । **संवरणः** कश्चिन्नृपतिः । **मित्रेति** । मित्रस्य रवेः दुहिता कन्या तपती नाम । मित्रं सुहृत् तस्य दुहिता च । **विक्लवः** विह्वलः धैर्यच्युतः । 'मित्र इति कश्चिद्राजा' इति टिप्पणी । **इष्टेति** इष्टा प्रिया या रामा रमणी कैकेयी तया तस्यां वा उन्मादः चित्तविभ्रमः । इष्टः यः रामः स्वसुतः तेन तस्मिन्वा उन्मादेन च । प्रसिद्धमिदम् । **गोब्राह्मणेति** । गोनिमित्तं ब्राह्मणस्य परशुरामपितुर्जमदग्नेः पीडनं वधः । गवां ब्राह्मणानां च पीडनं च । पञ्चत्वं मरणम् । जमदग्निहोमधेनुं हठादाकृष्य स्वपुरं नीतवान् कार्तवीर्यः पश्चात्परशुरामेण हत इति भारते । **शन्तनुः** भीष्मपिता । शापाद्भुवमागतां गङ्गां समयबन्धेन विवहन् शन्तनुरष्टमं पुत्रमपि जले प्रक्षेप्तुकामां तां निरुन्धानः समयबन्धातिक्रमात्तस्यां गतायां बहुधा विललापेति भारते । **युधिष्ठिरः** धर्मपुत्रः। 'गवियुधिभ्याम्—' इति अलुक् । स हि 'अश्वात्थामा हतः' (कुञ्जरः) इत्यर्थद्वयाभिप्रायेण प्रयुञ्जानः सत्यात्प्रच्युत इति भारते । 'शोकान्मृतिर्वृषोत्सर्गो वने च परिदेवनम् । कन्दर्पकेतुः स्वकृतावुपष्टम्भकमुक्तवान्' इति शिवरामसंग्रहश्लोकः। एतद्वाक्यसदृशानि 'द्विजानां राजा गुरुदारग्रहणमकार्षीत्' इत्यादीनि हर्षचरिते तृतीयोच्छ्वासे द्रष्टव्यानि । **कलङ्कः** अपवादः । **मुक्ताः** मौक्तिकानि, मुक्तिं गता जीवाश्च । 'कमलवनम्' इत्यारभ्य, 'मुक्तोपेतम्' इत्यन्तं बहुषु कोशेषु नास्ति ।

अथेति । ग्राहादिष्वेवं स्थितेषु सरस्वती समुदचरदित्यन्वयः । **ग्राहाः** अवहाराः । **कच्छपाः** कूर्माः । **नक्राः** कुम्भीराः । 'ग्राहोऽवहारः, नक्रस्तु

पेषु अक्रूरेषु नक्रेषु, अभयंकरेषु मकरेषु, अमारेषु शिशुमारेषु आकाशात्सरस्वती समुदाचरत्—'आर्य कन्दर्पकेतो पुनरपि तव प्रियया संगतिर्भविष्यत्यचिरेण। तद्विरम मरणव्यवसायात्' इति। सोऽपि तदुपश्रुत्य मरणारम्भाद्विरराम। ततः प्रियासमागमाशया शरीरस्थितिहेतुमशनं चिकीर्षुः कच्छोपान्तवनं जगाम। अथ तत इतः परिभ्रमन्, फलमूलादिना वने वर्तयन्, कालमनेकं निनाय।

एकदा तु कतिपयमासापगमे काकलीगायन इव समृद्धनिम्नगानदः, सायंतनसमय इव नर्तितनीलकण्ठः, कुमारमयूर इव समारूढशरजन्मा, तपस्वीव प्रशमितरजःप्रसरः, तापस इव धृतजलदकरकः, प्रलयकाल इव दर्शितानेकतरणिविभ्रमः, निरुपद्रवकाननप्रदेश इव घनोत्सेकितसारङ्गः, रेवतीकरपल्लव इव हलिधृतिकरः,

---

कुम्भीरः' इत्यमरः। **अभयंकराः** भयंकरभिन्नाः। 'मेघर्ति—' इति खच्। **अमाराः** अमारकाः। **शिशुमाराः** मत्स्यविशेषाः। 'तद्भेदाः शिशुमारोद्रशङ्खो मकरादयः' इत्यमरः। **चिकीर्षुः** कर्तुमिच्छुः। **वर्तयन्** शरीरधारणां कुर्वन्।

एकदेति। एकदा कदाचित्, एतादृशः वर्षासमयः समाजगामेत्यन्वयः। **काकली**कलः सूक्ष्मो ध्वनिः। **समृद्धेति**। समृद्धाः जलसंपूर्णाः निम्नगाः नद्यः नदाः प्रत्यक्स्रोतसश्च यस्मिन् स तथोक्तः। पक्षे, निम्नं नीचं गम्भीरं वा गानं ददातीति तादृशः। **नीलकण्ठः** मयूरः, शिवश्च। 'नीलकण्ठौ शिखीश्वरौ' इति रत्नमाला। **समारूढेति**। समारूढं अभिवृद्धं शराणां तृणविशेषाणां जन्म उत्पत्तिः यत्र स तादृशः। पक्षे, समारूढः शरजन्मा सुब्रह्मण्यः यं स तथोक्तः। 'शरजन्मा षडाननः' इत्यमरः। **रजः** धूलिः, रजोगुणश्च। **धृतेति**। जलदाः मेघाः। करकाः वर्षोपलाः। पक्षे, जलं ददातीति जलदः जलाहारक इत्यर्थः, तादृशः करकः कमण्डलुः धृतः येन स तादृशः। 'वर्षोपलस्तु करका' 'कमण्डलौ च करकः' इत्यमरः। **तरणयः** नौकाः, सूर्याश्च। 'तरणिस्तरणेऽर्केशौ कुमार्योषधिनौकयोः' इति हैमः। **विभ्रमः** विशेषेण भ्रमणं विलासश्च। **घनेति**। घनेन मेघेन उत्सेकिताः मत्ताः कृताः सारङ्गाः चातकाः यत्र स तादृशः। पक्षे घनं अधिकं यथा तथा, उत्सेकिताः सारङ्गाः हरिणाः यत्र सः। 'चातके हरिणे पुंसिः सारङ्गशबले त्रिषु' इत्यमरः। **रेवती** बलरामस्य पत्नी। 'रेवती हलिपत्न्यां स्यात्तारायामिन्मातृभेदयोः इति मेदिनी। **हलीति**। हलिनी हलविशिष्टाः कर्षकाः, हली हलायुधो बलरामश्च। धृतिः संतोषः धैर्यं वा। 'हली कृषकसीरिणोः' 'धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः। **मेघनादः** मेघगर्जितम्, तदाख्यो रावणपुत्रश्च यस्य इन्द्रजिदिति नामान्तरम्। **घनेति**। घनैः मेघैः

लङ्केश्वर इव समेघनादः, विन्ध्य इव घनश्यामः, युवतिजन इव पीनपयोधरः समाजगाम वर्षासमयः ।

विभिन्नमेघनीलोत्पलकाननीले क्रीडासरसीव नभसि स्मरस्य कनकरत्ननौकेव, जलदकाललक्ष्मीमातङ्गकन्यानर्तनरज्जुरिव, नभःसौधतोरणरत्नमालिकेव, प्रवसता निदाघेन दिवः पयोधरे स्मरणाय दत्ता नखपदावलिरिव, गगनलक्ष्मीबन्धुररशनामालेव, नभोमन्दारसुन्दरकलिकेव, रतिनखमार्जनरत्नशलाकेव, रत्नमयी विलासयष्टिरिव कुसुमकेतोरिन्द्रधनुर्लता रराज । ✗

८/१९

अतितृष्णावेगपीतजलनिधिजलशङ्खमालां बलाकाच्छलादुद्वमन्निवादृश्यत जलधरनिकरः । पीतहरितैः कृष्णकेदारिकाकोष्ठिकासु समुत्पतद्भिर्दर्दुरशिशुकैर्जातुषैर्नयद्यूतैरिव चिक्रीड विद्युता समं घन-

---

श्यामः । उभयत्र तुल्यमिदम् । विन्ध्यपक्षे घनवत् घनं निबिडं यथा तथा वा श्याम इति वा । **पयोधरः** मेघः कुचश्च ।

विभिन्नेति । एतादृशी इन्द्रधनुर्लता रराजेति सम्बन्धः । विभिन्नानि मेघा एव नीलोत्पलकाननानि तैः नीले । **जलदेति** । जलदकाललक्ष्मीः वर्षाकालशोभैव मातङ्गकन्या चाण्डालकुमारी तस्याः नर्तनरज्जुः डोलोपयोगिनी रज्जुः रज्जुमयी डोलेति यावत् । ' कन्या सैव नर्तकी तस्याः रज्जुः समाकर्षणरज्जुः । चण्डालकन्या रज्जुमवलम्ब्य नृत्यति ।' इति शिवरामः । मातंगः श्वपचे गजे ' इति मेदिनी । **तोरणं** बहिर्द्वारम् । ' तोरणोऽस्त्री बहिर्द्वारम् ' इत्यमरः । **प्रवसतेत्यादि** । प्रवसता देशान्तरं गच्छता । अत्र निदाघदिवोः पुंलिङ्गस्त्रीलिङ्गाभ्यां पयोधरशब्दश्लेषेण नायकनायिकाव्यवहारप्रतीतेः समासोक्तिः । तदुपजीविनी च नखपदावलित्वोत्प्रेक्षेति तयो संकरः । नखपदावलिः नखक्षतपंक्तिः । ' चिरोत्पन्नप्रवासेन प्रीतिर्गच्छेत्पराभवम् । रागायतनसंस्मारि यदि न स्यान्नखक्षतम् ।' इति काञ्चीनाथः । ' ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम् ।' इति कश्चित्कविः । **बन्धुरा** रम्या । ' बन्धूरबन्धुरौ रम्ये ' इति विश्वः । **रशना** काञ्ची । **यष्टिः** दण्डः । ' रत्नशुक्तिरिव, विलासयष्टिरिव ' इत्यपि पाठः ।

अतितृष्णेति । तृष्णा पिपासा, स्पृहा च । अतिपिपासाकुलो हि जलेन सह तत्स्थितं तृणादिकमप्यन्तर्निगिरति । अत्याशया सुतरां भुञ्जानोऽपि, गुरुभूतोदरोऽपरिजीर्णभुक्तपदार्थश्च सन्वमतीति लोकस्थितिः । एतदभिप्रायेणैवात्र तृष्णापदं प्रयुक्तम् । ' तृष्णा स्पृहापिपासे द्वे ' इत्यमरः । **बलाकाः** बिसकण्ठिकाः । सापह्नवोत्प्रेक्षा । **पीतेति** । कृष्णाः सस्यसमृद्धया श्यामलाः या केदारिकाः अल्पानि क्षेत्राणि तान्येव कोष्ठिकाः अक्षफलकस्थकोष्ठाः ' कट्टम् ' इति द्राविडभाषायां प्रसिद्धाः तासु । समुत्पतद्भिः । उत्प्लुत्योत्प्लुत्य गच्छद्भिः । पीतहरितैः गौरवर्णैः

कालः। रविदीपकज्जलितमेघनिकषोपले मेघसमयस्वर्णकारकषित-स्वर्णरेखेव तटिदशोभत। विरहिणां हृदयं विदारयितुं कृतं करपत्र-मिव कुसुमायुधस्य केतकीपुष्पमभासत। जलददारुणि लोलतटिल्ल-ताकरपत्रदारिते पवनवेगनिर्धूताश्चूर्णनिकरा इव जलकणा बभुः। विच्छिन्नदिग्वधूहारमुक्तानिकरा इव खरपवनवेगभ्रमितघनघरट्टघट्टन-संचूर्णिततारानिकरा इव त्रिभुवनविजिगीषोर्मकरध्वजस्य प्रस्थान-लाजाञ्जलय इव करका व्यराजन्त। नवशाद्वलं सेन्द्रगोपं महीमहि-लायाः शुकाङ्गश्यामलं लाक्षारसाङ्कितं स्तनोत्तरीयमिवालक्ष्यत।

पालाशवर्णैश्च। दर्दुरशिशुकैः मण्डूकशिशुभिः करणैः। घनकालः वर्षाकालः। विद्युता समम्। जातुषैः जतुनो विकारैः जतुनिर्मितैरित्यर्थः। 'त्रपुजतुनोः षुक्' इति विकारार्थे अण्प्रत्ययः षुगागमश्च। नयद्यूतैः नयाख्यद्यूतविशेषसाधनै रक्षैरिव। चिक्रीड क्रीडितवान्। द्यूतशब्दः तत्साधनाक्षलाक्षणिकः। नयोनीतौ द्यूतभेदे' इति रत्नमाला। 'नयो युद्धनीतिः। तच्छ्रेक्षकैः द्यूतैः चतुरङ्गैः चतुरङ्गसाधनेषु लक्षणा। नयद्यूतसाधनभूतैर्हस्त्यश्वादिभिरिव समुत्पतद्भिः' इति शिवरामः। 'जातुषदरोदरैरिव.....नयद्यूतैरिव' इति पाठः, 'जातुषाः जतुनिर्मितानि, दुरोदराः द्यूतसाधनानि। नयद्यूतैः हरितवर्णद्यूतैः। नयो नीत्यां शष्पवर्णे इति कोशः' इति टिप्पणी च क्वचित्समुपलभ्यते। **रवीति**। रविनैव दीपेन कज्जलिते श्याम-लिते मेघे एव निकषोपले स्वर्णवर्णपरीक्षापाषाणे। स्वर्णरेखायाः स्फुटविभासाय निकषाश्मा श्यामीक्रियत इति प्रसिद्धम्। **करपत्रं** क्रकचः। 'क्रकचोऽस्त्री कर-पत्रम्' इत्यमरः। 'क्रकचच्छदम्' इति पाठे, क्रकचच्छदम् केतकीकुसुममिति व्याख्येयम्। 'द्रोणीदलं सूचिपुष्पं जम्बालं क्रकचच्छदम्' इति हारावली। 'क्रकैतकच्छदम्' इति पाठस्तु चिन्त्यः। **दारु** काष्ठम्। **विच्छिन्नः** त्रुटितः। **खरेति**। खरपवनस्य चण्डवातस्य वेगेन भ्रमितः यः घन एव घरट्टः तण्डुलगो-धूमादिचूर्णीकरणसाधनीभूतः पाषाणमयः सक्तुपेषणयाख्यो यन्त्रविशेषः, यस्य द्राविडभाषायां (एन्द्रम्) इति व्यवहारः। 'प्रतिहट्टपथे घरट्टजात्' इति नैषधे। घट्टनं चूर्णनाय यन्त्रभ्रमणम्। **प्रस्थानेति**। 'अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः' इति कालिदासः। **नवेति**। शाद्वलं नवतृणश्यामलं स्थलम्। शादाः बालतृणानि अस्मिन् सन्तीति विग्रहः। 'नडशादाड्ड्वलच्।' **इन्द्रगोपाः** रक्तवर्णाः कीटविशेषाः। 'हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्। च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम्। भवतु आदास्ये तावत्। (परिक्रम्यावलोक्य च सास्रम्) कथं सेन्द्रगोपं नवशाद्वलमिदम्' इति विक्रमोर्वशीये।

मेघकुम्भसलिलैः पृथिवीनायिकां स्नपयित्वा प्रावृट्चेटिकायां गतायां स्वच्छमम्बरं दर्शयन्ती शरच्चेटिका समाजगाम । X १२/२२

अनन्तरमखञ्जखञ्जरीटे अकुञ्चितक्रौञ्चसंचारे, निर्भरभरद्वाजद्विजवाचाटविटपिविटपे, पटुतरप्रभप्रभाते, उद्भ्रान्तशुककुलकलकलसंकुलकलमकेदारे, प्रवेशितवेशराजहंसे, कंसारातिदेहद्युतिद्युतले, हंसकुलतुलितजरज्जलमुचि, सान्द्रीकृतेन्दुमहसि, गामुकजनमृदितमधुतृणवीरुधि, सरससारसरसितसारकासारे, कशेरुकन्दलुब्धपोत्रिपोत्रोत्खातसरस्तटभागे, चकितचातके, विरलवारिदे, तारतरतारके, वारुणीतिलकचन्द्रमसि, स्वादुतरसलिले, स्फुरितशफरकबलननिभृतबकालिके, मूकमण्डूकमण्डले, संकोचितकञ्चुकिनि, काञ्चन-

---

प्रावृट् वर्षाकालः । **अम्बरं** वस्त्रम् , आकाशं च ।

अनन्तरमिति । अनन्तरं एतादृशे शरत्समयारम्भे सति कन्दर्पकेतुः पुत्रिकां पस्पर्शेत्यन्वयः । खञ्जाः गतिविकलाः ते न भवन्तीति **अखञ्जाः** स्वेच्छासंचारिणः । खञ्जरीटाः खञ्जनपक्षिणः **अकुञ्चितः** अप्रतिबद्धः । क्रौञ्चाः पक्षिभेदाः । **भरद्वाजद्विजाः** व्याघ्राटपक्षिणः । **पट्विति** । पटुप्रभं स्फुटकान्ति प्रकाशमानमित्यर्थः । प्रभातं अहर्मुखं यत्र तस्मिन् । **कलमकेदारः** शालिक्षेत्रम् । **प्रवेशितेति** । वेशः गृहः वर्षाकाले परित्यक्तं स्वस्वपूर्वस्थानमित्यर्थः । ' वेशो वेश्यागृहे गेहे ' इति हैमः । ' प्रवेशितावेश ' इति पाठमभ्युपगम्य, ' आवेशः स्थानम् ' इति केचित् । ' आवेशिकाः आगन्तवः ' इति शिवरामः । **कंसारातिः** श्रीकृष्णः । **तुलिताः** उपमिताः । **जलमुचः** मेघाः । **इन्दुमहांसि** चन्द्रकिरणाः । **गामुकेति** । गामुकाः गन्तारः पथिका इत्यर्थः । तैः मृदिता भग्नाः मधुतृणवीरुधः लतावद्दीर्घा इक्षुकाण्डाः यस्मिन् तथोक्तैः । मृदिताः प्रहताः मधुतृणानां वीरुधः गुल्माः यत्रेति वा । गामुके ' लषपत—' इति उकञ् । ' इक्षुः खंगदलो मधुः । तस्मिन्मधुतृणं भेदाः पुण्ड्रकान्तारकादयः ' इति बाणः । ' वीरुधौ गुल्मगुल्मिन्यौ ' इति रत्नमाला । ' वीरुत्स्त्री गुल्मवाटयोरिति कोशः ' इति टिप्पणी । ' कामुकजनमुदित ' इति ग्रन्थाक्षरमुद्रितपाठः । ' सान्द्रीकृतेन्द्रमहकामुकमुदिमधुरमधुतृणवीरुधि ' इति पाठादेरेण, ' इन्द्रमहकामुकानां शुनाम् ' इति शिवरामः । **सरसेति** । सरसानां सतोषाणां सारसानां चक्रवकाणां हंसानां वा रसितैः कूजितैः साराः श्रेष्ठाः कासाराः सरांसि यस्मिन् तथोक्ते । कशेरुः मुस्ता । **पोत्री** वराहः । **चकितः** वित्रस्तः । चातकानां वर्षाकाले हि तोषः । **तारतराः** अत्यन्तविशुद्धाः । मुक्ताविशुद्धिवाचकस्य तारशब्दस्य केवलशुद्धे प्रयोगः । तारतराः अत्यधिका वा । **वारुणीति** । वारुणी पश्चिमा दिक् । तदा चन्द्रः स्फुटं प्रकाशत इति भावः । वारुणी सुरा तस्याः प्रतिमारूपेण चन्द्रो भूषणं भवतीति

च्छेदगौरगोधूमशालिशालिनि, उत्क्रोशदुत्क्रोशे, सुरभिसौगन्धिकगन्धहारिहरिणाश्वे, दरदलितकुमुदामोदिनि, निर्गलितबर्हबर्हिणि, कूजत्कोयष्टिके, धृतधृतिधार्तराष्ट्रे, कलमगोपिकागीताकर्णनसुखितमृगयूथे, विसूत्रितशतमखधनुषि, स्मेरकाश्मीररजःपिञ्जरितदशदिशि, विकस्वरकमले, बन्धूकबान्धवे शरत्समयारम्भे विजृम्भमाणे, कन्दर्पकेतुस्तत इतः परिभ्रमन् कांचिच्छिलामयीं पुत्रिकां दृष्ट्वा, मम प्रियानुकारिणीति करेण पस्पर्श।

अथ सा स्पृष्टमात्रैव शिलाभावमुत्सृज्य वासवदत्तास्वरूपं प्रपेदे। तामवलोक्य कन्दर्पकेतुरमृतार्णवमग्न इव सुदृढमालिङ्ग्य, 'प्रिये वासवदत्ते किमेतत्' इति प्रपच्छ।

सा तु दीर्घमुष्णं च निःश्वस्य प्रत्युवाच—'आर्यपुत्र अपुण्याया मन्दभाग्याया मम कृते महाभागो भवान् उत्सृष्टराज्य एकाकी परिभ्रमन्प्राकृतजन इव अवाङ्मनसगोचरं दुःखमनुबभूव। उपवासादिना तृषातुरे भवति निद्राश्रान्ते प्रथमप्रबुद्धाहं भवतः फलमूलादिकमाहरिष्यामीति विचिन्त्य फलाद्यन्वेषणाय वने नल्वमात्रमगच्छम्।

अथ क्षणेन तरुगुल्मान्तरितं सेनानिवेशं दृष्ट्वा, 'किमयं ममाकर्षणाय तातव्यूहः समायातः। आहोस्विदार्यपुत्रव्यूहः' इति चिन्तयन्तीं मां चारकथितोदन्तो दूरात्किरातसेनापतिर्धावति स्म।

केचित्। **कञ्चुकिनः** सर्पाः। **छेदाः** खण्डाः। **शालयः** कलमाः। **उत्क्रोशन्तः** कूजन्तः। **सौगन्धिकं** कल्हारम्। **हरिणाश्वः** वायुः। 'पृषदश्वो गन्धवहः' इत्यमरः। **दरं** ईषत् **बर्हाणि** मयूरपिच्छानि। **बर्हिणः** मयूराः। **कोयष्टिकाः** टिट्टिभकाः। **धृतिः** तोषः। धार्तराष्ट्राः हंसविशेषाः। **कलमगोपिकाः** शालिरक्षिकाः स्त्रियः। **विसूत्रितं** विच्छिन्नम्। **स्मेरं** विकसितम्। 'स्मेरं विनिद्रमुन्निद्रविमुद्रहसितानि च' इति हेमचन्द्रः। **पुत्रिकां** प्रतिमाम्।

एकाकी असहायः। 'एकादाकिनिचासहाये।' **अवाङ्मनसेति**। वाचो मनसश्चाविषयमित्यर्थः। 'अचतुर—' इति सूत्रेण वाङ्मनसशब्दो निपातितः। अनुबभूवेत्यत्र परोक्षे लिट्, 'शेषे प्रथमः' इति प्रथमपुरुषः। **तृषा** पिपासया। 'उदन्या तु पिपासा तृट्' इत्यमरः। **आतुरे** ससंकटे। आहरिष्यामि संपादयिष्यामि। **नल्वेति**। नल्वप्रमाणकं देशम्। प्रमाणे मात्रच्। अत्यन्तसंयोगे अध्वनो द्वितीया। 'नल्वः किष्कुचतुःशतम्' 'किष्कुर्हस्ते वितस्तौ च' इत्यमरः।

अथेति। अथ किरातसेनापतिर्धावति स्मेति संबन्धः। **अन्तरितं** तिरोहितम्। **निवेशं** शिविरम्। 'निवेशः शिविरम्' इत्यमरः। **आकर्षणं** बलादा-

ततोऽन्यः किरातसेनापतिस्तादृश एव तथाभूतया सेनयान्वितो मृगयां गतः, सोऽपि तच्छ्रुत्वा धावति स्म ।

अथैकामिषलुब्धयोर्गृध्रयोरिव तयोर्युद्धमासीत् ।

ततः प्रवृत्तशरासारदुर्दिनस्थगितदिनकरकिरणे, श्वित्रदुर्भगेष्विव शरीरेष्वनास्थां कलयन्तः, समं द्विषतां धनुषां च जीवकर्षणं योधाश्चक्रुः ।

तत्र त्यागिन इव दानवन्तो मार्गणसंपातं सहन्तः, समृद्धविलासिन इव शृङ्गरोपशोभिताः सहेमकट्याश्च, सदारामा इव कदलीराजिताः सद्विजाश्च निशानिवहा इव नक्षत्रमालोपशोभिताः,

---

कृष्य नयनम् । **व्यूहः** सैन्यविन्यासः 'व्यूहः स्याद्बलविन्यासे वृन्दे निर्माणतर्कयोः' इति विश्वः । **चारः** गूढपुरुषः । **मृगया** आखेटः । 'आखेटो मृगया स्त्रियाम्' इत्यमरः ।

एकामिषं एकं भोग्यवस्तु, एकं मांसं च । 'आमिषं पुंनपुंसकम् । भोग्यवस्तूनि संभोगेऽप्युत्कोचे पललेऽपि च' इति मेदिनी । 'एकामिषप्रभवमेव सहोदराणामुज्जृम्भते जगति वैरमिति प्रसिद्धम्' इति कृष्णमिश्रः ।

प्रवृत्तेति । शराणां बाणानां आसारः वर्ष एव शराणां जलानां आसारः धारासंपातः, तेन जातं यत् दुर्दिनं ध्वान्तम् । जलदध्वान्तवाचिनो दुर्दिनशब्दस्य ध्वान्तमात्रेऽत्र प्रयोगः । 'शरस्तु तेजने बाणे दध्यग्रे ना शरं जले' इति विश्वः । **श्वित्रं** श्वेतकुष्ठं नाम रोगः । 'स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्' इति दण्डी । **अनास्थां** अनादरम् । **समं** एककालम् । **जीवेति** । जीवस्य जीवितस्य आकर्षणं अपनयनम्, जीवायाः मौर्व्याः आकर्षणं आरोपणं च । 'जीवः स्यात्त्रिदशाचार्ये द्रुमभेदे शरीरिणि । जीवितेऽपि च जीवा तु वचायां धनुषो गुणे ।' इति हैमः । अक्रमातिशयोक्तिः । 'अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः' इति तल्लक्षणम् ।

दानं मदजलम्, वितरणं च । **मार्गणाः** बाणाः, याचकाश्च । 'मार्गणस्तु शरेऽर्थिनि' इति हैमः । **सहन्त इति** । 'षह मर्षणे' इति चौरादिकस्य आधृषीयत्वेन णिजभावे परस्मैपदम् । 'स एवायं नागः सहति कलभेभ्यः परिभवम्' इति भल्लटः । **शृङ्गारः** गजमण्डनम्, आद्यो रसः सुरतं वा । **कट्या** गजमध्यबन्धनरज्जुः, काञ्ची च । 'कट्या बृहतिकायां स्यात्काञ्च्यां मध्येभबन्धने' इति मेदिनी । **सदारामाः** श्रेष्ठानि उपवनानि । **कदली** पताका, रम्भावृक्षश्च । 'रम्भावृक्षे च कदली पताकामृगभेदयोः' इति मेदिनी । **द्विजाः** दन्ताः, पक्षिणश्च । 'द्विजः, स्याद्ब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना' इति मेदिनी । **नक्षत्रमाला** तारकापङ्क्तिः, सप्तविंशत्या मौक्तिकैर्ग्रथितो हारश्च । 'सैव नक्षत्र-

शरद्दिवसा इव समुल्लसत्पद्मा महामृगा बभुः । 13|11

उत्कुपिता इव क्षमां मुञ्चन्तः, पयोधय इवावर्तशोभिनः सोर्मयश्च, उद्यानोद्देशा इव समल्लिकाक्षाः, कुलालगृहा इव अभिनवभाण्डभारिणः, रत्नाकरा इव सदेवमणयः, लेखा इव सेन्द्रायुधवृद्धयः, क्षीबा इव पानभूषितास्तुरंगमा विरेजुः ।

कर्णाभ्यां श्रुतपरापवादाभ्याम्, खलोदयसाधुक्षयसाक्षिभ्यामक्षिभ्याम्, अस्थानेऽपि नमता मूर्ध्ना, कीर्तयता चाकीर्तनीयान्यास्येन च वियुक्तोऽहं दिष्ट्येति हर्षादिव चिरं ननर्त कबन्धः ।

ततः परिहासकेनेव चक्षुः पिदधता, परापवादश्रवणभीरुणेव श्रोत्रवृत्तिं स्थगयता, सोन्मादेनेव वायुवेगविक्षिप्तेन, पलितंकरणेनेव सुरयोषिताम्, अन्धंकरणेनेव योधानाम्, तिमिरेणेव समरप्रदोषस्य, पतितेनेव विमुक्तगोत्रेण, कुनृपतिनेव नक्षत्रपथगामिना,

---

माला स्यात्सप्तविंशतिमौक्तिकैः' इत्यमरः । 'अनंगबारणशिरोनक्षत्रमालायमानेन' इति बाणः । **पद्मानि** वयोविशेषसूचकाः बिन्दवः, कमलानि च । 'बिन्दुजालं पुनः पद्मम्' इति गजप्रकरणे हेमचन्द्रः । **महामृगाः** गजाः । 'हस्ती महामृगः पीलुः' इति त्रिकाण्डशेषः ।

क्षमा भूमिः क्षान्तिश्च । **आवर्तः** चक्राकारो रोमसंनिवेशः, अम्भसां भ्रमश्च । **ऊर्मिः** वेगः, वीचिश्च । 'ऊर्मिः पीडाजवोत्कण्ठाभंगप्राकाश्यवीचिषु' इति हैमः । 'पङ्क्तीकृतानामश्वानां नमनोन्नमनादिभिः । अतिवेमसमायुक्ता गतिरूर्मिरुदाहृतेति अश्वशास्त्रे' इति प्राचीनटिप्पणी । **मल्लिकाक्षाः** अश्वविशेषाः । पक्षे मल्लिकाः, अक्षवृक्षाश्च । यद्वा मल्लिकाक्षाः हंसभेदाः । 'मल्लिकाक्षः सितैर्नेत्रैः स्याद्वाजीन्द्रायुधोऽसितैः ।' 'मल्लिकाक्षास्तु मलिनैः' इति अश्वहंसप्रकरणयोर्हेमचन्द्रः । **भाण्डं** अश्वभूषणम्, मृत्पात्रं च । 'भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोः' इति मेदिनी । **देवमणिः** गलदेशस्थ आवर्तः । कौस्तुभश्च । 'अथ देवमणिर्भर्गेऽश्वावर्ते कौस्तुभे च ना' इति मेदिनी । **लेखाः** देवाः । **इन्द्रायुधाः** अश्वभेदाः, इन्द्रायुधं वज्रं च । **क्षीबाः** मत्ताः । **पानेति** । पानं रक्षणं, पानः रक्षको वा । पक्षे पानभुवि मद्यपानस्थले उषिताः लुठन्तः । 'पानं पीतिभाजनरक्षणे' इति मेदिनी ।

तत इति । ततः एतादृशेन रजोजातेन धूलिभरेण । विजजृम्भे अभिवृद्धमित्यन्वयः । भावे लिट् । **पिदधता** आच्छादयता । **वृत्तिः** व्यापारः । **उन्मादः** चित्तविभ्रमः । स च वातिकरोगविशेष इति स्पष्टमायुर्वेदे । **वायुः** पवनः, एकत्र बाह्यः, अपरत्र आन्तरः । **पलितं करणेनेति** । अपलितं पलितं कुर्वन्त्यनेनेति पलितकरणं तेन 'आढ्यसुभग—' इति कृञः करणे ख्युन् । एवमेवान्धंकरणेनेत्यत्रापि । 'पलितं जरसा शौक्लयम्' इत्यमरः । **प्रदोषः** रजनी-

कलिङ्गेनेव कृतधूम्यारुचिना, राजसेनेव व्यवहितसत्त्वेन, अविनीतेनेव समुद्धतेन, असज्जनेनेव पिहितसत्पथेन रणजेन रजोजातेन विजजृम्भे ।

अनन्तरं च नारायण इव कश्चिन्नरकच्छेदमकार्षीत् । कश्चिद्बौद्धसिद्धान्त इव क्षपितश्रुतिवचनदर्शनोऽभवत् । कश्चित्क्षपणक इव कटावृतविग्रहोऽभवत् । कश्चित्सुरापद्विज इव पपात । कश्चित्सुयोधन इव शङ्कितोरुभङ्गः सरोजलं विवेश । कश्चित् शरतल्पशय्यागतो भीष्म इव गतायुश्चिरं श्वसन्नासीत् । कश्चित्कर्ण इव विक्लवीकृताङ्गः शक्तिमोक्षमकरोत् । कश्चिद्राघव इव रावणवधमकरोत् ।

ततो विध्वस्तध्वजपटं पतत्पताकं व्यूहचारिभटकम्पितखड्गधेनुकं तत्समस्तमुभयं मिथो जगाम हननं सैन्यम् ।

ततश्च, यस्याश्रमः, तेन मुनिना पुष्पादिकमादायागतेन, योगदृशा प्रतिपन्नवृत्तान्तेन, त्वत्कृते ममायमाश्रमो भग्न इति कुपितेन 'शिलामयी पुत्रिका भव' इति शप्तास्म्यहम् । ततः क्षणेनैवेयं वराकी

मुखम् । **गोत्रा** भूमिः । गोत्रं वंशश्च । **नक्षत्रेति** । नक्षत्रपथः आकाशम् । पक्षे, क्षत्रपथगामी क्षत्रियाचारशाली न भवतीति तेन । **कलिङ्गः** धूम्याटो नाम पक्षिविशेषः । **धूम्या** धूमसमूहः । 'पाशादिभ्यो यः' इति समूहार्थे यः । उभयत्र तुल्यम् । **राजसः** रजोगुणप्रधानः । **सत्त्वं** प्राणी, सत्त्वगुणश्च । **समुद्धतेन** ऊर्ध्वप्रसारितेन गर्विष्ठेन च । **सत्पथः** नक्षत्रमार्ग आकाशम्, सज्जनमार्गश्च ।

नरकं नरस्य मनुष्यस्य कं शिरः, पक्षे, नरकः नरकासुरो भूमेः पुत्रः, निरयो वा । 'कं शिरोम्बुनोः' इत्यमरः । **क्षपितेति** । क्षपितं नाशितं श्रुतिः श्रवणं वचनं वदनं दर्शनं चक्षुश्च यस्य सः । पक्षे, श्रुतिवचनं वेदवाक्यं दर्शनं शास्त्रं सिद्धान्तो वा । **क्षपणकः** जैनः । **कटः** गजगण्डः, शवो वा । पक्षे कटः काशादिरचितरज्जुः, अतिशयः, ओषधी वा । **सुरापः** मद्यपायी । **शङ्कितेति** । शङ्कितः उरुः महान् भङ्गः पराभवः येन सः । पक्षे, ऊर्वोः सक्थ्नोः भङ्गः विदलनम् । **तल्पं** शयनम् । प्रसिद्धेयं कथा भारते । **कर्णः** राधेयः । **अङ्गं** अवयवः, अङ्गाः कर्णपालितोऽङ्गदेशश्च । **शक्तिः** उत्साहः, बलं वा । पक्षे इन्द्राद्गृहीतं शक्त्याख्यमायुधम् । **रावणः** रावयतीति व्युत्पत्त्या सर्वानपि क्रन्दयन्कश्चिद्वीरः । पक्षे, पौलस्त्यः ।

पताका वैजयन्ती । **व्यूहः** बलविन्यासः । **खड्गधेनुः** कृपाणी । 'क्षुरी छुरी कृपाणिका । शस्त्र्यसेर्धेनुपुत्र्यौ च' इति हेमचन्द्रः । **मिथः** अन्योन्यम् ।

बहुदुःखमनुभवतीत्यनुग्रहादार्यपुत्रकरुणया च स मुनिर्याच्यमान आर्यपुत्रहस्तस्पर्शावधिकं शापमकरोत् ।

ततः कन्दर्पकेतुः श्रुतवृत्तान्तेन समागतेन मकरन्देन तया वासवदत्तया च समं स्वपुरं गत्वा हृदयाभिलषितानि सुरलोकदुर्लभानि सुखानि ताभ्यां सहानुभवन् कालमनेकं निनाय ॥

'मिथोऽन्योन्ये रहोऽर्थे च' इत्यव्ययप्रकरणे मेदिनी ।

योगदृशा ध्यानचक्षुषा । **प्रतिपन्नः** ज्ञातः । **वराकी** शोचनीया । 'वराकः शोच्यरणयोः' इति हैमः । 'जल्पभिक्ष—' इति वुञः षाकन् । षित्वात् ङीष् ।

समं सह । **स्वपुरं** कन्दर्पकेतोर्नगरम् । 'पाटलीपुत्रम्' इति पाठः क्वचिद्-दृश्यते, स चाशुद्धः ।

24/11

17

उज्जयिनी: विमति=

+

तारापीड: + [illegible] का-
पुत्र: — माता — [illegible]वती ॥

चन्द्रापीड:

मंत्री — प्रिय। — ताम्बूलकरङ्क-वाहिनी

कनास: — कादम्बरी — पत्रलेखा
| पुत्र: — ॥ — सखी
वैशम्पायन: — सुता गंधर्व-राजस्य ॥ — महाश्वेता
|
माता
मनोरमा

28) 1482 (
1486
9
2

1200 ~~)~~ 1482
200
1

~~To the Regi~~
University Lahore

please supply visharada examination form.

Gir Lal Sher
13 Hindi Tr.
Verinag